५३॥ विद्यमानत्वमात्रेणनानियक्तिर्भवेद्यतः। मद्वस्तेवाननियक्तमनियक्तंचल
स्ते।५४। अविज्ञातोज्ञातुमिष्टोज्ञायमानोथविस्मृतः॥ स्मर्यतेस्मृतदृत्येवंमन्नेवव
घा ३ क्तुधोच्यते।५५॥लोकेसामग्र्यभावाद्धाऊआँरतितोयवा। सन्घटोपिनदृश्येनपिंड ७४
स्थेनेस्ततेऊतः।५६॥आहृतत्वादितिब्रूमःपिंडेनैवतदाहृतिः। नपिंडस्थोघटः
किंतुमृन्निष्टःपिंडमंहृतः।५७ ऊंनदेशाद्विनदेशंऊआद्यावरणंभवेत्। अनिन

देशापिंडेनऊंनस्याक्रियतेकथं।५८।एकस्मिन्नेववियतिचांद्रतेजोनिगूयते।सौरे
णतेजसातद्वत्पिंडेनाक्रियतांघटः।५९॥एकस्यांमृदिपिंडाद्याःकार्याःसंतिसहस्र
शः। यस्यानियक्तिसामग्रीस्यात्तेनान्येत्रसंहृताः।६०।पिंडेनाक्रियतेऊंनःऊंनेना
पिकपालकं। कपालेनाहृतःऊंनएवमन्योन्यसंहृतिः।६१। ऊंनेनैवकपालाद्या
ःऊंनांशाभांत्यतोघटः। नकपालेराहृतस्वेनविनक्तैस्तदाहृतेः।६२। यदिपिंडाहृ
तिःऊंनःऊजालमर्हिसाधनैः। नंगायैवाहृतेर्यत्नंकुर्यान्नघटनिर्मितौ।६३। एवं
चोद्यतस्तेत्रकोनिप्रायस्तमीरय। किमुत्पत्तिंवारयसेकिंवादंडादिसाधनं।६४। आ
द्यइष्टोद्वितीयेउमादंडादिनिवार्यतां। घटानियक्तिदेउतादाद्यंदंडादिसाधनं

६५॥ अनेकसाधनायस्मादनिर्वृक्तिर्जगत्यसौ। वस्तुभेदादतोलोकसिद्धंसाधनमिष्य
तां ।६६॥ दीपेनव्यज्यतेरूपंनवनीतंयथाघटः। दंडादिनाततःसर्वमेदेवव्यक्तितःपुरा
६७॥ तमोविनाशनायेवदीपश्चेदस्तुतावता। सदेवव्यज्यतेसर्वमितिनैवापनुद्यते ।६८
भावाभावोत्पत्तिनष्टश्चेत्प्रत्ययभेदधीः। अनिर्व्यक्तितिरोभावद्वैविध्यादुपपद्यते ।६९
व्यक्तेर्दीपेनभावःस्याज्जातोव्यक्तस्तुदंडतः। पिंडादतस्तभावःस्यान्नष्टःछन्नःकपा
लकैः ।७०। एवंव्यक्त्यावरणयोर्बहुत्वादेकएवसन्। उच्यतेबहुभिःशब्दैस्तदुक्तिर्
यतेपुनः ।७१। ऊर्द्धादतस्तमंस्पृष्टःस्पृष्टोव्यक्तस्तुपाणिना। मोहादतस्तविश्व
तोज्ञातोव्यक्तःभ्रमाणतः ।७२। ननूदारणेष्वेषुतन्नदारत्तिभंगतः॥ अन्याकार

स्यादनिर्व्यक्तिर्यथाकार्यानियम्यते ।७३॥ अनिर्व्यक्तेरनन्यत्वेश्लिलयापिंडभंगतः॥
अनिर्व्यज्येतऊंनोयंनतदाकृतिसाधनैः ।७४। उच्यतेतावदज्ञातज्ञातोदाहरणेनिमे।
भेदाविर्भविरोधानिर्व्यक्त्यावरणभंगयोः ।७५। अज्ञातत्वावशिष्ट्यर्थमादिसंतेहि मा
निनः। मानानिमानसंबंधादज्ञातत्वंचनश्यति ।७६। मातुर्मानान्निनिष्पत्तिर्निष्पन्नमे
यमेतिनत्। मेयान्निसंगतंतच्च मेयाभत्वंप्रपद्यते ।७७। मेयाभत्वमनिर्व्यक्तिर्नश्येद
ज्ञाततातया घटोवगतइत्येतन्नतःसंपद्यतेफलं ।७८। एवंदीपप्रकाशोनमत्रका
शोघटोभवेत्। घटनिष्ठप्रकाशोयंघटनिष्ठंतमोनुदेत् ।७९। एवंदंडादिनाभग्नो
घटाकारःस्फुटोभवेत्। पिंडाकारस्तिरोधत्तेततोदंडाद्यपेक्षते ।८०। श्लिलयापिंड

भंगेषुतुव्यज्येतान्यत्तदामृदि। कार्यविदलचूर्णादितेनाप्यार्द्रतताघटे।८८। अतोनिय
तमेवात्रकार्यानित्यत्वसाधनं। सदेवव्यज्यतेकार्यंनासदर्वाजायतेतनुः।८२॥ भाषा
मात्रविभेदोयमितिचेन्नस्त्रीवैदिकी। न्यक्कारभाषांकार्यस्यनावदवैदिकभाषया।
८३॥ स्तनादिघटौनस्तस्तवसंतौमतेमम। तयोर्ज्ञानंसद्विषयंवर्त्तमानस्य
धीरिव।८४॥ अतीतानागतोर्थोसन्नितियद्युच्यतेतदा। अतीतानागतज्ञानंभ्रांत
मेवेश्वरंभवेत्।८५। प्रागभावस्तथाध्वंसइत्याद्यावाघुदीरिताः। अभावाब्रह्मक
र्यंवासद्रूपाःस्युर्घटादिवत्।८६। भावत्वस्याविशेषेपियद्याजल्पभुवोर्मिदा। ना
वावांतरभेदाः स्युःप्रागभावादयस्तथा।८७। लोकप्रसिद्धिमुल्लंघ्यकिंभावत्व

डुगग्रहात्। कार्यंतवेतिचैवाकिंकार्यंवेदलंघने।८८। अभावव्यवहारस्तुभावत्वेपु
पपद्यते। नावांतरमभावोहि कयाचिद्व्यपेक्षया।८९। सदेवसर्वमित्युक्तावाव
र्त्तेकिंभवेद्वद अभावइतिचेत्तर्हि सोप्युपेयोबलात्त्वया।९०। बाढमभ्युपगच्छामिश्रू
न्यत्वंभ्रांतिकल्पितं। तन्निवर्त्तयभावत्वंसतयोः शून्यमात्रयोः।९१। युक्तियुक्तमि
होच्यते।९२। किंप्रागभावःप्रध्वंसाद्भिद्यतेथनभिद्यते॥ अभेदस्तेऽपसिद्धांतोभेदे
भेदकमुच्यतां।९२॥ विलक्षणस्वरूपत्वंनतयोः शून्यमात्रयोः। नचौपाधिकभेदः
स्याच्छून्यस्यौपाध्यसंभवात्।९३। घटस्यप्रागभावोयःसपिंडोपाधिकोयदि। त
र्ह्यत्रमानंवक्तव्यंत्वयातत्कंउनयुज्यते।९४॥ नीरूपप्रागभावस्यचाद्युषत्वमासं

गतं । पिंडेदृष्टेप्रागभावोदृष्ट इत्येषतेभ्रमः । ९५ ॥ प्रागभावव्यवस्थितिर्यदिपिंडदृ
ष्टदा । सएवप्रागभावोस्तुकिमुपाधितयातव । ९६ ॥ पिंडत्वप्रागभावत्वेएकस्याप्य
विरोधिनी ॥ स्वतः पिंडोपपेद्यान्यप्रागभावत्वमश्नुते ॥ ९७ ॥ प्रागभावोस्तिदृष्टश्चेत्पे
वंतन्नत्वदर्शने । नावस्यैवोपपद्येतेनस्वन्यस्यनिरात्मनः । ९८ ॥ युक्तियुक्तंवैदि
कंचमतंत्यक्त्वादुराग्रहात् ॥ कुतर्कसमयेमग्नः किंमुधापरिमुह्यसि । ९९ । अ
भावस्यापिभावत्वेकृतः कार्यमसङ्गवेत् । कारणस्यतुभावत्वमनिवादंमतेपिते ॥ १०० । नन्वेवंत्रैकंस्वतः सिद्धंन्यग्रूपमनन्यदक् । वास्तिष्टंवेदसिद्धांतेकिमर्थंकार्यका
रणे । २ । एवंभूतात्मबोधार्थंकारणादिप्रसाध्यते । उर्वयः सोवतारयेत्याचार्यै

रेतदीरणात् । २ । सत्तत्वकमिदंसर्वमितिसंसाध्ययत्नतः । तस्यापिसंविन्मात्रेणपू
र्णतैवोच्यतेस्वतः । ३ ॥ कारणादिनिषेधेननत्वद्वैतमनीप्सितं । तथाचनेतिनेतीति
बोधस्योत्तमताश्रुता । ४ । बाढंकिंतुनिषेधोयंनोपादेयतयोच्यते । ऐकात्म्यमात्र
बोधेननिषेधस्याप्यपक्षवात् । ५ । निषेधबोधसद्बोधौयौतयोः काव्यवस्थितिः ॥
उच्यतेनैतयोरंशभेदेनात्रव्यवस्थितिः । ६ ॥ यथाचूतफलेबीजंग्राह्यंत्याज्यस्तुनद्व
सः ॥ नैवंजगतिबोधायत्याज्यंग्राह्यंचनिद्यते । ७ । किंतर्हिसर्वंसत्याज्यमुपादेयंत
थाखिलं ॥ रज्जुसर्पेखिलंत्याज्यंग्राह्यंचाखिलमेवतत् । ८ । नहिरोभागमुत्सृज्यपु
च्छभागंप्रगृह्यते ॥ निखिलांसर्पतांत्यक्त्वानिखिलांरज्जुतांविदुः ॥ ९ ॥ जगद्भावं

भ्रमंत्यल्पावबुद्धत्वेनैतिपूर्णतां ।ततः पुरुषचित्तस्यभेदाद्वैधव्यवस्थितौ ॥१७॥ दृश्यो
न्मुखमेवैतच्चित्तं चेत्तन्निहन्यते ॥ दृश्यात्मत्वावशेषायनिषेधोयंप्रशास्यते ।१८
नानात्वाख्यायहृत्स्थंचित्तमद्वैतवस्तुनि । प्रवेशयतिचिंतेयंकार्यकारणसत्व
गा ।१९॥ त्वंपदार्थमुखेनैतत्तदर्थमुखेनवा । पूर्णोविशिष्यतांविद्वानित्येतद्भ्रांति
कृद्भवेत् ।२०॥ तस्मात्सत्कार्यमखिलं कारणेनमतावृतं ।जगतः प्रागवस्थायां
नामरूपेनहिस्फुटे ॥२४॥ प्रागवस्थामुपक्रम्यवक्ष्युत्पत्त्यवमानया । सृष्ट्या
स्तोतुमिमंवक्ष्मिसृष्टिरिहवर्ण्यते ।२५॥ यत्सद्रूपंपरं ब्रह्ममंविन्मात्रंमतत्व ७८
कं । अविज्ञानात्मयाख्यात्म्यजगतः कारणंहितत् ॥२६॥ सज्ञानादेवतद्ब्रह्म

ग्निस्फुलिंगभविष्णुच ॥ विनाज्ञानमसंगत्वकृतःस्यात्सर्वशक्तिता । २७॥ त्वकारणं
मदज्ञानात्कारणत्वंयथाभजेत् ॥ ब्रह्माकारत्वमित्येवंनिराकारमपिस्वतः । २८॥
स्वचिदाभासमार्गेणस्वात्माज्ञानजांवर्ष्मसु प्रविष्टएकोबुधावियद्घटादि
षु । २९॥ घटेषुयेघटाकाशावास्तवंवियदेवते ॥ घटस्थेषुजलेष्वन्येसाभासाःप्रति
बिंबिताः ॥३०॥ तथैवबुद्धिदृष्टारोजीवाब्रह्मैववास्तवं ॥ जलौघ्यवच्चिदाभासाः
प्राप्ताबुद्धिस्वरूपतां । ३१। अंगारतापसांनिध्याद्यथाकुंभजलादिषु ॥ तापाभा
सउदेत्येवंचिदाभासोपिबुद्धिषु ॥३२॥ चिदाभासेषुनाम्नांतंदुःखिताद्यवभास
कं तात् ॥ बुद्धिदृष्टषुदुःखादेरारोपोमुख्यतान्नृणां ॥३३॥ अज्ञानानुपमर्देनय

त्मसृष्टौद्वैतभासनं ॥ स्वप्नविज्ञानवन्नेदंवस्तुतत्त्वावभासकं ।२४। अपिच्योतत्त्वविज्ञा
नहेतुत्वंद्वैतमृच्छति ॥ निद्रांहित्वायथास्वाप्नान्निमित्तादपिबुध्यते ।२५॥ साध्यसाध
नतांतस्मादज्ञानैक्यपाश्रयां ॥ उच्चैरनूद्यतत्त्वंवेदांतास्त्यपादयत् ।२६। अका
रणमकार्यंसत्कार्यकारणतामगात् ॥ मोहादेवततः शास्त्रं मोहोच्छित्यैप्रवर्त
ते ।२७॥ नामरूपादिनायेयमसत्येनावभासते । मायातस्याः परंसौम्यमोहशास्त्रं
नभण्यते ।२८॥ एतस्माज्जायतेप्राणोमनः सर्वेंद्रियाणिचखंवायुर्ज्योतिरापश्चभू
मिर्विश्वस्यधारिणी ॥२९॥ तत्रादौसृज्यवस्तूनांप्राणादीनांविचारणे । दक्षंमनोऽसृ ७९
जत्तेनवेदेसृज्यंव्यचारयत् ॥१००। नचास्यमनसः सृष्टैप्रमज्येतमनोंतरं । नही

दीदृगतिगंभीरं शक्यंतर्कयितुंनृभिः ।३२। मतेनमनसास्मिन्लीनान्वेदाननुस्म
रन् । समन्वालोचयद्देवोवेदोक्तांसृष्टिपद्धतिं ॥३३॥ सृष्टिः सर्वामनस्य स्यप्रादुरा
सीद्यथायथं ॥ हिरण्यगर्भएषोभूदीशोमानससृष्टितः ॥३४। क्रियाविज्ञानशक्त्या
त्मासूत्रात्मादृष्टशरीरभृत् ॥ स्थूलभूतानिसृष्ट्वात्रेतोविन्यदधाच्चकं ।३५। द्वैतैकत्वा
त्मकज्ञानकर्मणीसर्वसंविते । भावनाचतयोरेनत्रयंरेतोनिधीयते ।३६॥ भू
तानांसारएकत्रसंधीभूयाथरेतसा । यतोंडमभवत्तेनविधाताग र्भवानभूत् ॥
३७॥ हिरण्यगर्भगर्भोयं समंवत्सरतामगात् ॥ हिरण्यगर्भः कालेनसोनो
देकालसंयुतं ।३८॥ अंडंभित्वांतरंसृजद्विराजंपुरुषंप्रभुः ॥ क्रियाविज्ञान

शात्परात्माविराजोपहितोद्यभूत् ।३९॥ नामरूपादिमद्देहसंबंधान्नहिलक्षणः ॥
अरूपोहिसूत्रात्मालक्ष्यतेरूपवानिव ।४०॥ सूक्ष्मस्थूलशरीराभ्यांविद्याभाभ्यां
मविद्यया ॥ युतःकूटस्थईशोपिमशरीरोबभूवह ।४१॥ सवैशरीरीप्रथमःसवै
पुरुषउच्यते । आदिकर्त्तासभूतानांब्रह्मोपास्यदहेरितः ।४२॥ अज्ञानायादि
मत्वासस्वभावबलचोदितः ।हिरण्यगर्भमंपुत्रमतुंदारित वान्मुखं ।४३। भि
नत्तिसर्वमर्यादांनान्वयाद्यपेक्षते । अस्यदग्धोदरस्यार्थेकोनऊर्यादमांव्रतं
ध्ध॥स्थूलदेहविहीनस्यकथंमुखविदारणं । इत्यचोद्यंयतःस्वप्नइवस्यात् प्रति
भासतः ।४५। जन्मांतरसमभ्यस्तविद्याकर्मादिहेतुतः । जन्यकर्मप्रयुक्तःसन्

विश्वभीतस्तदारुदत् ॥४८॥स्वभावप्रेरितोह्येषघ्राणदृष्टवशानुगः ॥रोदनोत्थरवत्र
स्तःस्वभावंचिछिदेनयात् ।४७। अत्यंतमपिशूराणांस्वस्वभावैकहेतुतः ॥ निति
राहिमृत्यातेबेपथुर्जायतेभयात् ।४८॥ इत्थंविचारयामासविरतःपुत्रभक्ष
णात् । अन्नबीजंविराड्देहस्तन्नसंफलार्थिना ।४९॥ विचार्यतेनबीजेनभो
क्तृभोज्येसमार्जमः । अस्याद्याद्यहभोक्तारोवेदयज्ञादिभोग्यकं ।५०॥ स्वरूपा
नुपमर्देनसविराड्देवतात्मनिः । आत्मानंव्यभजत्स्थूलैस्त्रिधावायग्निभानुभिः ।५१
इत्थंमहाभागएषवह्निस्तेनविराड्धिया । उपास्यइतिसंस्तौतिध्येयोयज्ञः स्तूयते
तथा ॥ ५२॥ सविराडश्वमेधेनयज्ञेयेनियचारयत् । विराजःप्राणउक्तोवि चा

रश्मकर्शितात् ॥५३॥ प्राणेक्रांतौविराजोस्यदेहउत्क्रान्तांगतः । यतोश्वयत्ततोश्वा
ख्यां वैराजोदेहआप्तवान् । ५३। सोकामयतमेध्यंमेशरीरंस्यादितिप्रभुः । काम
यित्वाविवेशतस्मादमेध्यंमेध्यतामगात् ॥५४॥ अश्वयन्मेध्यमभवदश्वमेधस्ततो
विराट् । अश्वाश्वमेधौस्तूयेतेज्ञानकर्मप्रवृत्तये ।५५। अश्वाश्वमेधवर्ज्जीना मर्थवादे
नसंस्तवात् । ज्ञानकर्मविधानेनतस्यस्यादेकवाक्यता ।५६॥ १२२५ इतिवाजि
कसारेतृतीयाध्यायस्यद्वितीयंब्राह्मणं ॥ अग्निब्राह्मणमिदंसमाप्तं ॥ ॥तृतीय
ब्राह्मणेप्राणः श्रद्धादिगुणसंयुतः ॥ हिरण्यगर्भप्राप्त्यर्थमुपास्यः प्रतिपाद्यते । १
आध्यात्मिकपरिछेदं परित्यज्याधिदैविके । रूपेस्वरूपबुद्धिर्यासात्मात्मिरिती

र्यते ।२॥ अश्वाग्युपासनस्यापिफलमेतन्नचेतरत् । तथाप्युपास्यभेदेन भिन्नैवोपास्ति
रिष्यते । ३। एकत्वेपीश्वरस्यास्यगुणभेदेनभिन्नता ॥स्थूलसूक्ष्मशरीरास्यौ विराट्प्रा
णौहितौगुणौ ॥४॥ सर्वस्यस्थूलमुख्यत्वमिहसूक्ष्मस्यमुख्यता । तथाचसूक्ष्मदेहो
त्थाभवेत्स्थूलाहिवेदिताः ॥५॥ आत्मविद्याधिकारेस्मिन्नुपास्यादियदुच्यते । त
द्धिवेकोपयोग्येवतस्मात्प्राणोविविच्यते ।६। स्थूलस्यसुविवेचत्वादादौमंदंप्रती
रितं । उत्तमंप्रत्यसौप्राणेदुर्विवेचोविविच्यते ।७। पौर्वापर्यमतोयुक्तंविराट्
प्राणास्यविद्ययोः ॥ मुख्यंप्राणमुपासीतश्रद्धादिगुणसंयुतं ॥८॥ वागादयोन
श्रद्धाः स्युर्विषयासंगदूषिताः । मुख्यप्राणस्तुश्रद्धः स्याद्विषयासंगवर्जनात् ।९

मु रण्प्राणोहमस्म्येषत्रासुरैरप्रधर्षितः ॥ हिरण्यगर्भ देवस्य त्रीणि रूपाणि संतिमे ।१०
त्रयास्य दूतिना मैकं तथांगिरस दूत्यथ । हरित्येतानि ना मानि तेषामर्थो मयि स्थितः
११॥ त्रय मास्येतर स्तीनि देवा मांप्राण मूचिरे ॥ तेनाया स्योभवं सर्वप्राणि वक्रस्थित
वतः ।१२। त्रंगानां सार भूतत्वाद हमांगिरसोभवं ॥ पाप्मनोदूर भूतत्वात् हर्नी मन्ना
म्नवानहं ।१३। वागादि देवताभ्योहं पाप्मानमपहत्यतः । त्रग्न्मादि भाव मनयं ते
यथा यथ मामते ।१४॥ मदर्थ मन्नं संपाद्य तद्भुं जेतेन देवताः । वागादयो मदात्मान
स्तृप्यंत्यहमिवेतराः ।१५। भर्त्री श्रेष्ठः पुरोगंता ह्यन्नादोस्मित थाधियः । त्रग्न्यजुः सा ८२
म रूपोहं मा वामश्चेति मामतत् ।१६॥ मेति वा वो निधा नंस्याद मः प्राण निधा त

था । मामेत्युभयत्रोक्तं चस मत्वाद्वा थमामतत् ।१७॥ पुत्तिका मशकानागो विराट् मूत्रमि
तीरिताः ॥ येदेहास्तैः समोहंस्यां लिंगेनैषांप्रसरणात् ।१८॥ उद्गीथोहं प्राणउस्याद्वा
गीथाहं द्वयात्मकः । प्राणप्रधानयावा वाकरोम्यौद्गात्रमध्वरे ।१९। साम्नोममधनंकं
ठ माधुर्यं चर्ण मौष्ठवं । सुवर्ण मेप्रतिष्ठानुवाग्देहो वा नवेदिह ।२०। त्रभ्यारोहजप
स्याहं देवताप्राण विग्रहः ॥ इत्युपासीनएवेम मभ्यारोहंजपेत्पुनः ।२१। इत्युपा
स्तिप्रकारोयं यथावद्दिङ्मणितः । प्रधानगुणभेदेनफलमत्र विभज्यते । ऐहि २२
कामुष्मिकलाभांप्रधानस्यफलंद्विधा । तदभ्यारोहमंत्रेषु द्वाभ्यामादौप्रदर्शि
तं ।२३॥ प्राणात्मलाभि मानेन साहंकारोयमैहिकः । सत्रासुरासंग पापनाशो

भवतिनान्यथा।२४॥लोष्टःपाषाणभेदायहिप्रभूर्णीभवेद्यथा।नरूपेदासुरपाप्मैवंप्राणो
पासनशालिनः।२५।उपासनविरोधिन्योरागाद्याश्चित्तवृत्तयः।आसुर्योदूरतोयांतिह
रीमप्राणचिंतवान्।२६।नैरंतर्यनिवृत्तेषुध्यानेषुनेषुपिहायः।कामादेरस्त्यथाप्यन्न
त्वरास्यात्प्राणवीर्यतः॥२७॥आध्यात्मिकपरिछेदंमृत्युंवागादिदेवताः।नीत्वावह्नि
हिभावेनध्याननिष्ठस्यभांत्यमूः॥२८॥अहंमनुष्यइत्येतद्भावंत्यत्काथचिंतकः।हि
रण्यगर्भएवास्मीत्यात्मानमभिमन्यते।२९।आध्यात्मिकपरिछेदःप्राकृतज्ञानहेतु
कः।युक्तोस्यबाधःशास्त्रीयादेवतात्माभिमानतः।३०॥जीवाविष्टउपास्योत्रदेवता
विग्रहःसदा॥प्राणोहिरण्यगर्भात्मायावन्नदभिमानिना।३१।भावनोपचयाज्जह्या

त्परिछेदंस्वमातुरं।नमरुत्प्राणविज्ञानमात्रेणब्रह्मबोधवत्।३२।भावनातोन्यदेवात्म
साक्षात्कारादयंपुमान्॥देवोभूत्वेदनश्चित्तोमृत्वादेवोभिजायते।३३।ब्रह्मैवमनूव
स्तुतःस्यादब्रह्मज्ञानमात्रतः।ज्ञानादज्ञानमुच्छिद्याद्भावनातत्रनार्थ्यते।३४।हि
रण्यगर्भतासर्वमतीभावानाबलात्॥लब्धव्यातेनतद्भावाभिमानोध्यानजोमतः
३५॥देवात्मत्वाभिमानोयःसमाशालकारऐहिकः।आद्याभ्यागेहमंत्रेणप्रार्थ्यतेफ
लरूपतः।३६॥हिरण्यगर्भरूपत्वंस्वस्यैवामुष्मिकंफलं॥प्रार्थ्यद्वितीयमंत्रेणकृती
भेनोभयंपुनः।३७॥सायुज्यमपिमालोक्यंस्यादिद्यामुष्मिकंफलं।भावनायाविधि
त्वात्द्वयंपुरुषभेदतः।३८।मनुष्यत्वप्रवहेर्यावत्स्याद्देहविस्मृतिः।तावच्चेद्भा

वनां ऊर्यान्नदा मायुज्यभाप्नुयात् ।३९॥ देवात्मतायाः प्राचुर्यमर्त्यलंवकदाचन । भाति
चेन्नर्हि मालोक्यंतदप्येवमनेकधा ।४०॥ हिरण्यगर्भोयः सर्वः मायुज्यंतत्स्त्रवेशने ।
सत्यलोकप्रवेशस्तुसालोक्यमितिकथ्यते ।४१। सारूप्यमार्ष्टिमामीप्यभेदाच्चांतर्भ
वंतिहि । सालोक्यएवतत्रापियथाध्यानंफलंमतं ।४२॥ हिरण्यगर्भोभूयासंभावि
सृष्टौजगत्सृजन् । इतिसंकल्पयुक्तश्चेन्नथैवभवतिध्रुवं ।४३। इत्युक्तंमुख्यफ
लंगुणानांफलमुच्यते । नहूर्गुणफलंपापहरत्वंतस्यमुख्यतः ।४४। वागादिपोषक
त्वंयत्स्त्राणस्यतदुपामनात् । ज्ञातीनांपोषकोभूत्वाश्रैष्ठ्यादिगुणवान्भवेत् ।४५ ८७
अस्यवैरिस्वपोष्याणांपोषणायनशक्नुयात् ॥ अस्यनिष्यश्चभक्तश्चशक्तोज्ञाति

पोषणे॥४६॥स्वमुवर्णप्रतिष्ठानध्यानात्स्वादिफलंभवेत् । एतैर्गुणफलैर्मुख्येफलेवि
श्वासउद्भवेत् ।४७॥मुख्यात्फलंविरेणस्यादचिरेणगुणात्फलं । अतोगुणफलेद
ष्टे पुंसः श्रद्धाविवर्धते ।४८। गुणमुख्यफलेउक्तेगुणभागेथचिंत्यते । कस्तैर्विफ
लन्नागत्रकर्मकालेविधानतः ।४९। प्रस्तोताप्रस्तुयात्सामयस्मिन्कालेतदाज
पः । कार्योभ्यारोहउद्गात्रासवप्राणविदीरितः ।५०॥ एषएवंविदुद्गातायंकामंका
मयेतत॥ स्वार्थंवायजमानार्थंसंपादयतिसर्वथा ।५१। इतिश्रुतेरन्यतरोयजमा
नर्त्विजोः फली॥ परकर्मप्रवेशोपिवचनाद्दृत्विजः फलं ।५२। तस्मात्स्यादेवभावा
न्निर्ज्ञानकर्ममुच्यात् कर्महीनेतुविदुषिस्यान्नवेत्यत्रशंक्यते ।५३। तदेतत्स्त्रा

णविज्ञानंकर्महीनमपिध्रुवं। स्वफलप्रदमेवेतिश्रुत्याशंकानिवार्यते ।५४। दृष्टैवासु
रभावस्यप्राणोस्मीत्यभिमानतः। प्रधक्तत्वात् ऊतःशंकानवेद्येनुविवर्जनात् ५५।
मनुष्योस्मीतिधीर्यस्यनवेदासुरपाप्मतः। तन्मूलात्तस्यशंकास्यात् मत्यप्यस्मिन्स
मुच्चये ।५६। नवधीजन्ममात्रेणपरमात्मप्रबोधवत्। संभाष्योदेवभावोस्यदेवोभू
त्वेतिसंश्रवात् ।५७। दृष्टैवदेवोभूत्वासौ भावनोपचयाद्यथ। मृत्वादेवानवाप्नोती
त्याहन्यायेनवेदवाक् ।५८। न्यायश्चासुरनाशाख्यः सचमाह्यात् ऋतेनैवेत्। सो
ह्यात् ऋतिः स्यात्संतत्यासंततिश्चनकर्मणः ।५९। समुच्चयाद्देवभावश्चागमादेव
निश्चितः। अतोस्यशंक्यमानोपिनशंक्यः प्राणदर्शिनः ।६०। वस्तुकर्मजविद्वेषंसो

ह्यप्राणात्मभावदृक्। तस्याप्याशंकितोपास्तिबलादेवनकर्मणः ।६१। कर्मकालेचिंत
यतोदेवावाप्तिः समुच्चयात्। निरंतरंचिंतयतदृष्टैवप्राणरूपता ।६२। उपासकप्र
योज्यत्वाद्भ्यारोहजपोनतु। सूत्रितः कल्पसूत्रेषुविधाप्रकरणोक्तितः ।६३। ज्ञा
नकर्मसमुच्चेतुर्जपश्चावश्यको मतः। प्राणात्मदर्शनेनैवनियम्येतोर्ध्वरेतसः ।६४
ध्यानंफलंफलीचेतित्रयदृष्टांनिरूपिताः। सुस्थितंविधितात्पर्यमर्थवादोनिरू
प्यते ।६५। देवासुराख्यायिकयाप्राणशुद्धिः परीक्ष्यते। मालिकोरत्नयोदेवास्ता
मस्योसुरसंज्ञकाः ।६६। प्रजापतित्वप्राप्त्यर्थमुपासीनस्यरत्नयः। वागादिजन्या
ल्लविधास्तत्राल्पाएवदेवताः ।६७। दैवंरत्नंयत्नमाध्यमासुरंसहजंततः। देवाः

DR BHAU DAJI

यंतएवसुरनंताश्चसुरान्हणं।६८॥ब्रह्मादिस्तंबपर्यंतलोकेषेनमुपामकं।यथाय
थंनयामेतितेस्पर्धंतपरस्परं।६९॥अधोलोकफलेषेवप्राकृतासंगकर्मसु।यत्नाद्
संजनीयोयंपितेत्यासुरनिश्चयः।७०॥प्रकृतासंगहानेनपितायंदेवमाधनैः।उक्त
एवोयथाशक्तीत्येवंदेवत्विकीर्षितं।७१॥यद्यप्यचेतनत्वेननस्पर्शेंद्रियवृ
त्तिषु।अथापितासांसाकल्यादेवानांवाभिमानिनां।७२॥यदोद्भवतिशास्त्रोक्त्या
दैवीवृत्तिरथासुरं।बलंनश्यत्यनेषेणसदेवानांजयोभवेत्।७३॥आसुरीउदयदा
मेनाकामक्रोधपुरःसराः।जृंभतेथजयंप्रापुरसुरादेवनायकाः।७४॥स्वाभावि ८६
कत्वादासुर्यीभूयस्वामेनयार्दिताः।देवाश्चसुरविध्वंसहेतुंबुध्याव्यचारयन्॥

७५॥उपास्योज्ञानकर्त्तारंजेष्यामोनिखिलासुरान्॥इतिमत्वावाचमादौकर्त्तृत्वेनात्र
वव्रिरे॥७६॥१३००॥यज्ञुलोकेत्रकर्त्तव्यंवागादिद्वारमात्मनः।ईप्सतेतदविद्योत्थं
निरविद्येनिषेधतः॥७७॥जीवस्यतमसैवेहदेहाद्यनुविधानतः।कूटस्थात्मातिरेके
णरूपमन्यत्रलभ्यते॥७८॥वाक्कर्त्तृत्वमतःसिद्धमुद्गायदियंववाक्।कल्याणो
च्चारणंकीर्त्तिर्हृद्यमुज्ञानतोभवेत्।७९॥कीर्त्तिंनिखिलदेवेभ्योदत्वाकल्याणभाष
णं।स्वार्थंजग्राहतत्सर्वमविदन्नसुरास्तदा।८०॥उद्गातारमुपास्यैनंदेवाःकल्याण
वादिनं।जेष्यंत्यस्मानितिनयादविध्यन्नसुरास्त्रमुं।८१॥आसंगशास्त्रविद्येयंवाक्क
ल्याणाभिमानभाक्।श्रमभ्यारतवीभत्सायुक्तंवक्तृवशागती।८२।सर्वजन्म

न्यभूदेतद्वर्तमानप्रजापतेः।अतस्तत्सृष्टजीवानांवाचिदोषोयमीरितः।८३॥क्रमेणान्यें
द्रियाण्येवंविद्धाप्राणंमुखस्थितं॥विद्यत्संतोमुरानष्टः पाषाणक्षिप्तलोष्टवत्॥
८४॥यद्यप्यन्नादनंदेहधारणंचेतितद्वयं।मुख्यप्राणेनकर्त्तव्यंसर्वार्थस्यात्तथापि
तत्।८५॥स्वार्थत्रासंगविषयेनास्तिकश्चिदतोमुरैः।अत्रधृष्याविशुद्धेयमभ्यारो
हस्यदेवता।८६॥उपास्यमानासादेवैस्तत्यापंध्यानवर्जिते।जनेतदीयेदोषेत्यक्ष्यं
स्तोविवर्जयेत्।८७॥एवंप्राणःस्वयंशुद्धःशुद्धंकुर्यादुपासकं।अतोवागादिकं
त्यक्त्वाप्राणंध्यायेत्प्रतर्पकं।८८॥तर्पयत्येषवागादीन्स्वभुक्तान्नेनसर्वशः।इत्य ८७
र्थंस्मकृतःसिद्धिरितिचेदुच्यतेशृणु॥८९॥भुक्तंत्रिधाभवत्यन्नंस्थूलमध्यमसूक्ष्म

कैः।भागैःस्थूलोबहिर्याति मध्यमादेहपोषणं।९०।अणीयान्सूक्ष्मनाडीस्थोदेवताः
पोषयत्ययं।पुष्टेंद्रियैःमुखोत्पत्तिर्याजीवात्मनएवसा।९१।ताएतादेवताःसप्तद
शज्ञानक्रियात्मिकाः॥सोयंसप्तदशाग्रामोभोक्तुःकरणलक्षणः।९२॥बुद्धींद्रि
याणिपंचैवतथाकर्मेंद्रियाण्यपि॥वायवःपंचबुद्धिश्चमनःसप्तदशंविदुः॥
९३॥त्यक्तेपिस्थूलदेहेस्मिन्भूतपंचकमाश्रयः।लिंगंसप्तदशाग्रामंप्राहुःपंच
कसंयुतं।९४॥पत्योभोवदिदंलिंगंनानारूपैःसमन्वितं।आविर्भावतिरोभावैःका
रणात्मनिवर्त्तते।९५।एकीभूतेक्षीरनीरेयथाज्ञानक्रियेतथा।एकीभूतेस्थितेलिं
गरूपेणानेकशक्तिके।९६।यथावाधेनुभिःपीतंनीरंक्षीरीभवेत्तथा।भोसाम

मोहश्चिन्निशेलिंगीनूयावभासते।९७॥आविर्भावतिरोभावौबकुशःपट्टचित्रव
त्।पटेविकासमंकोचाविवबोधसुषुप्तके।९८॥कूटस्थबोधतन्मोहचिदाभास
त्रयात्मना।संकोच्यजागरस्वप्नेलिंगंमुक्तौतिरोभवेत्।९९॥अपास्तशेषवा
ह्यार्थतज्ज्ञदासनयान्विते।लिंगमाविर्भवेत्स्वप्नेप्रसार्याखिलवासनाः।१००॥
जाग्रत्कालेविशेषेणस्थित्वाहृदयमध्यगे।द्वासप्ततिसहस्राणिनाडीर्व्याप्यावति
ष्ठते।१॥सएषपरमात्मैवस्वात्ममोहमहायवान्।ज्ञानशक्त्याक्रियाशक्त्या
जानन्कुर्वन्वपुःस्थितः।२॥आपादमस्तकंव्याप्तंलिंगेनात्मद्वपुर्यथा।तथा
देवादिदेहास्तल्लिंगंसर्वात्मकंततः।३॥एकमेवयथागोत्वंप्रतिव्यक्तिसमापितं।

प्रतिदेहंसमाध्यास्तेतथैकालिंगदेवता।४।लिंगंक्षुद्रशरीरेणपुत्तिकारध्येनतत्समं।म
त्राकेनगजेनापिविराट्पिंडेनतत्समं।५।वायुर्गौतमतन्त्रमित्युक्तेर्वायुदेहभृत्
हिरण्यगर्भस्तेनापिलिंगमेतत्समंमतं।६॥समस्तव्यस्तदेहेषुसमष्टिव्यष्टिता
मगात्।लिंगंममस्तदेहोयंवायुर्व्यस्तागजादयः।७॥धेन्वांगर्भस्थवत्सेवयथागोत्वं
समंतथा।सूत्रात्मन्यस्मदादौवलिंगमाम्नंश्रुतीरितं॥८॥समायामपिजिह्मायां
नरोवक्तिपशुर्नउ।सत्यसंकल्पतातद्वत्सूत्रादौनास्मदादिषु।९॥अभ्यासेनवचः
पार्नद्यथावक्तिशुकस्तथा।योगाभ्यासेनधर्मात्मासत्यसंकल्पवान्नरः।१०।एवो
धमुनिवत्सृष्टिंसंहृत्योःसूत्रविग्रहे।आविर्भावतिरोभावौलिंगमाप्नोतिमोहजं।

११॥ विदात्मव्यवहारार्थमुपाधिर्लिंगमीरितं। लिंगोपहितश्चात्मैषबद्धोव्यवतिष्ठते।१२
प्रतिप्राणिपरिच्छेदोज्ञानकर्मानुरोधतः। धर्मीधर्मानपेक्षःसन्नानात्वेनावतिष्ठते।१३।
एवंचसतिसूत्रात्मावर्त्तमानःपुरातनात्। अनुष्ठितज्ञानकर्मसाधनात्सृष्टतामगात्।१४। एकाप्यर्वत्रयुक्तत्वात्समष्टिव्यष्टिरूपिणी। प्राणिनांव्यवहारोयंसृष्टिर्नि
श्चायतोभवेत्।१५। प्रातिस्विकान्यपूर्वाणिप्राणिनांयानितान्यपि। तत्रैवांतर्भवं
त्यस्मतादृक्संकल्पयोगतः।१६॥ सर्वात्मप्राणरूपोस्मीत्येवंसंकल्प्यतत्फलं
प्राप्नोप्यसूत्रादिदेहेषुपुत्तिकांतेष्ववस्थितः।१७॥ एकमेवजगद्बीजमीशाभिप्रा ९७
यहेतुतः।भूरिनानाप्रभेदेशानप्रत्यात्मंव्यवतिष्ठते।१८। कुर्यान्मेरावरुधिय

मणोमेरुधियंतथा॥ सर्वत्राप्रतिघात्पेवप्रत्यगात्मामहेश्वरः।१९॥ अतत्त्वज्ञस्यतम
सोरज्ज्वज्ञानोरगादिवत्। अशवस्थाप्रभेदेनमिथ्याज्ञानंप्रजायते।२०। देहेंद्रिय
मनःप्राणविराट्सूत्रेशाव्याकृतयः। अशवस्थाइमाःप्रोक्ताश्चिदेकरसवस्तुनः॥
२१॥ प्रत्यगज्ञानविध्वंसोरज्ज्ञानहतावित्र। तत्कल्पितनिवृत्तिःस्यान्निष्पतेकेव
लःपरः।२२। समस्तव्यस्ततैसेप्रत्यगज्ञानभूमिगा। नत्वपास्तसमस्ताध्येनेतिने
तिपरात्मनि।२३॥ इत्थंप्राणस्यसर्वात्मतर्यकत्वप्रसंगतः। उक्तात्मस्थितिःप्रा
णस्तर्पकोध्येयदृष्यतां।२४॥ सुदृढंब्रुवन्नर्थवादस्तत्स्तुतिमत्सुचत्। अतःप्र
तीयमानेर्थेप्रमाणमविरोधतः।२५। नन्वुपास्तिविधिर्नैवपरमोन्नास्तएकः

वित् ॥ अभ्यारोहजपस्यैवविधिरत्रावलोक्यते ।२६।मैवमासुरपापस्यनाशोक्तोतद्वि
धिश्रुतेः ।यएवंवेदमप्राणोभवेत्पापमाउनश्यति ।२७॥ वागादिनिंद्यामुख्यप्राणो
पासानचेदिह ॥ विधिस्तिताथतन्निंद्याव्यर्थीप्राणस्तुतिस्तथा ।२८। ऐहिकामुष्मिकफ
लेहवैक्तिकेजपमात्रतः । नसिध्यतस्ततोनास्यजपशेषार्थवादता ।२९। उपास्याउफलं
सिध्येदंतरेणापितंजपं । इत्यर्थोगम्यतेलोकजिदेवेतिश्रुतत्वतः । ३०। सुप्त्यादिप्राण
माहात्म्यंविधिशेषार्थवादतः । नसिध्यतीतिनोवाच्यंबाधस्यानुपलंभनात् । ३१।
मुख्यास्थित्यादयः प्राणेगुणदृष्टान्ततेह । योषाग्निवादिवतकश्चिद्विरोधउप
लभ्यते ।३२॥ अन्नाद्यविषयायेतु गुणाआगमतोमताः । सुप्यादृतर्पकत्वाद्याः ऊ

तस्तेषांमृषार्थता ।३३॥ मृषात्वसाधकंमानंनकिंचिदिहविद्यते ।नचकारणदोषात्त्वे
देसंभाव्यतेक्वचित् ।३४॥ अद्वैतश्रुतिबाधेनमृषात्वमितिचेन्नतत् । प्राणोस्तिसुद्धि
र्मिथ्येतिनेवमाहश्रुतिः क्वचित् ।३५। सत्यामत्यविभागेयमविभागात्मवस्तुनि ।
प्रत्यगज्ञानहेतूत्थःपृथङ्नास्तीत्यभाषत ।३६॥ स्वाभासफलकामूढस्तदज्ञानजभू
मिषु । तस्थोपितदमंवद्वईशः प्राणादितांगतः । ३७।तदज्ञानंतदुत्थंचजगत्सत्तं
तदात्मकं । यतोतस्मादमूद्याहसदेवेदमितिश्रुतिः ।३८। प्राणोवातस्यसुप्तिर्वासर्वं
सत्तत्त्वमित्यसौ । अद्वैतश्रुतिराचष्टेनतुकिंचिन्निषेधति ।३९। नृशृंगांधपिस
त्तत्त्वमित्यभ्युपगमः श्रुतेः । प्राणस्सुप्त्यादिसत्तत्त्वमितिवक्तव्यमत्रकिं । ४०। याद

ज्ञंघ्राण मत्यलंताद्दशीस्यद्धिमत्यता। अनर्थकारिशास्त्वंस्यादयथावस्तुबोधने ।४१। ना
मब्रह्मेत्येवमादावयथावस्तुधीर्नवेत्। शास्त्रेणेतिनवक्तव्यंतद्धयेगौणतायतः।४२
यद्वन्निर्णीतनेदेपिविष्णुधीरुपलात्मनि।विधीयतेतथानाग्निब्रह्मबुद्धिर्विधीयते॥
४३॥अज्ञातरज्जुतत्वोहिरज्जुसर्पधियेक्षते। नामादौनतथातस्माद्गौणीधीर्नेतुमास्पृषा
४४॥ब्रह्मास्त्यंनहिवस्त्वस्तिबुद्धिरेवास्त्यतोमृषा। इतिचेन्नयतोगौणबुद्धिर्मुख्यार्थ
सर्विका।४५। गौणस्यमुख्यापेक्षत्वात्मुख्यंब्रह्मविनानतत्। गौणंब्रह्मयथा
गौणोवह्निर्मुख्याग्निपूर्वकः।४६॥विध्यभावाब्रह्मवाक्यमाभासइतिचेन्नतत्॥ ९१
क्रियावाक्यमभानत्वात्विधावाक्यस्यसर्वतः।४७॥असंदिग्धाविपर्यस्तधीः

मभावाक्ययोर्द्वयोः। भानत्वेतावतासिद्धेविधिः किंतेकरिष्यति।४८। अकार्येपिहिमे
र्वादावस्तिमेरुरितीरणात्। सम्यग्धीर्जायतेयद्वत्तथात्वंममसीत्यतः।४९। वेदेय
स्तिविनाकार्यंनिषिद्धार्थावबोधनं। पलांडुादावकरणान्नान्याधीर्जायतेऽनृते:।५०॥
मृगतोयेप्रवृत्तस्यन्नडार्त्तस्योषरेक्षणात्। तमोधस्तोनिवृत्तिः स्यान्निषेधेषुतथेस्मृ
तं।५१। इदंहितमितिभ्रांत्याप्रवृत्तस्यनिषेधतः। भ्रांतिनाशेनिवृत्तिःस्यात्पलां
डूादेरभक्षतः।५२। तस्मान्निषेधशास्त्रस्यसद्भूतार्थनिष्ठता। पुंव्यापारस्यगंधो
पिनतत्रास्तीतिनिश्चयः।५३। आत्मयाथात्म्यविज्ञाननिष्ठातद्वदीक्ष्यतां। तत्त्वमस्या
दिवाक्यानांनानुष्ठेयंमनागपि।५४। नकेवलमनुष्ठेयस्याभावःकिंतुवेदनात्। सर्वेप्रं

५६॥ अथ कृष्यादिवाधेपिनवाधः श्रौतकर्मणः। मैवमज्ञानहेतूत्थानर्थार्थत्वसमत्वतः।
५७॥ हितत्वश्रोतिनरकौकलंजादात्मनः। कर्तृत्वभ्रांतिदेहात्मीसमानेश्रौतकर्मसु
५८। शास्त्ररागादिजन्यत्वात्काम्यानामेववर्त्मना। शास्त्रमात्रनिमित्तत्वान्नित्यानां
नेतिचेन्नतत्। ५९। स्वर्गादिकामिनोयद्वदग्निहोत्रविधिस्तथा। मोहकामादिदुष्टस्य
नित्यंकर्मविधीयते। ६०। अकर्तारंस्वमात्मानंकर्तृत्वेनाभिमन्यते। नित्यकर्माधिका
र्यस्मान्मोहदोषोधिकारिणः। ६१। सोकामयतजायामेस्यादित्यादिश्रौतस्फुटं। का
मदोषः प्रत्यपादि सर्वकर्माधिकारिणं। ६२॥ आविरिंच्याद्विरक्तोपि मुक्तिंकामयते ९२
ततः। नत्वविद्वान्स्वकाम्येति चेन्नह्येषापिबाध्यता। ६३॥ आत्माज्ञानेकहेतुत्वाद्बाध

नः कायकर्मणां। आत्मज्ञानेनतद्ज्ञानान्न समाप्तिः सर्वकर्मणां। ६४। कर्मोपयोगाभावे
पिह्यथाकालक्षयाद्धरं। कर्मानुष्ठानमितिचेन्न घस्रेरसंभवात्। ६५। नचोच्छिन्नात्म
मोहस्यसदैवात्मधियः स्थितेः। अल्पोप्यवैवमरोस्मीहवाङ्मनः कायकर्मणां। ६६। क
र्मणोवमरश्चेन्स्यात्तद्विद्वावमरोयथा। मैवं क्षुधादिहोवैकहेतुत्वेनानिवारणात्।
६७। कर्मापिमोहकामादिमूलं चेद्धो विमुह्यति। मकरोत्येवकर्माणिकोह्यज्ञंविनि
वारयेत्। ६८। अनिवार्यक्षुधेश्चैकं मोहोयस्यानिवारणः। तस्मिन्नूर्वत्समूढस्य
किंछिन्नंब्रह्मवेदिनः। ६९। क्षुधितोभुंक्तइत्येवभुक्तेरन्योनऊर्ध्वचित्। मूढः ऊर्ध्व
तइत्येवनैवऊर्ध्वादमूढधीः। ७०। उच्छिन्नस्यनमोहस्यह्यकस्मात्पुनरुद्भवः। येन

मूढः प्रवर्तेतानित्यकर्मस्रुतत्ववित्।७१। कर्मब्रह्मधियोः कालभेदेनावसरोयदि।मैवं वस्तुनिमित्तत्वात् ब्रह्मबुद्धेः सदास्थितेः।७२॥ नवस्त्ववसरापेक्षोस्वतः सिद्धत्वकारणात्।७३ क्रियैयेवावसरापेक्षातस्माः कारकतंत्रतः।७३॥ यदोङ्कवेत्स्रुधेवास्यब्रह्मबलामोहवासना। तदाकृतंननित्यंस्यात्तस्यायादृछिकत्वतः।७४॥ दोषजन्मेपिनिह्नादोकालादिनियमःश्रुतः।विधिःसएषविदुषइतिचेन्नतदिष्यते।७५। १४००। एवंचेत्परिसंख्यातेकालेभुक्तानुतत्ववित्। प्रत्यवेयादितिज्ञानंबाढमस्त्यस्यदुष्कृतं।७६॥ मोहवासनयाकृत्वाविहितंसुकृतीयथा॥ निषिद्धातिक्रमेणैवंदुष्कृतीनन्नवेत्कृतः।७७॥ अशेषवचनात्तस्यसुकृतंलेपकंयदि। दुष्कृतंवनथेत्येवंसंतोष्टव्यंवि

पश्चिता।७८॥ तस्मात्कर्माधिकारेणनिषेधायात्मधीवचः॥ निषेधवाक्यवत्तेन कार्याशंकानकाचन।७९॥ तद्यावात्रनिषेधेपिश्रद्धादौवेदमानता। ब्रह्मणीवततः प्राणउपास्योगुणसंयुतः।८०। विध्यर्थवादन्यायानांसर्वस्मिन् ब्राह्मणेयथासंग्रहस्तद्वदत्रापिद्वतीयब्राह्मणेकृतः।८१॥ ३६१॥१४०७ इति वार्त्तिकसारेद्वतीयाध्यायस्यद्वतीयंब्राह्मणं॥ ॥चतुर्थेब्राह्मणेसर्वज्ञानकर्मफलोर्जितिं॥ अव्याकृतंव्याकृतंवविद्याविद्येववक्तव्यसौ॥१॥ श्रुत्वाफलोर्जितिंभीमांतदोषाननिलानुधिया।अपेक्षश्रद्धयातस्माद्विरक्तोयमुमुक्षति।२॥ अव्याकृतोक्त्यावेदांतप्रमेयंकथितंभवेत्। व्याकृतोक्त्याब्रह्मबोधद्वारंजीवोत्रवर्णितः।३॥ आदेयरे

निर्देशोविद्याविद्याक्षोद्भवात्॥ एतावतावशास्त्रार्थः संक्षेपेणात्रसूर्यते।ध। यद्वै
राजंपदंसर्वज्ञानकर्मफलंहितत्। चिदात्मैवविराड्रूपोयथास्याद्उच्यतेतथा।५॥
प्रत्यग्रूपःपराग्रूपोव्याघातोनुभवात्मकः। प्रथतेयःसआत्मेतिप्राकृरात्मविदोबु
धाः।६॥आत्मानात्मादिरूपंयन्नामरूपादिमज्जगत्। तस्मयद्वात्मवंरूपंसप्रत्य
ङ्द्वयस्तथा।७॥ नानात्वेनैवयद्भातितत्प्रत्यग्दृष्टिशालिनां। प्रत्यग्भात्रेविलीनं-
स्यात्परागेवैतिचित्रतां॥८॥ अपामार्गलतेवायंविरुद्धफलदोभवः॥ प्रत्यग्दृ
ग्विमोहायसंसारायपराग्दृशां।९॥ अयादधोमार्जनेमानलग्नाकंटकैःकरे। ९७
मूलादूर्ध्वमार्जनेनुलग्नास्याद्बकुभाकरे।१०॥ एवमंतर्मुखस्यायंसंसारोनैवदुः

खदः॥ बहिर्मुखस्तुसंसारोदुःखादुःखतरंव्रजेत्॥११॥ प्रबुद्धोतर्मुखस्तिष्ठेदप्रबुद्धो
बहिर्मुखः॥ बहिर्मुखेननज्ञातंप्रत्यक्तत्वंविनामिनिं।१२॥ यदज्ञातंपरंतत्त्वंतद्ब्रह्म
तत्कारणंश्रुतौ। अन्यत्कार्यात्तदेवस्यात्सर्वकार्यस्यकारणं।१३॥ तेनतेनात्मका
र्येणविशिष्टःसन्सृजेत्प्रभुः॥ स्वात्माभासमयोयुक्तस्तेजोवन्नानिमायया।१४॥ज्ञा
नकर्मादितंत्रंसत्सूत्रंजज्ञेततोविभोः। ज्ञानक्रियाशक्तिमत्त्वात्तत्रेदंजगदाहितं॥
१५॥ विराडपितताजज्ञेत्रैलोक्यात्मकदेहवान्। यथोक्तज्ञानकर्मभ्यामेवप्रत्यग्विराड
भूत्॥१६॥ सएषपरमोप्यात्माकोशपंचकधारणात्॥ संवृतःपुरुषाकारःकामादि
कलयोपप्लुतः।१७॥ सोनुवीक्ष्यात्ममोहोत्थंवैराजंरूपमात्मनः। नापश्यदपरंकिं

तत्सोहमस्मीत्यथाभ्यधात् ।२८। अहमित्येवनामास्यसंपन्नेनेनलौकिकाः ॥ तस्म
ष्टः स्वस्वमात्मानमहमित्यभिवदृते ।२९। कोशपंचकयुक्तस्यप्रत्यक्कूलस्यनामतत्
विराजाकृतमित्येतत्सर्वमाधारणंमतं ।३०। अमाधारण देहस्यतत्तत्पित्रादिनाकृतं
देवदत्तादिकं नामजघन्यंसर्वनामतः ।३१। कस्त्वमित्यपिएष्टः सन्नादावहमितिब्रुव
न् । पश्चाज्जघन्यनामेदं वक्तिजिज्ञासवेजनः ।३२। विदेकरमआत्मैवकमूलेकोशपं
चके । एकनामनिमंपन्नोहंकरोत्यभिमानतः ।३३। वहवोवीतकल्पेनाआमन्यद्यपु
पासकाः । तथापिभावनाधिक्यादेकएवविराड्भूत् ।३४। निःशेषेणासुरंपापंदग्धु
वानवद्यजन्मभिः ॥ ततोविराडभूदन्योप्येवंदग्धाभवेद्विराट् ।३५। दग्धपापोप्पना

त्मज्ञोदेहादावभ्यमन्यत । ततः स्वनाशमाशंक्यसोविनेदमदादिवत् ।३६। स्वरूपहिं
कल्पयित्वास्तेतद्भयादाकुलेंद्रियः । एवंनश्वरदेहादिप्रतीच्यारोप्यकंपते ॥३७॥ आ
लोचयेत्स्वजस्तत्वंमीनिध्वस्यैयथानरः । विराडालोचयेत्तद्वत्प्रतीचयेत्तद्वत्प्रतीच
स्तत्त्वमादरात् ।३८। आलोचयन्यथातत्त्वमपास्तभ्रांततद्भयं । अनन्यानुभवंसाक्षा
द्दृङ्नैकात्म्यमात्मवित् ।३९। प्रत्यग्याथात्म्यविज्ञानशिखिध्वस्तमहातमाः । आप्ता
प्तेषपुमर्थोघसोमन्यततोविराट् ।४०। देहेंद्रियमनोबुद्धिभावाभावादिमाहि
णः ॥ प्रतीचोन्यत्किमप्यत्रनास्तिकस्माद्विभेम्यहं ।४१। अन्वयव्यतिरेकाभ्यांस्व
मानंयदापुमान् प्रतीच्येवानुसंधत्तेब्रह्मास्मीतितदेहते ।४२। प्रत्यग्दृष्टात

CR BHAU DAJI

नेननजंचेद्दृतेस्वतः। ब्रह्मप्रतीचोरेकात्म्यात्तद्दूरीरुत्यगर्जति। ३३॥ इत्यक्ताब्र
ह्मणोरूपंब्रह्मताचात्मनःस्वतः। एवंसतिकुतोमेभीरितिविद्वांस्वपायते। ३४। ब्र
ह्मविद्यामृतेनान्यद्भयहेउविनाशरुत् अतोत्रबोधादेवास्यभयंवीर्यायमर्वतः।
३५। कस्मादभैष्यदीशोयंद्वितीयान्नरवलुनद्भयं। द्वितीयोनेश्वरस्यास्तिततोनिर्भयए
वसः। ३६॥ ननुप्रजापतेरैक्यदर्शनंकृतउद्बभौ। नूनंस्वाचार्योदितद्वेतोरमत्वात्तद्
संभवः। ३७॥ यदिजन्मांतराभ्यासंसंस्कारोत्थमिदंतदा। नैरर्थक्यप्रयुक्तिःस्या म
त्सभ्यग्ज्ञानस्यसर्वतः। ३८॥ स्वभ्यस्ताप्यात्मविद्येयंसर्वजन्मनितत्तमः। नाधाद्योद्ये ९६
नवैराजंदेहंस्वीकृत्यवर्त्तते। ३९। उच्यतेमहतापुण्यपुंजपाकेनतत्यदं। वैराजं

लधवांस्तेनज्ञानमस्योद्भवोस्मृतः। ४०॥ ज्ञानमप्रतिषंयस्यवैराग्यंचजगत्पतेः। ऐश्व
र्यं चैवधर्मश्चसहसिद्धमितिस्मृतिः। ४१। सहैवैवसिद्धंचेज्ज्ञानंतन्निवार्यनियंकथं।
उदेतीतिनवक्तव्यं नीतेरूर्ध्वं विबोधनात्। ४२॥ सहसिद्धत्ववचसापरापेक्षा
निवर्त्यते। नजन्मकालएवास्यज्ञानसद्भावउच्यते। ४३॥ आचार्यनिरपेक्षत्वेश
रूषादिरनर्थकृतां। प्राप्नोतिचेत्स्वयंज्ञातवेदानामस्त्वनर्थकः। ४४। मार्जारोरू
पविज्ञानेप्रकाशंनह्यपेक्षते। नापेक्षंतेयोगिनश्चलोचनंचित्तसाधनात्। ४५। एवंय
त्साधनफलंसिद्धंयस्यान्यसाधनात्। तस्यतत्साधनंव्यर्थमितरस्यानुसार्थकं॥
१। नावेदविद्दृहंतंतंमनुतेकश्चिदित्यमौ। श्रुतिर्ब्रह्मात्मविज्ञानेवेदात्प्रत्निषे

तै ॥४७॥ नातोविकल्पतेवेदएकएवात्मवेदने। अन्यानिउविकल्पंतेसाधनानि
र्थायथं ॥४८॥ एवंसतिस्वयंभानवेदलाद्बुद्धवानस्वयं। बोधध्वस्तात्ममोहस्याप्य
रतिःसमजायत ॥४९॥ स्वाभीष्टवस्त्वलाभेनचेतसोयानवस्थितिः। अरतिःसासि
स्वौः सावधलाभादजायत।५०॥ननुविज्ञानविध्वस्तावविद्यायाःकुतोरतिः। ध्व
स्तांधस्यापिसाचेत्स्यादनिर्मोक्षःप्रसज्यते ।५१॥ अरत्युद्भूतिलिंगेननास्तिविद्येति
कल्पतां॥ द्वितीयवैर्यभावस्यबोधाद्धीतिरपैष्यति ।५२। समीचीनापिविद्येयंन्न
कृतानुचितत्वतः। अकालकुसुमानीवनैवप्रीतिकरीसतां।५३। पिंडसृष्टौप्र ९७
वृत्तायांज्ञानस्यावसरोत्रकः। इतिचेदुक्तमेवात्रज्ञानंप्रकरणिवतः।५४। आ

रब्धोपनिषन्सर्वानिंद्यार्थैवतयास्थिति। तद्विद्याक्षेपएवायंमकालकुसुमायते।५५।
पिंडसृष्टेर्निंद्यतयातन्निंदायैनयादिगीः॥ नड्डीतिधस्तिहेनुत्वगिराविद्याप्रशस्यते
५६॥ लोकेपिमहतींनीतिमापन्नाःपरमेश्वरं। हूंफट्शिवाशिवेत्येवंस्मरंति
भयहारिणं।५७। विराजोजगदीशस्यभीतावन्यःपरात्मनः। कोवास्मार्यस्ततोवि
द्यास्वकालेकुसुमायते।५८। नविराजोवैरिशंकानताद्रूपं सर्ववासना। सर्वात्म
कोविराडस्मीत्येवंसर्वमुपासनात्।५९। अथवैरीस्वस्यपिताभक्षणायप्रवर्तितः
तस्ययुक्तोभीतिनाशेद्वितीयस्यात्रसंस्थितिः।६०। अविज्ञातात्मवृत्तांतोदेहनाशा
त्स्वविच्युतिं। मत्वाभीत्याप्रबुद्धोभून्निभीरितिनुयुज्यते।६१। अथुत्पन्नात्मबोधा

।र्मोधिकारसमाप्तिनः। अरन्यादियथादृष्टंतथैवस्मात्प्रजापतेः।६२। अधिकारोय
स्यथावान्शुक्रेभोगेसतावति। क्रतोनमुच्यतेमुक्तिप्रतिबंधस्यसंक्षयात्।६३
मत्यामप्यात्मविद्यायांदोषोनविनिवर्त्तते। तेनदोषेणानुमेयोधिकारोविदुषाम
सौ।६४। विराजोधिक्रुतिःसृष्टेर्यामादेःशास्त्रनिर्मितौ। अस्मदादेर्यथायोगंका
र्यकारणमूढ्यतां।६५। दोषोस्तीत्येवंविधेयंनास्तीत्येवंनशक्यते। वक्तुंनह्यनुमे
यासौदृष्टेर्षाघटबोधवेत्।६६॥ चार्वाकवत्सस्यदेहंपुरुषन्नपिनवैदिकः। व्यतिरिक्ता
त्मविज्ञानविहीनइतिकथ्यते।६७। व्यतिरिक्तात्मबोधस्यशक्यतेनपरोक्षता। अहं
देहीत्यापरोक्ष्यान्मानसंमर्वसंमतं।६८। यथातिरिक्तात्मबोधेप्यरतिः कर्मणीस्य

ते। तथाब्रह्मात्मबोधेपिविदुष्यरतिरीक्षतां।६९॥ नायंदोषः कर्मणिस्याद्बोधात्त्वादि
तिमन्यसे। नोक्तयेवारतिस्तर्हि विदुद्देहेपिनोचिति।७०। अनोक्तचिद्विबोधेनबाधि
ताभोक्तृतेतिचेत् अतिरिक्तात्मबोधेनदेहात्माकिंनबाधितः।७१। बाधितोपियथा
ह्यर्वेवर्त्ततेस्वस्वभावतः। इत्येतत्कर्मिविदुषोः स्वस्थानेसममुत्तरं।७२। देहातिरिक्त
कर्तारंकर्मीजानात्ययंपुनः। कर्तुरप्यधिकंब्रह्मेत्येतावन्मात्रभिन्नता।७३। कर्तात्मा
नंविबुध्यासौकरोतीतिमतंयदि। तर्ह्यकर्त्रात्मबोधेननकरोतीतितत्समं।७४। किं
चक्रुक्तेनबोधोह्यस्वबोधावभासने। शक्तोव्यवृतिर्नश्येत्साधिकारनिवृत्तितः
॥ अरतेरुद्भवेन्नीतिः क्रतोनोद्भवतीतिचेत्। मयेनाधिक्रुतः किंतु सृष्टाविति त

।।ईं ।७६।। नियामकोधिकारोतः क्वापिनातिप्रमंजनं। अतिप्रमंगनीरुः किमधिकारं
।नयछमि।७७ ईश्वरोप्यनुसृत्येवप्राणिकर्मजगत्सृजेत्। नियंतृमानिनस्ते त्वं साम
र्थ्यं वेक्षितोवयं।७८। आत्मक्रीडआत्मरतिरितिश्रुत्यंतरंश्रुतिः। वारयेदितिचेन्न
हिव्यवस्थास्तुस्तुतिर्द्वये ।७९।। प्रबलारब्धविषयंविद्येयमरतेर्वचः। इतरद्वां
निविषयंरत्यंतरनिवारकं।८०। विनापिप्रबलारब्धमविवेकभ्रमार्पिताः। येरागास्ते
विलीयंतेविवेकेननमंशयः।८१। प्रबलारब्धवेगेनकामुकः सन्प्रजापतिः। एकंदेहं
स्वभोगार्थं मसृजन्मिथुनात्मकं।८२। तंद्वेधापातयेद्देहमभूतांदंपतीउभौ। मनुः पु ९७९
मान्वधूर्जेयाशतरूपात्रनामतः।८३। तयोः संभोगतोजाताममुष्यादंपतीपुनः।।

नानादेहानगृह्णीतांताभ्यांद्वंद्वानिजज्ञिरे।८४। गवाश्वरामभाजाविप्रमुख्यार्च्यपिपीलिक
प्राणिनोमिथुनात्मानोजाताः कर्मानुसारतः।८५। मुखबाहूरुपादेभ्योवर्णाश्चत्वारउद्भवः
देवताश्चसृजन्ब्रह्मा चाउर्वर्ण्यनियामिकाः।८६। तत्रेंद्रादीन्निजन्देवान्मन्यंतेयागभू
मिषु। कर्मिण्यन्तदमद्वेयंविराडेवाखिलाद्भवे।८७।। अविद्वदधिकारत्वात्कर्मणांनिज
देवताः। उच्यंताकर्मकांडेनवस्तुतस्तुनतत्त्रया।८८। विराजोजीवतामाहुः केचिद
न्येपरात्मतां। उभयंयुक्तमेवैतद्विवक्षायाविशेषतः।८९। सोपाधिकविवक्षायांजी
वएवविराड्भवेत्। निरुपाधिविवक्षायांपरमात्मैवनेतरः।९०। वयमप्येवमेवेतिय
तततथास्तुतत्। सृष्टाविराड्भोक्तृवर्गभोग्यमन्यमचीकृपत्।९१। सर्वजन्मनि

DR BHAU DAJI LAD MUSEUM

।र्पैः मनु कृत्वासौज्ञानकर्मणी। अमृतानसृजद्देवान्यद्यप्येतन्महाद्भुतं।९२। सृष्ट्वा
।खलमवेक्ष्यदमस्यखिलंजगत्।ईदृशोमहिमाज्ञेयः कृतयोर्ज्ञानकर्मणोः।९३। व
र्णितेत्यंप्रयत्नेनज्ञानकर्मफलोज्झितैः। उपासितुः प्रारब्ध्यर्थं निरस्तार्थमुमुक्षुतः।९४।
९५०।सृष्टैश्वर्येस्वतंत्रत्वंतत्कामीवकुमन्यते। दोषानेवविवेकात्रवकृनुत्प्रेक्षतेधियः
९५। अविद्यापटसंवीतचक्षुषामियदेवहि। वैदिकंसाधनंज्ञेयंज्ञानकर्म स्वभावकं।।
९६।। तच्चकर्त्रीदिमापेक्षंविरं ज्ञातफलप्रदं। जन्मादिविक्रियाषट्कयुक्तंमति
श्चयंजडं।९७।। दुःखानिचविचित्राणिमंत्येतद्वकुजन्मसु। अनेककेशयुक्तेनदु
र्लभंनयमाविना।९८। कथंचिन्नसाधितेप्यस्मिन्परानंदघनंप्रभुं। अंतर्भाव्यविरए

पिंडेस्यातधंहिजुगुप्सिते।९९। नकेवलंपिंडवासस्मादात्मंचानिमानिता। ततोभयं
भरुणायपितुर्मुखविदारणात्।१००। चंडालानांचमेयंभीः किंतुपन्नगजन्मनः। कोभेदः
स्याद्विराङ्जन्मन्पुरगात्पुत्रभक्षिणः।१। कृच्छ्राद्भयेप्रशांतेपिजग्राहीर्ष्यरतिग्रहः। क्रिय
माणेप्रतीकारेगर्दभादिशरीरतां।२। एकयोगेनौमकृजातः क्लेशंसोढुंनशक्नुया
यात्। अनंतयोनिषुमकृजायमानस्यकाकथा।३। निस्तरेद्विद्ययाचेत्किंविवे
कंबंधप्रयासतः। अथविद्यामुपेक्षेथाः किंविद्यांप्रार्थयिष्यसे।४। क्लेशेनमह
तोपास्यबकुयोनिष्वविरूपच। विद्यान्वेषणतः श्रेयइदानीमेववेदनं।५। एवंविचा
रकृच्छ्रस्तूर्णमेवमुमुक्षति। निरस्तःसर्वबाह्यार्थात्प्रमेयंमातुमर्हसि।६।। अधि

शास्त्रसाधितः स्यादेवंफलविचारतः। तेनप्रमानुंयद्योग्यंतदिदानींनिरूप्यते ।७। ननु
शास्त्रंप्रमाणत्वात्प्रमापयतुवस्तुतत्। प्रमानुयोग्यतात्वादौयत्नेनकिमितीर्यते।८
नकर्मशास्त्रंयत्नेनकर्मणोमानयोग्यतां। क्वचिद्भूतेतथामात्रनवक्तव्येतिचेन्न
तत्।९। कर्मशास्त्रव्यवस्थितिर्लौकिकव्यवहारवत्। साध्यसाधनरूपेणप्रमिद्धा
नविलक्षणा।१०। वेदांतप्रतिपाद्यंतुनसाध्यंनापिसाधनं। अलौकिकत्वान्नबु
द्धिर्नैतत्संभावयत्यपि।११। संभावितःप्रतिज्ञायांपक्षः साध्येतहेतुना। इतिन्या
येनतत्रेयमादौसंभाव्यतेश्रुतौ।१२। उपादेयस्यमेयस्यवाक्यात्संभावयेन्नोथा
। हेयसंसारहेतुश्चवक्तव्योयत्नतस्तथा।१३। संसाराख्यमहाव्याधेः किंमूलमि

तिचिंतिते॥ तद्धस्तयेचिकिंस्तेयंतदाफलवतीभवेत्।१४। अविज्ञातनिदानेनभिषजाय
श्चिकित्सितं। तदनर्थकरंयद्वत्प्रकृतेप्यवगम्यतां।१५। मायामूलंद्वैतमेतदित्यज्ञा
तेकथंवदं। अद्वैतंबुद्धिमारोहेत्स्यादतोन्यायतनैवधीः।१६। देहादृष्टक्रियाकर्तृरा
गाद्यासार्थसंसर्गात्। द्वारात्संसारहेतुः स्यादात्माज्ञानंउलोकवत्।१७। आत्माज्ञा
नमनर्थानांमूलंलोकेपिनेतरत्। स्वपराक्रममज्ञात्वायुध्यन्म्रियतएवहि।१८। एवं
स्वात्मानमज्ञात्वासंसारानर्थमाप्नुयात्। अनर्थज्ञानयोः कार्यकारणत्वंप्रपंच्यते
।१९। जिज्ञासितस्यानर्थस्यहेतुः स्यात्सशरीरता। नप्रियाप्रियविच्छेदः सशरीरस्य
चित्।२०। धर्माधर्मौचदेहस्ययोनिरित्यागमोब्रवीत्। विहितंप्रतिषिद्धं च

मूलंतयोरपि। २१॥ कर्तुरेवनवेत्कर्मरागद्वेषावकर्तृता। शोभनाशोभनाध्यासोरा
गद्वेषप्रयोजकौ। २२। उक्ताध्यासोप्यन्यवस्तुसद्भावात्स्यान्नचान्यथा। वस्त्वंतरस्यस
द्भावआत्माज्ञानेनकल्पितः। २३। एवंदेहादिवस्त्वंतमसत्कृत्यविधानतः। संसारा
नर्थहेतुः स्यादात्माज्ञानंजगत्सृजत्। २४। प्रत्यग्याथात्म्यसंमोहाज्जगत्सदिवभास
ते। प्रत्यग्याथात्म्यसंबुद्धौनसत्तन्नामदुच्यते। २५। अन्योषानर्थरूपस्यप्रत्यगा
त्मरूपिणः। ध्वस्तौध्वस्तिरनर्थानामानंदश्चसमाप्यते। २६। निरस्तातिशयानंदरू
पताप्रत्यगात्मनः। योवैभूमात्वसुखंस्यादित्यादिश्रुतिसंमतः। २७। स्वतआनंद २०२
याथात्म्येप्यबोधाद्वःखमंस्मृतिः। सोबोधोनर्थहेतुत्वान्निर्देष्टव्यस्त्विकिंस्तुतं। २८

अबुद्धमात्मनस्तत्वप्रमातुंयोग्यमागमैः॥ निर्देष्टव्यंतदप्यत्रमंभावयितुंमंजसा। २९॥
तमबोधंतत्वमेयमव्याकृतगिराश्रुतिः॥ निरस्तिद्वैततश्रुतिःसाऽन्यायेनात्रविचार्य
ते। ३०॥ तद्वेदंतर्ह्यविस्पष्टमासीदव्याकृतानिधं। इत्येतस्मिन्श्रौतवाक्येयदार्यस्तावदीर्यते। ३१। अज्ञातात्मावशेषेणलीनं ब्रह्मस्वरूपधृक्। तच्छब्देनजगत्प्रोक्तंपरोक्षार्थानिधायिना। ३२। अव्याकृतस्यजगतोभूतकालानिसंगतेः। बुभुत्सुंप्रतिपारोक्ष्यात्तच्छब्दस्तत्रयुज्यते। ३३॥ ऐतिह्यार्थेहनाद्यः स्यात्सुखेनार्थावबुद्धये। तर्केणोक्तोधियः क्लेशःपरमाणवनुमानवत्। ३४॥ अचिंत्याःखलुयेभावास्तांस्तर्केणयोजयेत्प्रतिष्ठिततर्केणगंभीरार्थस्यनिश्चयः। ३५। नामरूपादिविकृतंपराऽज्ञानेनभासि

दृदंत्राह्येननिखिलंजगदेतदुदीर्यते ।३८। सामानाधिकरण्येनतदिदंपदयोः अ
र्थे । कार्यकारणयोरैक्यंव्याकृताव्याकृतात्मनोः ।३९। एकस्मिञ्जगतोवस्थेव्याकृताव्या
कृतात्मिके । अवस्थयोर्विनैदंपिनद्वयीनहिनिष्ठते ।४०। बालयौवनभेदेपिनद्व
यीनहिनिष्ठते । ततोजगदभेदेनसामानाधिकरण्यधीः ।४१। नामरूपाद्यनिर्वक्तुः
शक्तनः कालउच्यते । तदीयेनेत्राह्येनसकालोलोककल्पितः ।४०। यद्यप्यव्या
कृतेकालशक्तिर्नास्तितथाप्यमी ॥ लोकाः प्रलयकालत्वव्यवहारंचकुर्वते ।४१।
जगतोनभिव्यक्तिरव्याकृतगिरोच्यते । नजगत्सागवस्थायांव्यक्तंगर्भस्थपुत्रवत् ।४२ १०३
आसीदितिचमत्तत्त्वमधिष्ठानतयोदितं । तयाचभावरूपत्वाज्जगद्व्याकृतिम

र्हति ॥४३॥ अव्याकृतंचवस्त्वेवमवतार्यास्यवर्णिताः ॥ पदार्थात्रयवाक्यार्थान्या
येनैवनिरूप्यते ।४४॥ नन्वव्याकृतवस्तुत्रवाक्यार्थस्यचलया । प्रमेयत्वंका
रणत्वमित्याकाराद्वुभौमतौ ।४५। आस्तांकारणताकारः प्रमेयत्वंनिरूपय ॥
अज्ञातत्वात्मामेयश्चेन्नाज्ञावस्थानिरूपणात् ॥४६॥ ज्ञानाभावः किमज्ञा
नंकिंअनिर्वाच्यरूपमृत् । आद्येतवापसिद्धांतोद्वितीयेतुनसंमवः ।४७।
अनिर्वाच्यंकिमज्ञानंमीयतेथनमीयते । आद्येमानानिवर्त्यस्यान्नेतरस्तद
सिद्धिदः ।४८॥ अत्रमेयंतदज्ञानंनामतेवानभासते । ज्ञानंचकिंस्वतः सिद्ध
मचैतन्यतोथवा ॥४९। जडस्यनस्वतोभानमात्माप्येतन्नभासयेत् । तद्भा

र्मस्यतन्नांगादृगत्वंविहन्यते ।५०॥ विधूताशेषसंबंधमनन्मानुभवात्मकं।कू
टस्थसंविन्मात्रैकंब्रह्मात्मेतिमतंतव ।५१। स्वतोवबुद्धंतद्यस्मान्निरविद्यमतः
सदा ।संगतिर्निरविद्यस्यनाविद्याजनितैर्मलैः ।५२। नातोसंगेनभातंतद
भातंउनसिध्यति। नैष्फल्याच्चतदज्ञानंनैवकल्प्यंचिदात्मनि ।५३। अतिरोभू
तसंवित्कःसदानस्तमहोदयः। निःसामान्यविशेषोयंतत्राज्ञानेनकिंफलं।
५४॥ अत्रोच्यतेकिमज्ञानेविचारासहनोच्यते ॥किंवास्वानुभवाभावआद्यः सि
द्धांतएवमे ।५५। अविचारितसंसिद्धमविद्यांब्रूमआत्मनि॥स्वभावयतिरे
काभ्यांध्वांतसिद्धेरसंभवात् ।५६॥ नचिदात्मस्वभावःस्यादविद्याजाड्यरूपतः

नापिचात्मानिरेकेणास्वतःसिध्यतिजाड्यतः ।५७॥ नद्वितीयोयतःस्वात्मन्यविद्यैषा
नुभूयते॥ स्वानुभूतिर्नवेद्मीतिदृष्टाप्रागेकबोधतः ।५८॥ विधूताशेषसंबंधमि
त्यादियदुदीरितं । तत्तथैवास्तुवैम्यत्रनासंगीविवदामहे ।५९।निरविद्योप्यसं
गोयमज्ञातःस्यात्स्वभावतः । तमोदृष्टमभावेपेदृग्वैवनतुवदृष्टतः ।६०। या
दृग्रक्तनिमर्यादानतादृक्स्यात्तमस्यमौ । दृश्यतेस्वशिरश्छेदोनिद्राणेनतम
सिना ।६१। वस्तुमर्यादयास्वात्मानिरविद्योपिसन्नसौ । तमोमर्यादयाकस्मात्
सविद्योनभविष्यति ।६२। मर्यादयोर्यदि ज्ञातुंनियामकमिहेच्छसि । द्वयं
काभिन्नयोस्तर्हि नीरादौतदुदीर्यतां ।६३॥ तादृक्स्वभावनेदृश्येत्समोसौ

ब्रह्ममायये।ः॥स्वभाववादापत्तिश्चममानेवावयोर्द्वयो।ः।६४॥अनुभूत्यासमा
धानमुभयोरपितत्समं॥एवंचयुक्तिहीनत्वंकिंचनशक्यते।६५॥वस्तु
स्वभावानुभवावनुसृत्योपपाद्यते।यन्मतंयुक्तियुक्तंतद्ब्रह्मवादश्चतादृशः
।६६॥तर्हिस्वभाववादोयंक्रतोदिभ्रेर्निषिध्यते।धर्माधर्मस्वभावस्यलंघना
दितिविद्विभो।६७॥स्वभावोलौकिकोयद्वद्वैदिकोपितथायदि।चार्वाके
णाभ्युपेतःस्यान्नासौदूष्यस्तथासति।६८॥ब्रह्मणोनिरविद्यत्वस्वभावस्त्व
नुभूयते॥ज्ञातात्मतत्वोजानातित्रिकालंनिरविद्यतां।६९॥अविद्यायाःस्व
भावश्चब्रह्मावरणलक्षणः।अनुभूयतएवेहप्राक्तैरखिलैर्जनैः।७०॥

अतएवनवैफल्यमविद्यायाश्चिदात्मनि।अतिरोभूतमंवित्वादिकंतत्वविदांदृग्
७१॥इत्थमात्मास्वतोऽसंगोप्यविज्ञातोनुभूतितः॥सिद्धोस्यार्थस्यदार्ढ्यार्थम
नुभूतिःपरीक्ष्यते।७२॥ननुकैषानुभूतिःस्याद्याविद्यायाःप्रमाधिकाः॥
किंमानजन्याधीरुतिश्चिदात्मावाथचेतरः।७३॥नाद्योनामाद्यनिष्क्रांते
राग्धीहेत्वेरसंभवात्॥उर्ध्वंचमनहेयत्वान्नमानेनप्रमीयते।७४॥किंचमा
त्राद्युपादानेकथंमानंप्रवर्त्तते।अव्याकृतोक्तेरुक्तत्वाद्ब्रह्मविद्यायांक्रतोमि
तिः॥७५॥अथाक्रतमविज्ञातंप्रमाणाविषयंविदुः॥प्रमाणानभिसंबंधंप्र
माणज्ञेतिसाहसं।७६॥प्रमात्रादिनिषेधेनपदव्याकृतमुच्यते।तस्यमाना

ORIENTAL RESEARCH INSTITUTE DEHAU DAV

निसंबंधोनबालेनापिशक्यते ।७७॥ तद्वेदमित्यनेनापिवाक्येनाव्याकृतंनहि॥
प्रमीयतेकिंतुतत्वबोधायैतदनूद्यते ।७८॥ नद्वितीयश्चिदात्मायमविकारी
वनमाधयेत्॥ नतृतीयोबुद्धिविभ्रांकोवान्योनुनयोभवेत् ।७९॥ अत्रोच्य
तेचिदात्मायमविकार्यपिभासयेत्॥ नविक्रियंतेसूर्याद्याजगतोस्या
वभासने ।८०॥ स्वरूपमात्रेणयोन्यस्योपकरोत्यसौ॥ नविक्रियत
एवात्रप्रयत्नानुपयोगतः । ८१। यथाप्रमात्रमाभासरागादीनामदोषतः
।स्वार्थानन्यप्रमाणत्वात् प्रसिद्धिस्तमसस्तथा । ८२॥ नमानानिस्वतो
भांतिजडत्वान्नपरस्परं । भासयंतिइत्थक्कालवर्त्तित्वात्भांत्यतोन्यतः

८३॥ संदेहमिथ्याज्ञानाख्यौप्रमाभासौनमानतः । भातोमाननिवर्त्यत्वादतोन्य
द्भ्रामकंतयोः ।८४॥ धीवृत्तिरूपारागाद्याःप्रमीयंतेनमर्मत्वतः । वृत्तिह
यस्पयुगपद्भावाद्भांत्यतोन्यतः ।८५॥ तच्चान्यत्स्वार्थमेवस्यान्नोचे
न्मेयत्वमापतेत्॥ मेयत्वैचानवस्थास्यादतःस्वार्थमनन्यगं ।८६॥ तमसोमा
नमेयत्वंदूषितंपूर्वपक्षिणा । भातिचेत्तत्तमस्तस्मात्साक्षिणैवविभातितत्
८७। तस्मादात्मानमाश्रित्यस्वतःसिद्धमनन्यगं । भावाभावात्मकंविश्वं सर्वमेत
त्प्रसिध्यति ।८८। नहिसंविदनारूढःप्रमात्रादिःप्रसिध्यति । संविन्मात्रैकया
ह्यात्मान्यत्रमात्रादेरनात्मनः ।८९। प्रमात्रादिवियुक्तेषासंवित् कृत्वानुभूय

तं। इतिचेन्नसुप्तिकालेमा विस्मृष्टमवभासते।९७॥ प्रत्यक्षत्वंभवत्साक्षात्सु
षुप्तेनन्यबोधनं। आत्माह्यात्मानमैकात्म्यादात्मनावेत्यकारकः।९१। न
चावस्थांतरेणात्मानविविक्तोनुभूयते। अज्ञानसंशयादीनांप्रबुद्धेनानवेक्षण
त्।९२॥ प्रत्यक्प्रणवयादृष्ट्याजायत्स्वप्नसुषुप्तिषु॥ नैवाज्ञानंमृषाज्ञानंसं
शयज्ञानमीक्षते।९३। पराक्प्रणवयादृष्ट्याविमूढोमोहमात्मनि। स्वका
र्ष्यवत्कल्पयतुविद्वद्दृष्टेः किमागतं।९४॥१९०। विदुषोविदुषश्चापि सु
प्तावज्ञानमात्मनि। अस्मृत्यानेपरामर्शादितिचेन्नैतदिष्यते।९५। नसुषुप्त १०७
गंमोहस्य नाज्ञासिषमितिस्मृतिः॥ अनतीतात्मगत्वेन मोहेस्मिन्स्मृत्य

ते

संभवात्।९६॥ नभूतंकालमप्रत्यङ्नचागामिस्यणिष्यते।९ अन्यथावर्त्तमा
नेस्मिन्काले प्रत्यङ्नसंभवेत्।९८। तस्मात्तिसृष्ववस्थासुकालभ्रमवतीष
जः॥ अविलुप्तस्वप्रकाशादृगात्मानंमहेक्षते।९९। यथाकालनिदांप्रत्यक्
कराहेणापिनेक्षते। एवंदेशविभेदोपिनप्रतीच्युपपद्यते।२००। देशाभ्रम
युताः सर्वे देहाद्याः पारतंत्र्यतः। स्वतंत्रंप्रत्यगात्मानंदेशत्वेन समाश्रिताः।१।
य त्तत्त्वंम्यादृहस्तुनतत्तदितिवर्त्तते। नाज्ञानात्रज्जुतः सर्पोरज्जुमुल्लंघ्यवर्त्तते
२॥ तस्मान्नानाशरीरेषुस्वन्योन्यव्यतिचारिषु। प्रत्यक्चैतन्यमेवैकंसर्वत्राव्य
भिचारवत्।३॥ सर्वधीविक्रियासाक्षिण्येवंसिद्धेस्वतोदृशो। कार्यंयेनुभवंप्रा

ङ्कस्तावार्यीःश्रुतियुक्तिनिः।४। नजायतेऽजइत्यादिविज्ञानघनइत्यपि। कृत्स्नपुंवि
क्रियोस्तारिवाक्यंकस्मादुपेक्ष्यते।५। प्रमात्राद्युच्छितेः सर्वंकारकंदुर्लभंचितः
कारकव्याप्तिस्तत्रनिपुणेनापिनेक्ष्यते।६। भवताप्यभ्युपेतंयतश्चसानु भूति
तः ॥ तस्मादजायमानाविज्ञायमानेवलक्ष्यते।७। प्रमेयेचक्रियायांचप्रमा
णेचप्रमातरि। संबद्धतदुपाधित्वाज्जायमानेवविद्ध्वेत्।८। तद्धिनाशेपिसा
क्षित्वाद्धिनष्टंतीवलक्ष्यते। यतोतःकार्यतांतस्याश्चेश्वरोपिप्रसाधयेत्।९॥
कार्यत्वेत्यागभावोस्यावक्तव्यःसनयुज्यते। अशेषाभावसाक्षित्वात्त्यागभावो १०८
नसंविदः।१०॥ तस्याश्चेत्त्यागभावः स्यात् सिध्येन्निः साधकः कथं। प्रध्वंसा

भावोप्येवंतस्मान्नित्यैवविद्ध्वेत्॥११॥ स्वात्मसाक्षिकतांमुक्त्वाभावाभावाद्यव
स्तुनः। यतोसिद्धिरतःप्रत्यक्निरस्तासिलविक्रियः।१२। याविद्यायाः साधिका
स्यात् सानुभूतिः परीक्षिता। यानुभूत्यासाध्यमानासाविद्यायपरीक्ष्यते।१३। न
चविद्यास्वतोबुद्धेनकथंचनसंभवेत्॥ विरोधादविरोधेनुकेनसैषानिवर्त्यते
१४॥ नतन्निवर्त्तकंमानंतत्कार्यत्वाद्घटादिवत्। विद्योगान्नाशकंनचेद्विद्येवा
नुनिवर्त्तिका।१५। असंभवेत्वविद्यायास्तत्कार्यासंस्मृतिः कुतः। तदभावेमेय
चिंताकाकदंतपरीक्षणं।१६। उच्यतेकिंतमस्येवंचोदयेदुतत्तत्ववित्। नाद्यो
मूढस्यचोद्यार्थमीदृग्युत्पत्त्यसंभवात्।१७। स्वतोबुद्धेऽनोविद्यानाशेतेसंस्म

तिः कृतः। इतिबुद्धात्मतत्वस्यगीरियंनतमस्विनः।१८। अनुक्तोपालंभनेस्यात्तत्व ज्ञ
स्यात्रचोदने। ततंप्रतिवयंतत्त्वपरीक्षामारभामहे।१९। तमस्विनंप्रतिश्लेषापरीक्षा
तस्यदृष्टितः। स्वप्नकारणाद्यप्रसिद्धंतम मातदपह्नुतेः।२०। यथोच्छिन्नात्ममोहो
यंगुर्वादीनपिनिह्नुते। तथातमस्वीबोधात्मागैकात्म्यमपिनिह्नुते।२१। काकोलू
कनिरोवायं मंमारोज्ञात्मनेदिनोः। यानिशामर्वभूतानामित्यवोचत्स्वयंहरिः
२२। मत्येवतत्त्वेव्युत्पत्तेः प्राङ्मोहादीप्सतेयतः। तस्मान्नवस्तुतस्तत्वं तच्छ्रुताद्यपनोद
कृत्।२३। प्रमाणरूढतांलब्धाहंत्यविद्याद्यदोषतः। ब्रह्मविद्भिरतोयत्नात्प्रमाण २०९
मिहसंश्रितं।२४। तृणादेर्भास्मिकाप्येषामूर्यदीप्तिस्तृणंदहेत्। सूर्यकांतमुपारु

ह्यतन्न्यायंचितियोजयेत्।२५। नैतावताप्रमाणस्यप्राधान्यमिहशंक्यते॥ विषय
स्यमहिम्नैवप्रमाणानांप्रमाणता।२६। अविधितात्मयाथात्म्यमुल्लेखनसंश्र
यात्। तन्मानमत्रमानत्वंलक्षणेनतुकेवलं।२७। चिन्मात्रमेव याथात्म्यंप्रत्यगात्म
त्वकारणात्। परात्त्विवननेदोस्तिमात्रादेः प्रत्यगात्मनि।२८। कूटस्थोपिस्वतः प्रत्य
क्परात्मवद्भुतार्थयं। स्वविदानासवन्मोहयोगादाप्नोतिमातृतां।२९। चिन्मात्रस्यै
ववस्तुत्वेप्यनाद्यज्ञानमात्मनि। प्रथतेस्वात्मचैतन्यात्स्वरूपेणविरोधतः।३०॥
कार्यकारणरूपाभ्यामतथाविधतत्त्विका। आत्माविद्यैवसर्वत्रप्रथतेस्वात्मसाक्षि
का।३१। मयाध्यक्षेणप्रकृतिःसूयतेसचराचरं। हेम इतिमुरेरस्यवाक्यमेवं

श्री

समंजसं।३२॥अविद्यावाप्यतत्कार्यैननेदान्नाप्यनेदतः।निरूप्यतेयतोतःस्यादवि
चारितसिद्धिकं।३३।स्वमहिम्नानसंसिध्येज्जडत्वान्नात्मनःपृथक्।अतएवजड
त्वान्नचिदनेदंममर्हति।३४।जडस्वभावान्नैवान्यद्रूपंकार्येषुगम्यते।तमश्चिद्वि
नातत्वान्नाज्ञमतिवर्त्तते।३५।यथानीलोत्पलाभंरंद्विरेफोदरवत्तमः।अवि
चारितसिध्येवंतमस्तज्ज्ञंचवीक्षितां।३६॥स्वानुभूत्याभासितत्वान्नाविद्याखरशृंग
वत्॥विचारबाधितत्वेननाप्यविद्याचिदात्मवत्।३७।अनुभूतावविद्यायावि
वादोनैवकस्यचित्नवेद्मीतिव्यवहृतेसांगनाबालपंडितं।३८।प्रमात्रादि
विविक्तार्थमनुभूयोत्थितस्ततः॥नावेदिषमितिग्राहस्वानुभूत्यनुमारतः॥

३९।प्रमात्राद्युल्लिखेतेःस्यैवंचिदन्यानन्वयात्तमः।चैतन्येनैवतद्भास्यंनतुमानेनकेनचि
त्।४०॥क्वासीदृशंतमोनूनंमयज्ञातमलक्षणं।इतिस्मृत्यानतन्मेयमनुभूतंत्व
नूद्यते।४१।सुप्तिस्मृतिर्यथास्माकमनायासेनसिध्यति।अनायासात्तथासि
द्धेन्मतादेःप्रलयस्मृतिः।४२।नमानात्सिध्यतीलोकेज्ञातताज्ञाततेक्वापि।मूलावि
द्यानप्रमेयत्वेवंवक्तव्यमत्रकिं।४३।स्वज्ञातत्वंनमानेभ्योज्ञातत्वंतत्कृतंयतः।तैर
प्यज्ञाततावेत्स्यात्कांतिश्रीतिर्मितेर्भवेत्।४४।ज्ञातत्वमपिमानेनक्रियतेनतु
मीयते।ज्ञातत्वंमानतःसर्वमानात्नमीयतेकथं।४५।ज्ञातोयमर्थोऽज्ञातोवेत्मे
तन्मात्रसवनासयेत्।ज्ञानाज्ञानेऽपितथाभास्येतेमात्क्षिणोवहि।४६।प्रथतेयःस्व

DR BHAU DAJI

यंमाज्ञादज्ञातत्वाद्धिक्रमिषु। अप्रमेयंस्वयंज्योतिःप्राक्प्रसिद्धेः प्रमाणतः।४३। स्व
यंप्रकाशतत्वोपिस्वाविद्यायाः प्रमाणतः। अनिवृत्तेरविज्ञातः सप्रमाणमपेक्षते॥
४८। असाधारणमज्ञानंप्रतीत्येवयतःस्थितं। ततोयमेवाज्ञातत्वान्मानमेयोनचे
तरः।४९। अज्ञानकार्यमखिलंनतस्याज्ञातताभवेत्। नखड्गधारायाखड्गेनप्रहृता
ऊत्रविद्ध्येत्।५०। अज्ञातआत्मायःसर्वसंग्रहेणोपपादितः॥विदविद्यापरीक्ष्या
भ्यांसएवेत्यंप्रपंचितः।५१। अज्ञानाद्यत्तचैतन्यंप्रमेयमितिसाधितं। परवादि
प्रमेयंयत्तदिदानींनिरूप्यते।५२। अविज्ञाताथगंतृणिप्रमाणानीतिवादिनां। स
र्वेषांसंमतिस्तत्रप्रमेयोर्थोविचार्यते॥५३॥ ज्ञातोयमर्थोऽज्ञातोवाज्ञाताज्ञाता

त्मकोथवा। यदिवानुभयात्मायंचनुर्धापिनयुज्यते।५४। आद्येज्ञातत्वमर्थस्यनना
वबलसंविदः। अनभ्युपगमान्नापिप्रमाणोद्भवकल्पतः।५५। ज्ञातत्वमादौसंपाद्य
ज्ञातमर्थंप्रमापयत्। मानंनवकल्पस्यप्रयासमतिवर्त्तते।५६॥ स्वतएवप्रमेयो
र्थोयदिज्ञातस्तथापिच। अनन्यायत्तसंसिद्धेर्मेयत्वंकिंनबंधनं।५७। नहिदीपां
तराद्दीपोनामरूपत्वंप्रपद्यते। तद्वत्स्वतोज्ञातघटोमानेननहिमीयते।५८। अथा
ज्ञातोघटाद्यर्थस्तथाप्यज्ञाततोक्तः। स्वतोवापरतोवास्याःस्वतस्त्वेद्ध्यासेकथं
५९। नहिमृन्मयतावाध्याघटस्याज्ञाततातथा। किंचाज्ञातेकल्पितंस्यान्ज्ञातत्वं
रज्जुसर्पवत्।६०। नचयद्धास्तवंरूपंतदध्यासेनबाध्यते। रज्जुसर्पधियालोकेनर

कुशिनिधीकुतिः।६१॥ परतोपिकुतोन्वेतदज्ञातत्वंघटेभवेत्। अनिर्वाच्याज्ञा
नतोवाज्ञानाभावादुतेर्यतां।६२॥ आद्येतवापसिद्धांतोद्वितीयेकूर्मलोमवत्॥
अज्ञातत्वंचैवमज्ञेतनद्यभावात्ततोजनिः।६३॥ यदात्यंताभावरूपमज्ञातत्वंत
दातव। सर्वज्ञतैवयस्यस्यान्नवस्त्वज्ञानमस्तिहि।६४॥ साध्यभावतश्चेदगज्ञात
त्वंनसिध्यति। नचमानात्प्रसिद्धिः स्यात्कूर्मादिवस्तुनः।६५॥ ज्ञाताज्ञानोभ
यात्मत्वंपर्यायेणैकदायवा॥ पर्यायेनुगतंवस्तुननयोर्वस्तुपर्वता।६६। नदेव
दत्तस्यात्मानौक्रमभाविगमागमौ। ज्ञातताज्ञाततेतद्वज्जनतोनघटात्मनां।६७
शीतोष्णवद्विरुद्धत्वाद्योगपद्यंनयुज्यते। नापिचानुभयात्मत्वंविविक्तस्या

नुदाहृतेः।६८। ज्ञाततज्ञाततेत्यत्रकाघटमात्रंत्वयाक्वचा। उदाहृत्येतावगतएव
स्यात्तदुदाहृतौ॥६९॥ ज्ञाततज्ञाततेयस्यमतयोरनुगछति। व्यावृत्ताभ्यांविनि
श्चायमितिचेत्तत्रकाप्रमा।७०। सर्वावभासकःसाक्षीत्वयावेदविरोधिना। उपेक्षि
तोन्यःकोनामतत्सर्वंतवभासयेत्।७१। चतुर्विधविकल्पानामभावेप्यनिरूपि
तः॥ यद्यज्ञातः तदावश्यंभवेन्मेमतमेवते।७२। सर्वथानतवाज्ञानंप्रमाणेन
प्रसिध्यति। अज्ञानंनयथामानान्मिथ्याधीसंज्ञयौतया।७३॥ घत्यक्षादिप्रमाणा
नामज्ञानादिप्रसिद्धये। नेहतेन्यतमंज्ञानंस्वप्रकाशंनवर्तते।७४। विषयेंद्रिय
संबंधविग्रहाद्वाद्यमद्रजं। नास्तीदुःखादिधीवत्स्यात्प्रत्यक्षंनापिमानसं।७५

ज्ञानाभावाख्यमज्ञानंमानसेसतितत्कथं। अथयोगपद्यात्स्वत्वहंसंज्ञायादेर्नभात्मकं॥
७६। नज्ञानयौगपद्यत्वन्मतेस्तियुगपत्कथं। ग्राह्यग्राहकविज्ञानेस्यातांसंज्ञायमा
नसे।७७॥ प्रत्यक्षार्थवदे वेदमज्ञानाद्यनुभूयते। नाशक्यतेनुमानादिपतः परैरस्
बोधकं।७८। मिथ्याज्ञानादिसंसिद्धौकउपायइतीर्यतां। दृतिचेच्छरणंगच्छसा
क्षिणंसर्वभासकं।७९॥ यथेहघटविज्ञाने घटाकारोनुभूयते॥ तिश्चदःसाक्षि
णास्तद्वदज्ञानाद्यनुभूयते।८०॥ इत्थंसाधनदोषाभ्यांस्वपक्षपरपक्षयोः॥
अमेयंसाधितंतत्स्यजगत्कारणतोच्यते।८१। कार्यकारणभावोयंशास्त्रयुक्ति १२३
परीक्षणे। अविचारितरम्यःसन्भासनेननुवास्तवः।८२॥ नासतोविद्यते

भावोनाभावोविद्यतेसतः। इतिवास्तवजन्मादिशास्त्रेणैवनिराकृतं।८३। युक्ति
श्चान्योन्यसापेक्षाकार्यकारणतेत्यसौ। इषालमाद्यनयोरेकस्याप्यनपेक्षता। न१
८४। नाऊर्वंकारणंदृष्टंकार्यापेक्षातनोभवेत्। कार्यंनाक्रियमाणंस्यात्कार
णापेक्षत्तातनः।८५। अविचारितरम्यस्यैदज्ञातात्मैकहेतुकः। स्यात्स्वप्नस्यतथा
३५ दृष्टाह्यज्ञातात्मैकहेतुता।८६। अज्ञातात्मातिरेकेण ब्रुवतोजगतोजनिं। सम्यक
ज्ञानान्नमुक्तिःस्यान्नज्ञानंवस्तुनुत्क्वचित्।८७॥ कर्मभ्योपिनमुक्तिःस्यात्कर्मापि
हिनवस्तुनुत्। ततोज्ञानेनमुक्त्यर्थमज्ञातात्मैकहेतुना।८८। प्रथतेवैश्वरूपेण
यस्याविद्येवभर्वदा। तन्मतेनुपपत्तिःकानोपालभ्योभ्रमःक्वचित्।८९। वस्तुदृत्त

मपेक्षैतन्नसतः परतस्तमः। तज्ज्ञवातस्तमोदृष्यातमस्तत्कार्ययोर्वचः। ९७ तम
श्चिदाभासयुतंनाज्ञानमिषमितीक्षणात्। जगज्ज्ञनिस्थितिलयास्तस्मादज्ञात्तज्ज्ञात्म
नि। ९८। तमः प्रधानंहेत्वाणंचित्प्रधानश्चिदात्मनां। परः कारणतामेतिजडा
जडमिदाततः। ९९। तत्तत्प्राणिकृतैस्तैस्तैर्भावनाज्ञानकर्मभिः। देवतिर्यङ्मनुर
ष्यादिवैचित्र्यमुपपद्यते। ९२। तत्तज्ज्ञात्युदितेश्लिष्येद्भूयोभ्यासेनवासना।कौ
शलातिशयाख्याया भावनैत्युच्यतेहिसा। ९४। १३०० ज्ञशास्त्राभ्यासोपासना
दि ज्ञानमित्यभिधीयते॥विहितंप्रतिषिद्धंचकर्मयैश्चिज्जन्मना। ९५। यद्या ११४
कृतगतंकिंचिद्भावनादिसमीरणे। तद व्याकृतरूपेणस्थितंव्यज्येतसृष्टये॥

९६॥ तद्यत्कौतमएवात्रनिमित्तंलोकदृष्टितः। लोके कार्यविशेषाणांतमएवनि
यामकं। ९७॥ तैलज्ञाक्तिस्तिलेकस्माद्धिज्ञाक्ति कुतोनहि॥ इतिएष्टोनज्ञाना
भीत्येवंप्रत्युत्तरंवदेत्। ९८। तन्नियामकमज्ञानमितितेनोदितंभवेत्। एष्टुश्च
तावतातत्रगल्लत्येवपिएछिषा। ९९॥ वक्तुनाकौशलंशक्यं ऋज्वालैश्चैवमी
रणात्। अन्यथाकुशलंमन्यस्त्वमेवात्रोत्तरंवद। १००। सर्वेषामविवादेनप्रश्नोत्तर
तयावचः। यद्हिभातिनतद्भ्रांतंकिंतुवस्तुनथैवतत्। १। प्रश्नविश्रांतिभूमित्वा
च्चोद्यंतमभिनोदियात्। नबुद्धिमंतः एछंतिनजानामीतिवादिनं। २। एछंत्य
ज्ञमितिचेद्वादंनविवदामहे। चोद्यानर्हत्वमज्ञानेनावतावारितं कथं। ३

DEHAU DAU

त्रवेदनीयमज्ञानंदुर्घटंतन्नियामकं। इतिलौकिकदृष्टांतासिद्धंवेदविदांमतं
ध। एवंतर्हिनजानामीत्येवंसर्वत्रनएषतां किंस्रष्युक्तिश्रमेणेतिवक्तिचेदुत्त
रंशृण।५॥ साक्षान्नियामकंयत्नतमस्तत्रैवतद्भवे। अन्यद्वाशनियमनेवक्तव्यं
द्वारमत्रतत्।६॥परमाणुर्मूलहेतुरित्येवंद्यणुकादिकं। नमोच्यतेयथातद्व
द्दियस्रष्टिंतमःस्मृतौ।७॥ तमोनियामकंचेत्तत्किमंतर्यामिणेतिचेत्। अंतर्यो
मित्वशक्तिर्यासैवैतत्तमउच्यते।८॥ ईशान्नमःप्रधानःसन्नियम्यानांनियामकः
तेष्वेवचित्प्रधानःसन्मुक्तांप्रतिपद्यते।९॥तमोनियमिताःकर्मभावनाद्या
स्तमस्विनः। जीवंवध्नंतिनोमुक्तं कारणानतिवर्तनः।१०। यथाकार्योघटः कोपि

त्र

मृत्तिकांनातिवर्त्तते। तमंकार्यभावनादिनातिक्रामेत्तमस्तथा।११।जलौकाद्रणा
गारक्तं दुष्टमेवविवेचयेत्। तद्यात्मगतकर्मादिलक्षात्मानंविचिंतयेत्।१२।स
कर्तुरुपभोगार्थंकर्माव्याकृतरूपकं व्यक्तीभवत्प्रयुंक्तेतद्भूतभौतिकदेह
गत्।१३। अव्यक्तजगतोव्यक्तिरंतर्यामिप्रभावतः।।भवंतीदेशकालादिव्यवस्था
प्रतिपद्यते।१४। यद्यनियमयत्येषतथाभवतितज्जगत्।।नियंतासर्वजगतो
नान्यःसंभाव्यतेप्रभोः।१५। नचौपाल्लभुमस्माभिःशक्यतेपरमेश्वरः। अतोवि
मुच्यचेद्येनिश्रूयतांमहिमेश्वरः।१६॥ अंतर्यामीयदाकर्मनोद्बोधमतिसं
हृतिः। तदाभवेद्यदोद्बोधंकुर्यात्सृष्टिंतदाभवेत्।१७। अस्यहैतेंद्रजालस्य

यदुपादानकारणं। अज्ञानंतदुपाश्रित्यब्रह्मकारणमुच्यते।२८। तादृशोब्रह्म
णोकस्मात्कर्मोद्भोधोपसंहृती॥ निर्निमित्तेतथैवेयात्कर्मोद्भोधोपसंहृती॥
२९॥ उत्थास्यामिमुहूर्तेहं ब्राह्म इत्यभिसंदधत्। शयानोनियमेनैवतदोत्ति
ष्ठेत्तथेत्सतां।३०॥ संदधन्निभिसंधत्तेदृयतांसंहृतेस्ततः। तावत्याःसंहृतेरंते
भिस्तद्बोदेतिसत्वरं।३१॥ अज्ञानमात्रोपहितंब्रह्माकारणस्यकारणं। आका
शोपहितंवायोर्वायूपहितमग्निषः।३२। अग्निनोपहितंचापांजलेनोपहितं
भुवः। एवमुत्तरकार्येषुततःसर्वंहृदुच्यते।३३। कार्यकारणरूपेणास्थितंय ११६
ज्जगदीरितं। आतंप्रोतंतदीशेस्मिन्कार्पासेतंतुवस्त्रवत्।३४। प्रतिबिंब

तयाकार्येधीशोनानात्वमाव्रजेत्। सोऽरष्टेतोयधारासुप्रतिबिंबैर्यथारविः३५॥
अपास्ताज्ञानईशोमावस्थूलाद्युक्तिगोचरः। आभासाज्ञानयुक्तःसन्मायांतर्यो
मितांव्रजेत्।३६। हिरण्यगर्भोबुद्धिस्थोरजःसत्वतमोगुणैः। ब्रह्मादिरिःपिना
कीस्याद्देवंमर्त्यादयस्तथा।३७। तत्तत्तोपाधिजन्मैवंजन्मात्मनइहोच्यते। अ
जनेर्वियतोजन्मयथाकुंभादिजन्मना।३८। असाधारणरूपैवमृत्त्वकार्येब
हुत्वतः। सामान्यरूपतामेतिस्वकार्ये धीश्वरस्तथा॥३९। अव्याहतानुगत
मपिब्रह्मतमोवशात् व्याहतानुगतात्मत्वमिंद्राभमिवेक्षते।४०॥ अनादि
तत्तमोह्येयंतज्ञकालाद्यनाप्नुते॥ आगंनुवेदिहाज्ञानमनिर्मोक्षःप्रसज्यते॥

२१॥नचानादेरनुच्छित्तिरनाद्यज्ञाननाशने। मानानांमानतांसर्वत्रास्त्रमंतिहिवा
दिनः।२२। मंतरैः सर्वमज्ञातंवस्तुमेयमितीर्यते। यद्वस्तुबोधादज्ञानानाद्यंक
मानमुच्यते।२३। उक्ताज्ञानप्रधानत्वेकार्यकारणताचितः॥चित्साधान्यविव
क्षायांकार्यकारणमाह्विता।२४॥ साक्षेत्रज्ञानतत्कार्ये अपेक्ष्यभ्रांतबुद्धिभिः
कूटस्थोनिर्दृयोप्यात्मासाक्षीत्यध्यस्यतेजनैः।२५॥ मोहतत्कार्यनीडंयत्कू
टस्थाभासरूपकं। ज्ञानेनतद्विनाभूतःपरःसाक्षीतिगण्यते।२६। कूटस्थस्य
नसाक्षित्वंद्वितीयासंगतेर्भवेत्॥ नास्तिनोपिनसाक्षित्वंसाक्षेणाव्यतिरेकतः। ११७
२७॥ अज्ञानमात्रहेतौतुसर्वमेतत्समंजसं। कर्त्रीलाद्यन्यथाज्ञानहेतुत्वात्तस्य

चात्मनि।२८। नचाज्ञानस्यवस्तुत्वंनाकर्तेरंकिंतुबुधैः। तेनसाक्षित्वकर्तृत्व
भोक्तृत्वादेरवस्तुता।२९। ज्योतिषामपितज्ज्योतिरग्नेर्दीपरिमोषणात्। तमोरू
पमिवाज्ञातिज्ञानुर्नक्तंदृशामिव।३०। आत्मात्मत्वसंबंधआत्मात्माज्ञानयो
र्मतः। ईशादिविषयांतंयंतद्विद्याविद्मिंतं।३१। मायांतुप्रकृतिंविद्यान्मा
यिनंतुमहेश्वरं॥इतिवेदशिरःस्मृतिरुक्तार्थेयुज्यतेस्फुटं।३२। दैवीह्येषागु
णमयीमममायेतिचस्मृतिः॥ वैष्णवीखल्वियंमायेत्येवं लोकेच
गीयते।३३॥ इत्यमव्याकृतस्यास्यजगत्कारणतोदिता। प्रमेयत्वंसर्वमु
क्तं द्वैविध्यंतत्रमुस्थितं।३४। चित्साधान्यंप्रमेयत्वेहेतुत्वेमोहमुख्यता। मे

यलात्तदुपादेयंहेयंतत्कारणत्वतः । ४५॥ तस्मिन्नव्याकृतेब्रह्मभागः शास्त्रेणमी
यते । मोहभागोनर्थमूलंब्रह्मबोधेनबाध्यते ।४६॥ यतोविभेतिभूतानिसंसारा
स्यादनर्थतः । तन्मूलंमोहइत्युक्तेस्यादुछेद्यत्वसंभवः ।४७॥ आगन्तावद्व
ग्घोरादुतिश्चलातिविह्वलः । स्वप्नप्रलापतांज्ञात्वाभवेत्स्वस्थोयथातथा॥
४८॥ महाभ्रमसंसारदुश्छेदत्वशंकया । विह्वलोमूलशैथिल्यंज्ञात्वोछेदेप्र
वर्त्तते ।४९॥ स्वात्मैवमेयइत्युक्तेबोधसौलभ्यसंभवात् । नवेदमिमुखायत्नाद्ब्र
ह्मव्याकृतंततः ।५०॥ इत्यव्याकृतवाक्यार्थोन्यायेनमुनिरूपितः । अथव्या १२८
कृतवाक्यार्थः क्रमप्राप्तोनिरूप्यते ।५१॥ व्याकृतंहिविधंदेहसृष्टिर्दृश्य

वेशनं । देहादिविषयत्वेनप्रवेशात्सर्वमुच्यते ।५२॥ अव्याकृतंयत्पुरोक्तमनामकम
रूपकं । तदिदंनामरूपाभ्यामेवव्याक्रियतेस्वयं ।५३॥ सुषुप्तादुत्थितोराज्ञः
स्वयमेवयथातथा । जडाशेषजगन्मूलैरव्यक्ताद्याकृतिर्मुहुः ५४॥ नामरू
पेउशक्तार्थौ ननाभ्यामतिरिच्यते । जगत्किंचिद्घटादौहिदृश्यमेवसमीक्ष्यते॥
५५॥ प्रक्रियानियमोनात्रपुंव्युत्पत्तिप्रधानतः । अतःश्रुतिषुसृष्ट्यादिविगानं
बहु धोच्यते ।५६। यथायथाभवेत्पुंसांव्युत्पत्तिःप्रत्यगात्मनि । तासैवप्रक्रि
येहस्यात्साधीसाचानवस्थिता ।५७। विस्पष्टंव्याकृतत्वंश्रुतिकारजनादिकै
वृत्तं ॥स्पष्टमव्याकृतान्मोहान्मिथ्याज्ञानमिदंजगत् ।५८। ननुसामान्यविज्ञान

विशेषाज्ञानमंत्रयात्। जातरूप्यस्मृतेर्लोके मिथ्याज्ञानंप्रसिध्यति।५९। यत्राध्या
सो यदध्यस्तंभेदश्चापेक्षितस्तयोः॥ यामिथ्याज्ञानसामग्रीसैवैकात्म्येनिदुर्लभा।
६०। उच्यतेनिर्वाच्यवादेत्रितयान्नमृषामतिः। अपित्वज्ञानमेवैकं भ्रांतिरूपेणव
र्त्तते।६१॥ येनानिर्वाच्यमज्ञानमुपेक्ष्यान्यदुपेयते। मिथ्याज्ञानंमतेतस्यत्रि
तयंभ्रांतिकारणं।६२। अवस्तुत्वादनिर्वाच्यंकथंसंसारकारणं॥ मिथ्याज्ञाने
ऽवस्तुत्वाद्धेतुःस्यादितिचेन्नतत्। ६३। वस्तुभ्रमित्वाद्धेयस्यमिथ्याज्ञानस्यवस्तु
ता॥ नयुक्तावस्तुतोमानहेयत्वेशून्यदोषता।६४।मिथ्याचवस्तुचेत्येतत्कथंन
व्याहतंवचः॥ नचत्रितयजन्मत्वं मिथ्याज्ञानस्ययुक्तिमत्। ६५। व्योमनैल्येदि

ग्भ्रमेचरविप्राग्यानतिद्वयोः॥ अंगीकर्त्तव्यमेवैतमिथ्याज्ञानमृतेत्रयात्। ६६।
व्योमन्यचाक्षुषेनैल्यभ्रमश्चाक्षुषइष्यते॥ नचसामान्यविज्ञानंचाक्षुषंतत्रसं
भवेत्। ६७॥ नीरूपदिग्विभेदेषुप्राच्यादिव्यत्ययेक्षणं। पश्चाद्गुडसुमेघेषुर
वौप्राग्गतिविभ्रमः।६८। स्वप्नेनानाप्रपंचाद्यंमिथ्याज्ञानमवेक्षते। नसंपादयि
तुंशक्यंतत्रनत्रोचितंत्रयं।६९। सम्यग्ज्ञानेचमिथ्यात्वंप्रातत्रत्रयमंभवात्। सो
यंघटइतिज्ञानेसंभवत्युदितंत्रयं।७०॥ कालत्रयेप्यनुगतंसामान्यंभात्यसौन
रे॥ विशेषोनैवभात्यस्मितन्नोस्मरणंतथा।७१॥ मिथ्याधियःस्मृतित्वेनव
स्तुत्वंयेप्रचक्षते। तन्मतंचनसंभाव्यंपुरोवर्त्तित्वभासनात्। ७२। अनालिंगि

तबाह्यार्थो बुद्धावेवस्मृतिर्भवेत्। इदंरजतमित्येतद्भातिबाह्यार्थगोचरं ।७३। वस्तु
तंवस्तुबोधित्वान्मिथ्यासंज्ञायथोर्यदि। सम्यग्ज्ञानात्तयोर्भेदस्तदातेकेनहेतुना।
७४॥ अतोनिर्वचनीयंतद्ज्ञानंभावरूपकं। रजताद्यन्यथाज्ञानकारणंयुक्ति
गौरवात्। ७५। अहमत्रविपर्येमिसंदिहानोथवानमे। अस्मत्रज्ञानमित्याऊ
स्मयोरज्ञानहेतुतां ।७६॥ मिथ्याज्ञानातिरेकेणयेवज्ञानंनमन्वते। तेषांदोष
हयंवज्रसमानं केनवार्यते ।७७॥ किंचेदमितिजिज्ञासोर्नेदंरजतमित्यतः। अ
तिषेधाद्वस्तुतत्वंबुद्धेताज्ञानहानतः।७८। रजतभ्रमयुक्तस्यशुक्तिकैषेति
वाक्यतः॥ शुक्ति बोधोभवेन्नैवमिथ्याज्ञानानिषेधतः ।७९। अज्ञानमेव हे

DR BHAU DAJI MEMORIAL

उः स्यात्यदिभ्रांतेस्तदाकथं। रूप्यधीनियमः शुक्तावितिचेन्नेपितत्समं ।८०।
अथतेशौक्ल्यसाम्येनरौप्यधीर्यदिनिह्नते। वस्तुत्वसाम्यतः शुक्तौगजधीरपि
नोऽुतः।८१। अस्तुशाक्त्येननियमस्तस्यवारूप्यएवकः। पक्षपातोविनाहेतुंब
लाकाज्ञानरुन्नकिं।८२। अदृष्टेनास्यनियमेसमोमायामतेपिमः। यद्वादुर्घटका
रिण्यांमायायामेवसंभवेत्।८३॥ कस्माददृष्टमप्येतन्नान्यथैवनियच्छति। मया
चोद्येवस्तुवादीकथंपरिहरिष्यति।८४॥ नजानामीतिचेद्वक्तिमायावाद्येवतर्हि
सः। तस्मादज्ञानएवैषविभ्रमः पर्यवस्यति।८५। अज्ञातशुक्तौरजतभ्रांतिर्यद्व
त्तथात्मनि। अविज्ञातेनामरूपेविभ्रमाद्वितलक्षणं।८६। पदार्थांतरसद्भावम

पेक्षान्यस्यवस्तुनः। यस्यसिद्धिर्मृषातत्स्यात् रज्जुसर्पद्विचंद्रवत्।८७। अमात्रादी
दृश्यत्वकिंचित्तत्सर्वंप्रत्यगात्मनः।सत्तामपेक्ष्यसंसिद्ध्येत्तस्मात्तत्स्वप्नवन्मृषा।
८८। अनन्यापेक्ष आत्मायंस्वमहिम्नैवसिध्यति। नहिभावमपेक्षंतेलोकात्रह्
मितीक्षणे।८९। अस्यद्वैतस्यवस्तुत्वंयद्विभातिप्रतीतितः। तदात्मवस्तुसंबंधा
द्भातितत्रमनानुस्वतः।९०॥ रज्जुसर्पोयथारज्ज्वासात्मकः प्राग्विवेकतः। स्व
तोनिरात्मकंतत्स्यात् सात्मंद्वैतंतथात्मनः।९१॥ यस्याद्यस्मिन्नविज्ञाते
ज्ञाते तस्मिन्ननुद्भवेत्। स्वतोनिरात्मकंतत् स्यादिदंद्वैतंवसोतादृशं।९२॥ १२१
अहं ब्रह्मेत्यविज्ञाते द्वैतमेतद्विभासते। ज्ञातेत्वविद्या विध्वंसान्नक्वचिद्भेदधी

र्भवेत्।९३॥ विद्योत्पन्नावविद्येयंविरुद्धत्वेनबाध्यते। नातःपरंगपेक्षास्तिमि
थ्याधीबाधनंप्रति।९४॥९५ मिथ्याधियोस्याःसद्भावःस्यादविद्यैकमूलतो
तः॥ मूलध्वंसोहतैवैषाभातापस्मान्नबाधते।९५। मूलेकृकचसल्लूनेसुमहा
नपिपादपः। यथापूर्वफलंनैवदत्तेपुष्पतिकालतः।९६। यत्राध्यासोयदध्य
स्तभेदोभावीतयोरिति। यद्युक्तंतदभेदएवात्राध्यस्तेयतः।९७। ननेदभे
दिनोलोके भेदांतरमपेक्षते। तस्मादध्यस्तेभेदोनिर्नेदात्मन्यविद्यया।९८
ईश्वराद्याकृतप्राणविराड्भूतेंद्रियादिधीः॥ नाविद्योपाश्रयंमुक्तासंभाव्यप्र
त्यगात्मनि।९९॥ प्रत्यग्याथात्म्यदृस्यात्रिपुणोपिनवीक्षते। नचप्रत्यक्षियं

मुक्तापरागबुद्धिर्मितिर्नवेत् ।४००॥ परांचिखानित्येनब्रह्मादोपमनिधीयते । प्रत्य
ञ्चमनैकमेयत्वंवेदांतेष्वात्मवस्तुनः ।१॥ नित्यशुद्धस्तथा बुद्धोमुक्तः सत्यः परः स्व
तः ॥ प्रत्यगृष्ट्यावसेयोसौमहेदांतोक्तिमानतः ।२॥एवंभूतोप्यसंबुद्धस्वात्मत
तोमहेश्वरः । आपेदेकारणात्मत्वंनामरूपादिसर्जने ।३। नामरूपाध्यासएं
वंएवंव्याकृतः प्रतिपादनः॥ प्रवेशा स्मत्रजीवस्यप्रवेशाः प्रतिपाद्यते । ४। सर्व
ज्ञशास्त्रारंभएवयदर्थस्तद्विबुद्धये । सएषइहदेहेषुप्रविष्टइतिगीयते ।५। आ
त्मज्ञानावतारार्थः सर्वशास्त्रसमुद्यमः । संसारोच्छेदमेवामीफलंशास्त्रकृतोब्रु १२८
वन् ।६।स्तएवमनुष्याणांप्रवृत्तिर्भोगसिद्धये । तत्रानुवादिशास्त्रंस्यान्निष्ट

त्तावेवतत्स्मृतिः ।७। विरोधः सर्वशास्त्रेषुपदार्थानांव्यवस्थितौ । युक्तस्तात्पर्यहा
नत्वाङ्गतौसृष्टिविज्ञानवत् ।८। अपिवास्मायनादीनांशास्त्राणांद्वारभेदतः ।
आमाणप्रमविरुद्धंस्यादैकात्म्यज्ञानजन्मने ।९। प्रवर्त्तमानः कामेषुशास्त्रदीपि
तवर्त्मना । दुर्लभत्वादिकान्दोषान्दृष्ट्वातोविनिवर्त्तते ।१०। अनित्यदुःखशू
न्यत्वंपदार्थानांस्फुटंब्रुवन् । बुद्धोपिरागाद्युच्छित्तौयततेनात्मनिस्फुटौ ।११। यद्वा
वेदस्यकृत्स्नस्यस्वात्मज्ञानार्थतोदिता ॥ तिष्ठंत्वनात्मवादास्तेकिंनस्तैस्तेःप्रयो
जनं ।१२। सएषोत्रानरवाग्रेभ्यः प्रविष्टइतिवेदगीः ॥ व्याख्यायतेसौपदशास्त्रा
दौ मीमांस्यतेत्वथ । स्वर्गो ननुव्याक्रियतेत्वेषशब्दः स्यात्कर्मकर्त्तरि । नोक्तो

* सदित्यनेनशब्देनप्रस्तावितविज्ञेहिनाऽत्रव्याख्यानाध्यक्षआत्मायःपुरोक्तःसउच्यते ।१५

तोध्यक्षदृष्टिचेन्नार्थाक्षिप्तत्वसंभवात्।१५। अव्याकृतेदंपदयोः सामानाधिकरण्यतः॥ व्याकृताव्याकृतैक्यादध्यक्षादेवकल्प्यतां।१६॥ इदंजगन्नियंत्रादिविभिन्नानेकरूपवत्। यथाधुनातथापूर्वमव्यक्तेविशिष्यते।१७। नामरूपाद्यभिव्यक्तेः प्राग्व्याकापक्रवेप्यभूत्। अथ काध्यक्षआत्मैकोव्यक्तंयस्मादिदं जगत्।१८। अथहोर्थाक्षिप्तएवनशाब्दइतिचेन्ननत्। जगदंतर्गतत्वेनशाब्दत्वम्यापिसंभवात्।१९। तत्संभवप्रकारश्चविशदः प्रतिपाद्यते। ग्रामादिवदने कार्थीजगच्छब्देविवक्षया।२०। ग्रामः सन्निहितइत्युक्तेनिवासस्थलमुच्यते। ग्रामादिवदनेकार्थीजगच्छब्देविवक्षया। आगतइत्युक्तेनिवासिजडउच्यते।२१

न

अथचजगच्छब्देनजगन्नश्वरमित्युक्तेजडमवाभिधीयते। जगदव्यक्तमित्युक्ते = ग्रामवदेवदिष्यते॥२२।

ग्रामः सुप्तिस्थइत्युक्तेहयमप्यभिधीयते। जगदव्यक्तमित्युक्तेचिन्मात्रमभिधीयते।२३। व्याकृतंवा व्याकृतंवाजगदित्यभिधानतः। आत्मानात्मोभयार्थैवविवक्षेत्यभिगम्यतां।२४। तर्हिव्याकृतवाक्येस्मिन्हयस्यप्रकृतत्वतः। परस्यैवपरामर्शीः कथमत्रेतिचेच्छृणु।२५। जगज्जन्मस्थितिध्वंसतत्कर्त्राक्षिणमीश्वरं मुक्त्वान्यस्यप्रवेशानुपपत्तात्प्रवेशाच्छिष्यतेपरः।२६। अथवाभयनाशायविराजः स्वात्मवीक्षणे। सच्छब्देनोदितःसाक्षीसपरामर्शीमर्हति।२७। यद्वाविराडधिष्ठानंब्रह्मणद्वावुदीरितं। आत्मशब्देनतस्मात्रपरमेशोभविष्यति।२८ तच्छब्देनपरामृष्टः सान्हव्याकृतभासकः। एतच्छब्देनकार्यस्थः प्रत्यक्षउपदि

र्येपै।२९॥ अद्वितीयमधिष्ठानंकार्यस्थःसद्वयस्यतयोः।मएषइत्यभेदोक्तिर्दुष्करे-
तिनचोद्यतां।३०। अज्ञातवस्तुतस्त्वस्यदुष्करंनास्तिकिंचन। नीलीरूतंनभःप
रंपचक्षुषानीलवस्त्रवत्।३१। योग्ययोग्यव्यपेक्षेयंमानव्यवहृतौभवेत्॥
कल्पनामात्रनिष्पत्तेर्नापेक्षाज्ञानभूमिषु।३२। इहेत्यनेनसूत्रादिस्थाणुप
र्यंतविग्रहाः।उच्यंतेतेषुजीवोयंविभ्रष्टउपलभ्यते।३३। प्रविष्टइतिशब्देनचि
दाभासतमोन्विता। जीवत्वेनोपलक्ष्यार्थाचितःसैषानिधीयते।३४। चिदाभा
सप्रवेशास्तुप्रत्यग्बोधेस्वतोभवेत्। तत्कार्यैघनुहृतःसउपाधिश्चित्प्रवेशने॥ १२७
३५॥ जपाकुसुमरक्तत्वंस्फटिकेकल्प्यतेयथा॥ चिदाभासप्रवेशोयंचित्पंथा

रोप्यतेतथा।३६॥ सूत्रादिस्थाणुपर्यंतंजगत्सृष्टंस्वमायया। स्वाभासैकसहायेन
सएवप्राविशत्परः।३७। अज्ञानखाग्नेभ्यइत्युत्पामर्यादास्यप्रवेशने। उक्तास्यर्ते
नचैतन्यंनखाग्रावधिलक्ष्यते।३८। सामान्येनविशेषाच्चचिद्देहंव्याप्यवर्त्तते। दृष्टं
ताभ्यांहृयीदृत्तिर्विविधाभ्यामिहोच्यते।३९। दारुकुक्षिमनिर्व्याप्ययथाग्निर्दारु
णिस्थितः। संव्याप्यतद्वदखिलंदेहमात्मावस्थितः।४०। तस्यावंसंव्याप्य
यथाक्षुरपात्रंक्षुरस्तथा। श्रोत्रादिनाडीमध्यस्थस्तनुमव्याप्यसंस्थितः।४१
क्षुरपात्रेस्थानेभेदाद्विभिद्यंतेयथाक्षुराः। चैतन्यानिविभिद्यंतेतथानाडी
विभेदतः।४२॥ प्राप्नोतिदृत्तीद्वेजीवः स्वप्नजाग्रदवस्थयोः। सामान्यद्व

त्तिमेवैकांमुषुप्तेप्रतिपद्यते।४३॥ सामान्यवृत्तिर्यस्मात्र्जीवनायोपयुज्यते॥
विशेषवृत्तयोदेहेशङ्खाद्यालोचनोद्यताः।४४। अवेशावाक्यंपदशस्त्यर्थी
ञ्चस्फुटीकृतं। तदनुग्राहकोन्यायइदानींप्रविचार्यते।४५। किंदेवदत्तस्य
दवत्स्ववेशोयोपलादिवत्॥ जलेर्कबिंबवल्लिंवायद्वाडुव्यगुणादिवत्।४६
फलबीजवदाहोस्विन्नाद्यःसर्वगतत्वतः। देवदत्तःपरिछिन्नःसांशश्चात्मा
ञ्जनोतथा।४७॥ अव्याहतानुगतयाआत्मादात्मवस्तुनः॥ परिछेदाद्यस
भावंनेतिनेतीतिवारणात्।४८। नातोनवछिन्नतनोर्निर्विभागात्मवस्तुनः।
सर्वस्थानवियोगेननूवस्थानांतरागमः।४९। नद्वितीयोपरिणतेरंशतः

सर्पस्वरूपतः॥ भूतानिपरिणम्यंतेनत्वात्मापरिणामवान्।४७॥ नन्वतीयोर्कजल
योरिवदेहविदात्मनोः। नसंयोगविभागौस्तोयेनतद्वत्स्ववेशनं।५०। नन्वनु
र्थोऽपारतंत्र्यात्र्डुयतंत्रागुणादयः। नत्वात्मादेहतंत्रोयंसर्वेश्वरइतिश्रुतेः
५१॥ नपंचभोविक्रियत्वाद्बीजविक्रिययायुतं। षड्भावविक्रियाहीनआत्मा
शास्त्रेषुसंमतः।५२। आधाराधेयतासर्पशिलयोःफलबीजयोः। अंशांशि
नेतिवैषम्यान्नतत्रपुनरुक्तता।५३॥ परिछिन्नोजीवएवदेहेषुप्रविशत्यतः
नदोषइतिचेन्मैवंस्रष्टुरेवप्रवेशनोत्।५४। तस्रष्टाथतदेवानुप्राविशत्स
इतिश्रुतेः। स्रष्टुप्रवेशेरेकत्वंस्मार्तुस्काव्रजतीतिवत्।५५। ततः केना

DR BHAU DAJI MEMORIAL

युपायेनप्रवेशोघटतेनहि। इतिप्राप्तेसर्वपदेप्रवेशउपपाद्यते।५८। अप्र
विष्टस्वभावोयंदिग्देशाद्यनभिज्ञतेः। कल्पितोस्यप्रवेशः स्याज्जलपात्रार्क
बिंबवत्। ५९॥ विभागाद्यंशवैषम्येप्यस्ति साम्यंविवक्षितं। उपाधिस्थाप
लक्ष्यादिसाम्यंकेनानिवार्यते॥५८॥ उपाधावुपलभ्यत्वमन्यत्रात्मनभासनं
बह्वल्पभानमित्येतद्दृष्टदार्ष्टांतयोः समं।५९। तेजोधिकरवेर्बिंबमल्पाकं
द्रष्टुमंजसा॥ तथापिजलमध्येतद्बिंबंसम्यग्वेक्षते।६०। स्वयंप्रकाशात्मात्मै
वं नोपलभ्योनुपाधिकः। जडदेहाद्युपाधौतु विस्पष्टमुपलभ्यते।६१। दर्प

णनिहतादृष्टिः परावृत्यस्वमाननं। प्राप्नुवंत्यानिमुखेनवत्यस्मैदर्शयेन्मुखं

नं

६२। देहाद्युपप्लुतेबंधीरात्मानंव्याप्नुवंत्यमौ। अविक्रियंविक्रियाभिर्युक्तइत्येव
भासयेत्।६३। एकोप्यनेकधाभातितरणिंपात्रभेदतः। एवंनानादेहभेदाज्ञात्वा
त्मैकोप्यनेकधा।६४॥ निर्दूतानेषनानात्वतद्धेतुरविभागवान्। अनन्यसाक्षि
कोपीदृक्स्यात् प्रवेशाभ्रमादयं।६५। दृष्टादिरूपरहितः प्रत्यगात्माभवत्पु
रा। नामरूपजनोसत्यांदृष्टत्वादियुतोभवेत्।६६। दृष्टश्रोत्रादिरूपोयोयश्च दृ
ष्टादिवर्जितः। बुद्धितत्कारणोपाधिक्षेत्रज्ञेश्वरसंज्ञकौ।६७। जिघ्राणीममदं
गंधमितियोवेत्त्यविक्रियः। समर्थमादीसर्वाभ्यामुपलक्षणमर्हति।६८। अ
थात्रोन्यापिताज्ञानोर्दिविभानुर्यथेक्षते। सर्वमादीतथाधीस्थाकर्तृभो

क्रादिलक्षणात्त्। ६९। प्रकाशात्मायथाचंद्रः शाखाग्रादत्यविधात्। लक्ष
स्तथाचिदात्मापिकारणोपाधितोजडात्। ७०। जीवत्वभ्रांतिरेवंप्रत्यूधो
पयोगतः। जलपात्रार्द्रसाम्येनप्रवेशइतिकल्प्यते। ७१। दिग्देशकालशून्य
स्यप्रवेशोबिलसर्पवत्। नत्वजस्यपरस्यास्तितेनाविद्याप्रकल्पितः। ७२।
अविद्ययातुसाह्येषकेवलोप्यविवेकतः। बुद्ध्यादिकार्यगैर्धर्मैः प्रतिबिंब
वदिष्यते। ७३। अग्निःसूर्योमरुच्चेतिदृष्टांताःश्रुत्युदीरिताः। प्रविष्टस्तभा
वेतः कार्यमात्माविशत्यगत्। ७४। अग्निर्यथैकोभुवनं काष्ठलोष्टादिरूप
कं। प्रविष्टःप्रतिरूपोभूदप्रविष्टेपिमत्वतः। ७५। सूर्यो यथोदपात्रेषु प्रवि

२२७

ष्टोबहिरेवसन्। तथाप्यात्माप्रविष्टःसन्प्रविष्टइतिकल्प्यते। ७६। यथास्पृष्टा
दयः कृत्स्नाः प्रवेशेपितथेष्यतां। युक्त्यानैवोपपद्यंते। स्पृष्टाद्याः कल्पिताः स्व
तः। ७७। नासतोजन्मनायोगः सतोसत्वंनचेष्यते। कूटस्थोविक्रियानास्ति
स्मादज्ञानतोजनिः। ७८। रूपंरूपमितीयंतुस्पष्टत्वक्प्रत्यगात्मनः। याथा
त्म्यदर्शनायैवस्पृष्टादीनभ्युपागमः। ७९। क्षुरपात्रादृष्टांतात्साम्येनप्र
वेशनं। इंद्रियेष्वतिविस्पष्टमुपलभ्यत्वमात्मनः। ८०। यदग्निकाष्टदृष्टांता
त्सामान्येनप्रवेशनं। तदधिष्ठानरूपेणकार्यव्यापित्वमुच्यते। ८१। अधिष्ठा
नादृतेध्यभावमंतरेणनकुत्रचित्। व्याप्यव्यापकयोः प्रोक्तासरूपव्याप्ति

विशेषेण

रीक्षते।८२। अत्यंतभिन्नयोर्व्याप्तिर्नहिदृष्टगवाश्वयोः। नाप्यत्यंतमभिन्नस्य
प्यव्यापकवर्जनात्।८३। भेदाभेदौवास्तवौचेद्दुर्लभौतेनशिष्यते। अधिष्ठा
रोपितायोरेवव्याप्तिर्वलादियं।८४। तमसैवयथासर्पस्तत्रविज्ञानतुस्व
तः॥ प्रत्यग्ज्ञानकार्योऽिस्मात्मैवंमायाविशात्।८५। व्यापित्वमुपलभ्यत्व
मितिद्वेधाप्रवेदनं॥ सिद्धंप्रविशद्येदोषांस्तान्निरावक्ष्महेधुना।८६। पर
एवप्रविष्टश्चेत्प्रविशनामनेकतः। तदनन्यत्वतः प्राप्तमहेशस्याप्यनेक
ता।८७॥ नैषदोषोस्यवोद्यस्यविपरीतत्वसंभवात्। बह्वनामेकतादात्म्या
देकत्वंकिंनचोद्यते।८८॥ नियामकस्त्वागमोत्रसर्वमेदंनिवारयेत्। कास्मै

: सर्पादिभिर्नैवनुरज्जुर्विनिद्यते।८९॥ एकोदेवोनिविशेत्रबहुधेतिश्रु
तीरणात्॥ वियद्वदेकएवेशईश्वरोभ्युपगम्यतां।९०॥ संसारित्वात्प्रवि
ष्टानापरस्यतदैक्षत:। संसारित्वंप्रसक्तं चेन्नह्युपाधिव्यपेक्षते:।९१॥
सुखदुःखविमोहादिदर्शनान्नेतिचेन्नतत्। नलिप्यतेलोकदुःखैर्लो
कबाह्यइतिश्रुते:।९२। उपाधिजनितोयोयंविदाभासोवभासते। दुः
खाद्यनुभवस्तत्रसाक्षाच्चेभविष्यति।९३॥ दुःखीयदिभवेदात्मा
कःसाक्षीदुःखितोभवेत्॥ दुःखिनःसाक्षितानैवसाक्षिणोदुःखितात
या।९४।१००॥ नन्वेवंस्यादिक्रियांदुःखीसाक्षिताकाविकारिणः। धीवि

क्रियामहस्राणांसाक्षतोहमविक्रियः ।९५। शरीरेंद्रियसंघातआत्मत्वे
नाभिमानिनी ।।विदाभासयुतंबुद्धिविशिष्टंतिसुखादयः ।९६। उदासी
नोयथापूर्वपेहंडिनंकलहोद्यतं । सुखदुःखादिमद्बुद्धिसाक्षीतद्वदसंहतः
९७ ।। पवंसतिपराचेवदुःखंप्रत्यागमिष्यतां । प्रतीच्यात्मनिवेदोयम
हमादीनिप्रतिषेधति ।९८। विज्ञातारमरेकेनविजानीयादितिश्रुतिः । वि
दिताविदिताभ्यांतदन्यदेवेतिचश्रुतेः ।९९। अहंदुःखीतिविज्ञानमा
त्मछायैककर्मकं । आत्मन्यारोप्यतेभ्रांतैर्विद्वद्भिश्चापवर्यते ।१००। नासि १२९
काग्रेमहदुःखंपादांगुष्ठाग्रदृत्यपि । देहावयवगंदुःखंदृष्टमात्मनितत्क

थं ।।१। प्रतीचिचेद्भवेदुःखंव्याप्नुयाद्बोधवद्वपुः ।। विदद्दृष्टस्वरूपत्वात्प्रतिकू
लंचनोभवेत् ।२। आत्मनस्त्वेवभोगायसर्वंप्रियमितिश्रुतेः । सुखमात्मै
कविषयमितिचेत्तन्नयुज्यते । ३। यत्रवान्यत्पृथिः स्यात्तत्रान्योन्यत्पश्य
त्यति ।। इतिभ्रांतात्मविषयंश्रुतंद्वैतंसुखादिकं । ४। यत्रत्वात्मैव सर्व
स्यात्तत्रकंकेनपश्यति । इतिबुद्धात्मनिद्वैतंसुखदुःखादिवारितं । ५।
उभयंनरोचतेपापान्मयातित्यनुभूयते । प्रत्यक्प्रणवयादृष्ट्यासंसा
रः । कोपिनात्मनि । ६। इच्छाद्वेषादिमानात्मेत्येवंसमयबंधनं । तार्किकैः
क्रियतांतत्तु नैवयुक्तोपपद्यते ।।७।। नित्यानुमेयश्चात्माचेन्मनसा

नस्यदुःखिता। नमयादृश्यपत्रात्मावेत् दुष्टभावः प्रसज्यते।८। दृश्यत्वंदु
ष्टता वास्यनिरंशत्वान्नयुज्यते। सांशत्वेस्यादनित्यत्वंनातोदुरितत्व
मात्मनः।९। अदुःखित्वेपरस्येष्टे तदन्यस्याप्यभावतः॥ कस्यदु
खनिवृत्त्यर्थंप्रारब्धोपनिषत्त्वया।१०। प्रत्यगज्ञानहेतूत्थदुःखित्वा
दिभ्रमोत्रयः। तद्भ्रममात्रसिध्यर्थंप्रारब्धोपनिषन्मया।११। नवसं
सरत्यमात्रेहीदृशमोविभ्रमाद्यथा। नवेत्तिदृशमोस्मीतिस्वीकुर्माणो
प्यनात्मनः।१२। दृशमोस्मीतिवाक्योत्थसम्यग्ज्ञानानलार्चिषा। प्लुष्टा
त्मदृशमाज्ञानंदृशमोस्मीतिवीक्षते।१३। तथातत्त्वमसीत्यादिवाक्यो

>पितात्रव॥१२॥निःशेषानात्मदृक्तत्वदर्शितात्मतत्त्वकः।नवेत्त्येकात्म्यमस्मीतिस्वीकुर्माणो॥३

त्थज्ञानवह्निना। प्लुष्ट्वात्रात्मतमस्तत्त्वंचैकात्म्यंप्रतिपद्यते।१५। प्रत्यगज्ञानहेतू
त्थशास्त्राचार्योदिमाधनः। तद्विभ्रमंनिजैकात्म्यंप्रत्यपद्यतमायया।१६। प्रवि
ष्टमुपजीव्यापिदोषः कोपिनवाहिनिः। इहापादयितुंशक्यःप्रवेशस्तेनसुस्थि
तः।१७। नन्वेवंपरएवात्रप्रविष्टस्त्वत्तदाजनाः। पश्यंतितंविनाशास्त्रमितिशा
स्त्रेरयान्वेत्।१८। अहंप्राणिम्यहंवाच्मिपश्यामीतत्प्रणोमितत्। मन्येहमि
त्यहंबुध्यादृष्टएवाखिलैःपरः।१९। उच्यतेतंनपश्यंतिप्रविविक्षुंस्ततोजनाः॥
नोच्छ्वासंभाषणेदृष्टिश्चेतीवास्तोननोमतिः।२०। प्रविष्टस्यास्तिचेच्छ्वासभाष
णाद्यस्तुतावता। प्रवेष्टरिकिमायातंशास्त्रबोध्यःसएवहि।२१॥ प्रविष्टस्य

प्रवेष्टुश्चरूपाभेदेपिँन्नितां ॥ प्रविष्ट्वाप्रविष्टत्वधर्माभांकोनिवारयेत् । २२ । प्र
विष्टंयेप्रपश्यंतिनाप्रविष्टममीविदुः । व्याधत्वेनप्रपश्यंतोनविद्धूराजपुत्रतां
२३ । व्याधोयमित्यसावुक्तिर्योजयेत्प्राणसंकटे । राजदेवादिकोक्तिस्तुभवे
द्बुकुफलप्रदा । २४ । तद्वत्प्रविष्टदृष्टिर्यासासंसारेनियोजयेत् अप्रविष्टात्म
दृष्टिस्तुमोचयेत्सर्वसंकटात् । २५ ॥ अतोऽप्रविष्टदृष्त्यर्थं निंद्यंतेत्रप्रविष्ट
कृ । प्रविष्टदर्शनंयत्स्यात् नतद्दर्शनमात्मनः । २६ । अव्याहतानुगतंप्र
त्यग्वस्तुस्वतोमितेः तद्विद्धेह्याद्दष्टिर्मिथ्यारूपैवसामता । २७ । अयंमेयः १३१
प्रमाताहंमानमेनदिनीहाए ॥ मिथ्याज्ञानेजनस्तुष्टः स्वप्नमायेंद्रजालवत्

---

२८ । नन्वत्रनपश्यंतीनपश्यंतीत्यनेनवचोच्यते । प्रविष्टदर्शनाभावःप्रविष्ट
स्यैवसन्निधेः २९ । परात्मदर्शनाभावपरत्वेनकथंतया । व्याख्यानमितिचेदत्र
तच्छब्देनेतिविद्धिभोः । ३० ॥ सएषदूतिरुक्तत्रतच्छब्देतच्छब्दयोःक्रमात् । प्रविष्टप्र अ
विष्टौद्वावाक्यार्थावुपवर्णितौ । ३१ । एतच्छब्दं परित्यज्यतच्छब्देनात्रवर्णनात् ।
अप्रविष्टंपरात्मानंप्रत्यभिज्ञापयेच्छ्रुतिः । ३२ ॥ प्रविष्टदर्शनाभावोनुभूत्याचवि
रुध्यते । अप्रविष्टादर्शनंतुप्राक्कृतेरनुभूयते । ३३ ॥ नन्वेकस्यपरस्यैवप्रवि
ष्टत्वंदृशांतरं । ततः प्रविष्टदृष्टीस्यात् परस्यैवात्रदर्शनं । ३४ । राजानंदूषितं
दृष्ट्वानदृष्टदूतिलौकिकाः । नमन्यंतेपरस्तेनदृष्टएवात्रपामरैः । ३५ । दृष्टंतोवि

षमोन्येनुदृष्टांताः प्रकृतोचिताः। श्रूयतांदोषदुष्टार्थीदूहोदाहरणेचिताः।३६। गं
गोदकंघृतमपिस्वदतौधारितंपुनः। श्रगंगोदकमित्याकूर्निहितस्यास्तिघृत
ता। ३७॥ स्वतः परोपिदेहादौपविष्टेऽकार्त्स्न्यदोषतः॥ दूषितोदर्शनंतस्मन
नवेत्यरदर्शनं। ३८। श्रकृत्स्नत्वंयथास्यस्याद्व्यवहारेतथोच्यते। श्वासयोगात्
श्वासितास्याद्वक्तावदनयोगतः।४०। दुष्टदर्शनयोगेनश्रोताश्रवणयोगतः
मंताममननयोगेनस्पष्टदोयोजयेत्तथा। ४१। एवंचाहं पाणिनेतिज्ञानेवक्राद्य
संग्रहः॥ वक्राहमित्यपिज्ञानेपाणित्वादेरसंग्रहः।४२। यतिर्दीक्षितचोरादि
भूमिकाधारयेन्नटः॥ तत्रदृष्टेदीक्षितेन्येदृष्टयत्वादयोनहि। ४३। यस्मिन्

दृष्टेह्यदृष्टेन्योदृश्यःशिष्यते। तया। श्रदृष्टेप्यन्यदृष्टिःस्यादकृत्स्नात्सादगुच्यते
४४। प्रत्येकंदीक्षिताद्याश्चपाणित्वाद्याश्चतादृशाः। श्रतोऽकृत्स्नादमेत्तेयास्तदृष्टि
स्तेननात्मदृक्।४५। श्रत्रकेचिन्महात्मानोऽकृत्स्नत्वेननिंदनात्। श्रनौपाधि
संयुक्तःपरात्मेतिप्रचक्षते।४६। मृत्योःसमृत्युमाप्नोतियोत्रनानेवपश्यति॥
इत्यादिनाविरुद्धंतन्महतामेवशोभते।४७॥ तत्रह्युपाधियःकृत्स्नाःपरस्पर
विनेदिनः॥ निरुपाधिकआभातिह्यागमापायसाक्षिणि।४८। साक्षिरूपंस्वतः
सिद्धंसर्वेषव्यभिचारतः। कर्त्रादयःस्वतोऽसिद्धाबुद्ध्याद्यभिचारतः।४९। देश
तः कालतोरूपादवस्थातोर्थधर्मतः॥ सदाद्यनिचरंत्यन्येकर्त्राद्याःप्रत्यगात्म

नि ।५०। अज्ञातायांयथारज्वांतदध्यस्तैकरूपिणं। व्यभिचारःस्रगादीनांप्रतीत्येव
मनात्मनां ।५१। संयुक्तोनामरूपाभ्यांप्राणनादिषुकर्मसु। लक्ष्यतेमोहतःप्र
त्यक् रज्जुःसर्पादिभिर्यथा ।५२। प्राणादिकंतस्यनामरूपंश्वासादिधारणं
व्योम्नीव तरवोनैतेसंभाव्यंतेविदात्मनि ।५३। अनन्यमेयत्तन्मान मात्रवस्त्व
विभागवत्। अमानमेयमात्रैकं नदात्मेतिश्रुचस्महे ।५४। यत एवमविद्यो
त्थंप्राणाद्यंस्यान्नदात्मनः। नामरूपमतस्ताभ्यांपरूपन्नपिनपरूपति ।५५। प्रा
णनादिकृतांमध्यएकैकंयः समीक्षते। नसजानात्यकृत्स्नत्वादेतदीक्षितवस्तु १३३
नः ।५६। सर्वेषांमेलनंत्वत्रदूषितंमहतांमतं। नचादोषंमेलयित्वाव्यवहर्तुंह

मोनरः ।५७। अतोयःप्राणिमीत्यादिस्वरूपंयावदीक्षते। अक्रियाकारकंवस्तुन
तावद्वेदतत्त्वतः ।५८। यत्नात्त्ववेत्रः कृत्योक्तः पुनः श्रुत्यासनिंद्यते। इत्यत्रा
भिप्रायभेदः कोसाविति सईर्यते ।५९। ब्रह्मबोधद्वारतयाप्रवेशः प्रतिपादितः॥
द्वारं ब्रह्मतयाभ्रांत्यायेविदुस्तान्विनिंदति ।६०। विद्याभ्यामोपोदितःस्यात्कर्त्तृद
र्शननिंदनात्। इत्युक्तंव्याकृतंसर्वजडाजडविभागवत्। ६१। प्रमेयंप्रमिति
द्वारं प्रमाभासविनिंदनं। त्रयमुक्तापमित्यर्थोविद्यासूत्रमयोच्यते। ६२। प्राये
णारोपएवात्रतृतीयेध्यायदूर्यते। तथापितदमुख्यत्वत्तस्यैविद्यावसूत्रिता
६३। अन्यथारोपएवात्रप्रतिपाद्यइतिभ्रमः ॥ प्राप्नुयात्तद्व्युदासार्थंविद्यो

मुख्यामसूत्रयत् ।६४॥ आत्मेत्येवमुपासीतेत्येतत्सूत्रमुदाहृतं ॥ अपरेत्रवि
कल्पेन चतुर्धासूत्रमूचिरे ।६५। आत्मेत्येकमिदंसूत्रं खंडिकाद्वयमेववा।
अध्यायोवासमस्तोयमध्यायद्वयमेववा। ६६। अव्याकृतप्रवेशात्म पदनीय
प्रियोक्तयः।पंचसूत्राणिनीतानिकैश्चिन्नान्यपिसंतुवा ।६७॥ यथोक्तानांतुसू
त्राणमाशास्त्रार्थसमापनात् ॥ वृत्तिःस्यादुत्तरोग्रंथस्तत्रचैषांसमन्वयात् ॥
६८॥ सर्वथाप्यात्मसूत्रेस्मिन् विवादोस्तिन कुत्रचित् । तत्सूत्रेणनिवर्त्तीयाशंका
मात्रावदुच्यते ।६९॥ व्याकृतेहेतुकार्याभ्यामन्यत्रकारणेऽतत् ॥ तिरोहि १३४
तं वस्तुतत्संकथ्यतत्त्वंविबुध्यतां ॥७०॥ कार्यकारणबद्धौतावित्थेतेविश्व

तैजसौ॥प्राज्ञः कारणबद्धः स्यादितिनैगमिकंवचः ।७१॥ तुरीयेतूक्तबद्धौतौन
सिध्यतदुतीरणात् ॥ तुरीयत्वेनबोद्धव्यमितिचेत्तत्कदावद ।७२॥ विस्मारिता
त्मोजानातिशास्त्राद्येवंतत्परं । आप्तोनकरणग्रामः शास्त्राद्यपिनवेत्तिहि ।७३॥
एतत्संकानिहत्यर्थमात्मेत्येवेतिसूत्रेण । उक्तापदार्थशंकायानन्तरंयोजयिष्यते
७४॥ यच्चाप्नोतियदादत्तेयच्चातिविषयानिह । यच्चास्यसंततोभावस्तस्मादात्मेति
कथ्यते ।७५॥ व्याप्नोत्यनवशेषेणसर्पादीनस्त्रगिवाखिलान् । कल्प्यानधिष्ठान
तयाघृत्यक्त्वात्माभवेत्ततः ।७६॥ सर्वाधिष्ठानसन्मात्रइत्यशेषजगत्स्मृति । अधि
ष्ठानतयाव्याप्तिंश्रुतिर्ब्रूतेसदात्मनः ।७७। सच्चिदाभासभेदेनतदुच्छानखिला

न्यतः । आदर्तेनात्मनः प्राप्तमतश्चात्मेतितंविदुः ।७८। परआत्मनिसर्वेपिसंप्रति
षंत एकले ॥ एथिव्याद्यात्मनात्मानदूतिर्वाथिर्वणेववः ।७९॥ आत्माभासः
पराचीनाधीहृत्तीर्विषयोन्मुखाः॥ प्रत्यदुन्मीत्तियतोतोमावात्मेत्युक्तोमनी
षिभिः ।८०॥ विश्वोहिस्थूलभुङ्नित्यंतैजसःप्रविविक्तभुक् । आनंदभुक्तथा
प्राज्ञइतिचागमशासनं।८१॥ अव्याहतानुगतःपूर्णःस्वात्मन्यवस्थितः
यतोस्यमंततोभावस्तस्मादात्मेतिशब्द्यते ।८२॥ तद्विष्णोरितिमंत्रोपिविष्णो
स्तत्परमंपदं। चतुर्थंदातनंव्योम्निव्यावष्टेप्रत्यगात्मनि ।८३। चत्वविधनिरु
क्तात्रचत्वारोर्थाःप्रकीर्तिताः ॥ अविशेषनंकारणत्वंजीवभावोविमुक्तता।८४

DR. BHAU DAJI MEMORIAL

यस्मुक्तरूपंसाक्षित्वाद्व्याकृतेऽव्याकृतेपितत् । अतिरोहितमत्रात्मशब्देनैतद्वि
मूचितं ।८५। प्रत्यक्तयायःप्रथतेस्वयंज्योतिःस्वभावकः ॥ तिरोधीयेतयद्घोषज
गदांध्यंतदात्मवेत् ।८६॥ जिघ्राणीममहंगंधमितियोवेत्तिविक्रियः । सआत्मा
तत्परंज्योतिरितिवेदशिरोवचः ।८७। आत्मशब्दधियोरात्माविषयोनेतिभाषितुं
सूत्रेस्मिन्नितिशब्दोयंयथैतस्यात्तथोच्यते ।८८। व्यवहर्तुराक्यएषनवमांड
क्यवाक्यतः । अमात्रोयश्चतुर्थःसोव्यवहार्यदृतीदृशात् ।८९। अभिवादोभि
वदनमुपादानमितित्रिधा । व्यवहारउपादानंसर्वगेसंभवेन्नहि ।९०। यतो
वाचोनिवर्तंतेह्यप्राप्यमनसासह । सब्रह्मानंदइत्युक्तेर्व्यवहारांतरंचना

९२॥ अथापिबोधमिच्छंस्तंयदिवाक्यंनिवर्तितः। तत्पक्षेदामनोवाग्भ्यामात्मेत्यु
पचरेदिमं॥९२॥ यत्रेतिपरशब्दः स्यात्तत्रोपचरितंवचः। ज्येष्ठंपितेतिपरयंत्या
दावेवमवेक्षणात्॥९३॥ अवाङ्मनसगम्यत्वमितिशब्देनसूचितं। अन्यत्रच
श्रुतंसाक्षात्तथाप्येतन्नयुज्यते॥९४॥ कावाचोनिवर्तंतेन तावत्तोकि को
क्तयः। अप्रमत्तेर्वेदवाचांनिवृत्तौतद्वचोरथा॥९५॥२००१ यतोवाचोनिव
र्तंतइत्येतद्वैदिकंवचः॥ ब्रह्मणेविनिवृत्तंसत्किमन्यत्प्रतिपाद्येत्॥९६॥ स्व
एवात्मनिवचस्त्वेतद्वाच्यत्वंप्रतिषेधति॥ नात्मानंवक्तुमेतदात्मनोविनिव १३६
र्त्तने॥९७॥ यथैवाशब्दमस्पर्शमितिशास्त्राद्यपद्धतिः॥ यथावास्थूलमित्या

दितथावाच्यत्ववारणं॥९८॥ अस्थूलादिवचोयद्वत्स्थूलत्वादिनिषेधतः। पर्यवस्ये
द्ब्रह्मतत्त्वेतथावाच्यत्वनुद्वचः॥९९॥ निषेध्यविषयत्वेननिषेधवचनैर्नहि। ब्र
ह्मवाच्यमपित्वेन त्वद्वस्तेविषभुक्तिवत्॥१००॥ विषंभुंक्ष्वेतिवाक्येन नो च्य
तेभुक्तिवारणं। पदार्थोसंगतेःकिंतुतत्रात्पर्येणलक्ष्यते॥१॥ अवाच्यब्रह्म
णेवाक्यंनिवृत्तमपिमार्थकं॥ यतोलक्षणयाप्यत्रवाक्येनब्रह्मबोध्यते॥२॥
निषिद्धेमतिवाच्येसत्यज्ञानादिकान्यपि। लक्ष्यंत्येवनोतत्रैक्यवतेतद्वत्
मवात्॥३॥ स्थूलत्वादियथानास्तिनिषेध्यत्वात्तथात्मनि। सत्यत्वाद्यावाच्यधर्मा
नमंत्येषांनिषेधतः॥४॥ कल्प्यस्थौल्यनिषेधस्यवाच्यस्यद्वारतातथा। कल्प्यध

र्मविधिर्वा योद्धारं ब्रह्मोपलक्षणे ।५॥ आरोपाधिष्ठानंभव: संबंधोद्वारलक्षयो:॥
य: सर्पोरज्जुरेषेतियद्यातद्वदिनीष्यतां ।६॥ कथंलक्षलक्षमत्यंतावाच्यशब्देन
चोद्यतां । अत्यंतावाच्यशब्देनलक्षमेवात्रसंभवात् ।७॥ अत्यंतावाच्यशब्दोयंनि
रर्थश्चेत्त्वयोदित: । मुन्मात्रप्रलाप: स्यात्सार्थत्वेर्थ: सकीदृश: ।८॥ वाच्यत्वेवा
कृति: स्याल्लक्षत्वेस्मन्नमीहितं ॥ सिद्धंभवत्यवाच्यशब्दस्तुलौकिक: स्यालक्ष
त्वांगीकृतेरिह ।९॥ भ्रांतिवादिभ्रमस्यायमनुवादइतित्वया । नमंतव्यंयतोत्यं
ताव्याच्यशब्दस्तुलौकिक: ।१०॥ कौतोहि मुख्यलक्षार्थो लौकिकाविनिवेक्षणः ॥ १३७
मुख्योवाच्यत्व धर्मस्यनिषेध: शब्दसंगते: ।११॥ इक्षुक्षीरादिमाधुर्य विशेषोज

क्षयिष्यते । तत्रात्यंतावाच्यशब्दस्तात्पर्यात्पर्यवस्यति ।१२। इक्षुक्षीरगुडादीनां ।
माधुर्यं स्यांतरं महत् । तथापिनतदाख्यानुं सरस्वत्यापिशक्यते ।१३। युक्तंहि
धर्मनेदस्यलक्षत्वंयदिभासनात् । ब्रह्मापितर्हिभातत्वाछास्त्रेणात्रोपल
क्षतां ॥१४॥ लक्षत्वधर्मस्तत्रस्यादितिचेदस्तुदैर्घ्यवत् ॥ अदीर्घमित्यपक्षु
त्वा मत्यंतेतिव्यपोघते ।१५। नानावोपिप्रसज्येतनेतिनेतीतिवीप्सया ॥
भावाभावोभयाद्यादिसर्वदृश्यनिषेधनात् ॥१६॥ सर्वदृश्यनिषेधेतुकी
दृग्ब्रह्मेतिचेच्छृणु । दृष्टांतेवाहिप्यतेवाप्रश्नेनावदिदंवद ।१७। ब्रह्मानुभव
वांछा किंयद्वादृष्टांतकामना । आद्येत्वमेवब्रह्मासिदृष्टांतेतुनक्षमः ॥१८

मयिदेहादयोवाच्याद्दश्यंतदितिचेत्तदा॥ हित्वावाच्यानवाच्यंलक्षणंब्रह्मविद्वि
नोः॥१९॥ आक्षेपेनुपपत्तिःकायदि बुद्ध्यप्रवेशनं। तन्नात्रक्षेपुकामस्यतव
बुद्धेःप्रवेशनात्॥२०॥ आक्षेपायविरोद्धीमेपुरुषार्थायनेतिचेत्॥ अहोत
वमहत्पुण्यंपप्लवितंजन्मकोटयैनिः॥२१॥ तस्माद्ब्रह्मानिधानानिधुयुक्तान्यु
पलब्धये॥ सर्वाण्यवनिधायैवनिवर्त्ततेविवोध्यच। २२। दृंद्वजालमिदंशाद्वा
अवाच्यंवक्तुमुद्यताः। अलंलंलंक्षयंतीतिवह्निवेत्स्वमबुध्यथा। २३। जन्म
न्मायेंद्वजालस्यहेतुंमायापुराकृतां। चोद्यव्याजेनाधुनात्वंयुक्तिधीभ्यामपेक्षसे २४
२४॥ महात्म्यमेतल्लक्ष्मयदबुद्धप्रबोधनं। लोकेसार्वजनीनंतत्सुषुप्तनरबो

धने। २५। अगृहीत्वैवसंबंधमनिधानानिधेययोः॥ हित्वानिद्रांघबुध्यंतेसुषुप्तेबो
धिताःपरैः। २६। नश्यणोतिनरःसुप्तोजाग्रतीवाद्दराण्यपि। भेरिध्वन्यादिनिर्बोधा
त्संबंधग्रहणंकुतः। २७। दुर्बलत्वादविद्यायाआत्मत्वाद्बोध्यवस्तुनः॥ शाद्दा
क्षेरचिंत्यत्वाद्दिभ्रमन्मोहहानतः। २८। लक्षकत्वेपिवेदांतशाद्दाण्वात्मलक्ष
काः॥ लक्षंगंगेत्येवतीरं वालुकेतिनकक्षित्। २९॥ प्रचुरव्यवहारश्चेत्गं
गादौविनियामकः। वेदांतव्यवहारस्यप्राचुर्यंब्रह्मणीस्थितं। ३०। एवंच
प्रकृतेवस्तुशाद्दोयंवस्तुलक्षकः। नवाचकोवाचकत्वहेतोरात्मन्यसंभवा
त्॥ ३१॥ षष्ठीगुणक्रियाजातिसूचयः शाद्दहेतवः॥ नात्मन्यन्यत्तमोमी

षांतेनात्मानाभिधीयते।३३। आप्नोतीत्यादिधात्वर्थास्त्वारोव्यावहारिकाः॥
आत्मशब्दस्यवाच्यार्थाःप्रतीचीपरिकल्पिताः।३४। तैर्हीरैरात्मनस्त्वं
यथावदुपलप्स्यते। तदेतदात्मगम्यत्वमितिशब्देनसूत्रितं।३५। मनोपि
दृश्यविषयंनदृशंमंतुमर्हति। दृश्यगमनोदृश्यतेतस्तेनदृक्स्वस्तेकथं।३६
मनुतेयंनमनसायेनत्वाहुर्मनोमतं॥ ब्रह्मविद्धितदेवत्वमित्युवाचापराश्रुतिः
३७॥ ब्रह्ममंडुश्रुतंसन्मनोग्राप्यनिवर्त्तनेवेदनंचात्मतत्त्वंचहूयंतेनोपप
द्यते।३८। वेदांतोक्तोमनोहात्मब्रह्मविद्यानिधानया॥ विद्धीत्यनेनयत्तो
क्तंवेदनंतत्प्रसिध्यति।३९॥ यदिमंतव्यताधर्मोब्रह्मणिस्यात्तदामनः॥ ब्र

ह्मापोत्यपनतत्तस्मिंतस्माद्ब्रह्मामंचतत्।४०॥ यथावाच्यत्वलक्ष्यत्वेविना
वाब्रह्मबोधयेत्॥ मंतव्यत्वंविनातद्वदज्ञानंतुनिरस्यति।४०॥ अन्यत्रै
वमनोवाचौव्याप्रियेतेयथायथं। निर्धर्मकंतुब्रह्मातोनवाङ्मनसग
म्यता।४१। एतत्सर्वंद्योतयितुमितिशब्दमसूत्रयत्। व्यावर्त्तिरेवकारे
णव्याकृताव्याकृतात्मनोः।४२॥ विदिताविदिताभ्यांतदन्यदेवेतिश्रु
त्यर्थगीः॥ व्याकृताव्याकृताभ्यांतत्तंव्यावर्त्तयत्यसौ।४३। नव्याकृ
ताव्याकृतयोःसंभवेद्वस्तुरूपता॥ मृषात्वमेवानात्मत्वाद्विचारेनिष्पतेत
योः॥४४। आत्मनोनिद्यतेनात्मायदिवानैवनिद्यते॥ भिन्नत्वेनिःस्वरू

पस्यनैवमिहिःखपुष्पवत्।४५॥ स्वरूपमात्मशब्दोक्तं तनोयदिविसिद्ध्यते॥
निःस्वरूपःकथंनस्यादभेदेत्वात्ममात्रता।४६॥ अनात्मासन्स्वरूपत्वमिछ
स्त्रीनआत्मनि॥ तदात्मनास्मज्ञप्त्वात्वनात्मासिध्यतांकथं॥४७॥ आ
त्मन्यंतर्भवन्नेषसिध्यतीतिमतंयदि॥ कथंविरुद्धयोरात्मानात्मानोःस
वासिता।४८। यद्यनात्मैवनिष्येतसर्वशून्यंभवेत्तदा। आत्मैकशेषेना
त्मायंनवेदृतजलांजलिः।४९॥ आत्मैषोनात्मतांनैवमहतेनंपरित्यजेत्
स्वयंसेदुमशक्योयमनात्मातोमृषाभवेत्।५०॥ शक्नोतिसर्वःसंसेदुंस्वरू
पमवलंब्यहि॥ यःस्वरूपेपिनिर्णीतःकथंसोन्यत्रसिध्यति।५१। व्यक्ता

DR. BHAU DAJI
डाक्टर भाऊदाजीरत्नसंग्रहालय
मुंबई ४०००

व्यक्तविभागोतःसिध्येदात्मन्यतद्वति॥ अहोरात्रविभागोयंभानोर्नतद्वहितेयथा
॥५२॥ आत्मानात्मविभागोपिनायमात्मस्थगिष्यते॥ अज्ञातात्मैकसाक्षिवा
दज्ञानोत्थंनवस्तुगं।५३॥ तस्मान्नानात्मनोस्त्यात्मानाप्यनात्मनःस्वतः॥
आत्मनस्तुस्वतःसिद्धिर्भ्रांतेःसिद्धिरनात्मनः।५४॥ अतिगुर्वाद्यनात्मानमपे
क्ष्यात्मात्रसिध्यति॥ इतिचेत्तदपेक्षापिनस्वरूपस्यसिध्यति॥५५॥ गुरुशा
स्त्रादयोहि भ्रांतिंवैरयंत्येवकेवलं। नत्वात्मानंसाधयंतिस्वयंतेनात्मवत्वतः।
५६॥ गुर्वादयोहिसात्मानआत्मनैवभवंतिहि। विनात्मानंनिःस्वरूपाःकथं
तेसाधयंतितं।५७॥ साध्यसाधनभावस्तेयदीष्टस्तर्ह्यनात्मनः। आपद्यसा

तामात्मामाधयेदितियुज्यते ॥ ५८ ॥ बुद्ध्यादेर्विषयांतस्यस्वसामर्थ्यादसिद्ध
आत्मनासहसंबंधआत्मात्मीयत्वलक्षणः ।५९॥ अबाध्यत्वात्स्वरूपत्वा
द्ब्राध्येनानात्मनासह । अयाहत्तानुगतंसंगतंरज्जुसर्पवत् ॥६०। व्याकृ
ताव्याकृतेइच्छंकल्पितेतेविचारतः ॥ एतेवारयितुंसूत्रेएवकारमसूत्र
यत् ।६१। उपेतिसामीप्यलक्षीतनिष्ठाप्रत्यगात्मनि । कार्यकारणरूपाभ्यां
प्रत्यङ्नेदीयईक्षते ॥ ६२॥ व्याकृताव्याकृतात्मभ्यांभ्रांत्याप्रत्यङ् विभिद्यते
प्रत्यक्त्वधियाहत्वातावुभौपैत्यात्ममात्रतां ।६३। बोधाद्बंधे यथाप्र
त्यब्ब्रह्मणोरेकतातथा॥ पुरापिब्रह्मसामीप्यंतेनविश्रांतमात्मनि ।६४॥

वाक्यंतत्त्वमसीत्यादिप्रसिद्धंनिखिलागमे ॥ आमीतेतिउक्त्वाहेनकूटस्थत्वम
सूत्रयत् ॥ ६५॥ व्युत्थायकारणात्कार्योक्तस्वज्ञानवर्त्मना । उपेत्यकूट
स्थमज मासीतापरिणामवर्जनं ।६६॥ मातृत्वकंचुकोयद्वदात्मानात्मा
नमीक्षते ॥ दृष्टिमात्रैकरूपत्वान्नतथात्मानमीक्षते ।६७। कर्तृत्वप्रतिषे
धार्थंद्रष्टुर्दृष्टेरितिश्रुतिः ॥ दृष्टेरेवउपोद्वृत्यादृष्टिर्विश्रोषणं ।६८
इत्यात्मसूत्रवाक्येस्मिन् पदार्थः प्रविवेचितः ॥ वाक्यार्थोप्यत्रनिष्पन्नः
संक्षेपेणप्रदर्श्यते । ६९॥ वाच्यमंतव्यताहीनोव्यक्ताव्यक्तविलक्षणः ॥
अभिन्नआत्माकूटस्थइतिवाक्यार्थइष्यते ॥ ७०॥ व्याकृताव्याकृताभ्यांत

द्वस्तुतत्वंतिरोहितं। इतियद्वंकितंतन्नस्वरूपस्यातिरोहितेः।७२। स्वस्वरूपंति
रोधातुंनहिकेनापिशक्यते। विस्मार्यंतामिहाज्ञाणिकिमन्यैरपराध्यते।७२।
आपादयेयुःशास्त्रादीन्यद्यज्ञाणिनथापिते। काहानिस्तस्यशास्त्रादेरेवतत्त्वं
विबुध्यतां।७३। तैःशास्त्रादितयाभातितत्स्वरूपतयाननु। इतिवेदतएवै
तद्वेदवाक्येनबुध्यतां।७४। नपरोक्षत्वमाशंक्यंस्वस्वरूपत्वहेतुतः। शास्त्रादि
तत्संयद्वोद्धुःस्वरूपंतन्नचेतरत्।७५। एकस्यापित्रिचित्तस्यमहकारिविभेदतः
॥ क्रमेणग्रहणंतस्येशास्त्रादौचक्रतोनहि।७६। इतिशंकोत्तरंप्रोक्तमेतत्सू
त्रेणसूत्रितं। स्वरूपवाच्यात्मशास्त्रादतिरोधानभासनात्।७७। यद्वोपासी

ना

नेतिशास्त्रोनकूटस्थो ब्रवीत्ययं॥ किंतुजातिधालर्थेविवक्षितात्रयुज्यते।७८। त
तोवाक्यार्थएवंस्यादात्मशास्त्रोपलक्षितं। वस्तित्येवविजानीयादुपेक्ष्यप्राणना
दिकं।७९। रसगंधादियुक्तेपिद्रव्येदृष्ट्याविविच्यते। रूपमेवयथात्तद्वद्ध्यान
स्थंविविच्यतां।८०। एवंमत्कृतशंकायाःसाक्षादुक्तमिहोत्तरं। व्याख्याने सूक्ष्म
मनसाउरीयंबुध्यतामिति।८१। इतिसूत्रस्यतात्पर्ययथावत्प्रतिपादितं। अथ
पक्षान्तिराकुर्वेवाक्येस्मिन्प्रतिवादिनां।८२। उपासीतेतिवचनंश्रुत्वाकेचिदुपा
सनं॥ विधीयतइतिप्राहुश्चिंतातत्रत्रिधामता।८३। किमुपास्यंकिविधेयंको
विधिश्चेतिमात्रिधा। आत्मोपास्योयवानात्मेत्युपास्यस्यात्रसंशयः।८४। इति

---

२ शास्त्रादि ... ३ तत्त्वं ... ४ ... ५ ... ६ ... ७ ... ८ ... ९ ... १० ... ११ ... १२ ... १३ ... १४ ... १५ ... १६ ... १७ ... १८ ... १९ ... २० ... २१ ... २२ ... २३ ... २४ ... २५ ... २६ ... २७ ... २८ ... २९ ... ३० ... ३१ ... ३२ ... ३३ ... ३४ ... ३५ ... ३६ ... ३७ ... ३८ ... ३९ ... ४० ... ४१ ... ४२ ... ४३ ... ४४ ... ४५ ... ४६ ... ४७ ... ४८ ... ४९ ... ५० ... ५१ ... ५२ ... ५३ ... ५४ ... ५५ ... ५६ ... ५७ ... ५८ ... ५९ ... ६० ... ६१ ... ६२ ... ६३ ... ६४ ... ६५ ... ६६ ... ६७ ... ६८ ... ६९ ... ७० ... ७१ ... ७२ ... ७३ ... ७४ ... ७५ ... ७६ ... ७७ ... ७८ ... ७९ ... ८० ... ८१ ... ८२ ... ८३ ... ८४ ...

शाद्दशिरस्कत्वंप्रियवाक्येयथाश्रुतं । आत्मेत्येवेतिवाक्येपितथैवश्रूयतेस्फुटं ।९।
आत्मानमेवलोकंत्वित्यात्मोपासनिर्द्वितीयया । श्रुत्यान्यत्रेहनतयाविरूपत्वमिदं
मतं ।८८। तन्नपश्यंतीतिवाक्ये निषिद्धाप्रकृतात्मता । उपास्यःस्यादितिचेन्ने
वमिष्यतेउपासनं ।८९। आत्मोपासनमेवेदंवाक्यशेषावलोकनेपदनीयांत
रत्तरप्रियात्मोपासनोक्तितः ।९०। अवाङ्मनसगम्यत्वमितिशाद्दनवर्णितं ॥
वाक्यशेषोयमात्मानमेवेतिनदृश्यत्वतः ।९१। निषेधोऽकृत्स्नविषयोननुकृत्स्ना
त्मगोचरः । तदुपास्यआत्मास्यादिधेर्यचित्यतेधुना ।९२। शाद्दज्ञानंविधेयंकिं २४३
निरोधोवाथमंततिः । इतित्रेधामंत्रायेमत्याद्यः पक्षोनिधीयते ।९३ ॥ वि

धुपास्त्योरिहैकार्थ्यान्नक्रियत्वान्नशमंभवात् । शेषित्वान्मुक्तिहेतुत्वाच्छाद्दज्ञानंवि
धीयते ।९४॥ २१० यद्यप्युपासनिरावृत्तिस्तथाप्यत्रतुवेदनं । भवेद्विद्याप्रकर
णात्ततोज्ञानविधिर्मतः ।९५॥ वषट्करिष्यंस्तांध्यायेदितिध्यानंयथातथा ॥
क्रियैवमानसीविद्याततोस्त्यविधियोग्यता ।९६॥ किंकेनकथमित्यंशाच्चात्मचि
न्नाद्यमादयः । अतोत्रभावनाव्यंशाच्छाद्दज्ञानेपिसंभवेत् ।९७। यत् उसिद्धार्थवे
दांतास्तेशेषाः शेष्यंविधिः । अतः सिद्धार्थवेदांतैः वेदार्थत्वंविधेर्नहि । स्वातंत्र्ये
सिद्धवाक्यानांभवेदपुरुषार्थता ।९८। अत्रोच्यतेननुज्ञानादकार्यत्वादकर्तृ
तः ॥ विध्यानंत्यान्नैरपेक्ष्यादशक्तेर्नात्रधीविधिः ।९९। जीवब्रह्मैक्यविज्ञानंवा

कस्श्रवणमात्रतः । सिद्ध्यत्येवेत्यनुष्ठानंनतदर्थमपेक्षते ।१। यथाग्निहोत्रयाथा
त्म्यविज्ञानव्यतिरेकतः । तदनुष्ठानमस्त्येवंनात्मबोधेस्तिकिंचन ।२। मुमुक्षुपुरु
षार्थस्यमोहमात्रांतरायतः ॥ ज्ञानात्तन्मोहविध्वंसौकिंवाकार्यं विधीयते ।३॥
यदुत्पत्त्यादियोग्यंसद्धेतुंकंचिदपेक्षते । तत्रानुष्ठानसाफल्यंनानुत्पद्येविमो
क्षणे । ४॥ संभावितात्मकर्तृत्वोब्रह्मणेपाद्यधिकारदान् ॥ विधिश्रुतेः प्रवर्त्त
तनतुकर्तृत्ववर्ज्जनाः ॥५॥ अहंब्रह्मास्मीतिविजानतः । कर्तृत्वं
नैवसंभाव्यंतद्धेतुज्ञानहानतः ।६॥ आत्मनोब्रह्मतासिद्धाब्रह्मणोप्यात्मतास्व १४७
तः ॥ तत्त्वमस्यादिवाक्योत्थबोधाच्चेन्न किमितीह्यते ।७। अंतरेण विधिंवाक्यश्र

वणायापिनेह्यते । इतिब्रुवाणंप्रब्रूयादनिश्चयतेकुतः ।८। अधिक्षेपंश्रुणोत्येवविं
नापिविधिनापुमान् तत्त्वमस्यादिवाक्यानांश्रवणंनतथाकृतः ।९। वैदिक
त्वाद्विध्यपेक्षायदितर्हि विधेरपि । श्रवणेविध्यपेक्षायांविध्यानंत्यंप्रसज्यते ।१०
उत्पन्नस्यापिबोधस्यविध्यपेक्षामुदीरयन् ॥ किंवाप्रयोजनंब्रूयात्तद्विचार्यंप्र
यत्नतः । ११॥ प्रयोगार्थंबोधनार्थंभावार्थंमेयसिद्धये । आत्मत्वायातिरोहित्वैनि
रुपाध्यनुभूतये ।१२। संभवार्थंनमोनुत्वैज्ञानहतिनिरस्तये आत्मत्वायातिरोहि
त्वैत्रिधा तमोहानिनिरस्यैवा सर्वथापिनयुज्यते ।१३॥ स्वरूपलाभमात्रेणाहंतिर्वि
द्यातमस्ततः ॥ नापेक्षतेप्रयोगंतुलब्धस्वरूपाऽऊगारवत् ।१४। स्वप्रकाशात्म

नस्नत्वेतमोनाशगतिरेकतः। बोधनंनैवभाव्यंघटादौतज्जडेभवेत् ॥२५। नद्यास्तीरे
फलानीतिनवचोन्यदपेक्षते। ग्रामाएणायतस्तावेदवाक्यंनान्यदपेक्षते।२६। ब्र
माणमब्रमाणंचब्रमेयोनिश्चितिस्तथा। सन्निधात्रसिध्यंतितस्मिंधीकिं
पेक्षते।२७। इदमेवमिदंनैवमितिबुद्धिरनात्मिका। येनात्मवत्येषस्वात्मा स्व
तएवनचान्यतः।२८। जाग्रत्स्वब्रसुषुप्तनत्रह्मभावाभावसाक्षिणः। नास्तितस्यति
रोधानमन्यथाजगदंधता।२९। कर्त्रादिव्याप्तेः सर्वमसंकीर्णमुपाधिभिः। अ
विच्छिन्नब्रसंसुप्तंस्वानुभूत्यैवगम्यते।३०। ब्रमाणमब्रमाणंचब्रमाभासस्तथैव
च। ऊर्ध्वत्येवब्रमांयत्रतदमंभावनाकृतः।३१। द्वैतापनोदनेचक्रियथानान्यद

DR BHAU DAJI MEMORIAL

पेक्षते ॥ विरोधित्वात्तयाविद्यानिरपेक्षातमोहतो।३२। यातमोघातिनीविद्यार
त्रिः सास्वयमेवहि ॥ नश्यत्यविद्ययासार्धंहत्वारोगमिवौषधं।३३। ब्रत्यक्षात्रावे
क्षोयः सतमोहानिरुच्यते ॥ अनीश्वरीनमोहानिर्नात्रातोविध्यपेक्षिता।३४।
पश्येदात्मानमित्येषविधिरत्रनिरर्थकः ॥ अश्रुतत्वाद्दस्मृतंतंत्रंनेच्छयाकर्तुमी
श्वरः।३५। दर्शनंवस्तुतंत्रंस्यात् कर्तृतंत्रंनहिक्वचित् कर्तृतंत्राधियोपास्य
यस्यात्तद्ब्रह्मनैवहि।३६। मनुतेयंनयन्नमामतंयेनमनः सदा। ब्रह्मविद्धि
तदेवत्वंनत्विदंयदुपासते।३७। इतिशृंगग्राहितयाश्रुत्योपास्यस्य वारिता।
ब्रह्मतासाक्षिणस्तस्यब्रह्मत्वंस्फुटमीरितं।३८। हेतवः सर्वपक्षस्यथेप्रो

कास्तेषुसंमतं ॥ विद्युपास्त्योरिहैकार्थ्यक्रियात्वंननुसंमतं । २९ ॥ यागेयद्वत्व
ताध्यानंनृतंत्रत्वात्क्रियासुमा । प्रमाणमेयतंत्रत्वाद्धैषास्यात्कथंक्रिया
३० । सर्वाकांक्षामूलहेतोरज्ञानस्यैववाधनात् ॥ अंत्रात्रयमनाकांक्षंकथंमा
भावनोदियात् । ३१ ॥ स्वतंत्राब्रह्मवेदांतबोधयित्वाविमुक्तिदाः । अतः शा
स्त्रज्ञानविधिर्नकथंचनयुज्यते । ३२ ॥ नयोगशास्त्रसंसिद्धानिरोधोपिविधीय
ते ॥ विमुक्तिसाधनत्वेनतस्यानधिगमाच्छ्रुतेः । ३३ ॥ अनुष्ठानुमशक्यत्वं अ
प्रत्यग्बोधंविनानमः ॥ प्रत्यग्ज्ञानेनिरुध्यंतेचित्ततद्वृत्तयोखिलाः । ३४ । वस्तुत १७६
स्तुनिरोधोस्तुभावास्तेतेन किंतव । प्रत्यग्बोधमृतेनान्यन्मुक्तेरस्तीहसा

धनं । ३५ । विधेयस्तर्हिसंतानदूतिचेत्तत्रकोविधिः । अस्त्वेनियमोवास्यात् परिसं
ख्याथवोच्यता । ३६ । अस्त्वेवात्यंतमप्राप्तौनियमः प्राप्तिकेसति । तत्रचान्यत्रचप्रा
प्तौपरिसंख्याविधीयते । ३७ । अत्रत्वत्यंतमप्राप्तमात्मोपासनमन्यतः । अस्त्वविधि
रेवातोयद्यैतस्यात्तथोच्यते । ३८ । एकार्थत्वेस्तुवैतानामातादात्म्यादिमानतः । आवर्त्तनंहि
शास्त्रार्थः सर्वत्रोपासनश्रुतेः । ३९ ॥ विद्युपास्त्योरिहैकत्वं
यदितर्हि विदेरपि । अर्थस्यावृत्तिरेवास्तु सर्वब्राह्मणवाक्यवत् । ४० । सर्वत्रैतस्मा
न्मवेदेत्येवंवेदनशास्त्रतः । उपासनंव्यवस्थंतंयाश्रुत्यंतरेष्वपि । ४१ । विद्याप्रक
रणंचात्रनविरुद्धमुपास्तितः । अपरोक्षब्रह्मविद्याजन्मनःमुलभत्वतः । ४२ ॥

नहिसिद्धार्थवाक्योत्थज्ञानमात्रेणकश्चन। ब्रह्मानुभवितुंशक्तस्तस्यावाक्यार्थरू
पतः।४३॥नानापदार्थसंसर्गरूपंवाक्यात्प्रतीयते। ब्रह्मासंसर्गरूपत्वान्न
वाक्येनानुभूयते।४४। नचावेदार्थतावाक्यावेदोक्तोपासनोत्थितात्॥ साक्षा
त्काराद्ब्रह्मभातितस्माद्वेदार्थनैवहि।४५। देवोभूत्वादेवमेतीत्यादिश्रुत्यनुरो
धतः। साक्षात्कारंध्यानजन्यमंतरेणानमुच्यते।४६॥ ब्रह्मज्ञानेसमुत्पन्नेऽपि सा
क्षात्कृतिभावना। श्रुत्यावृत्तिरूपायानाशैषाभ्यमानतः।४७॥ सिद्धार्थज्ञा
ब्रह्मायतविधितोवान्यतोऽथवा। तन्मात्रापिःशंकतेतज्ज्ञसिद्धार्थोविधायकः॥ २४७
अक्षरार्थज्ञानमात्रावमाप्यध्ययनेविधिः। नचान्यदत्रसंभाव्यमप्राप्तोपा

मनात्ततः।४९। अपूर्वविधिरेवातः स्मृतिसंतानगोचरः। इतित्रयमपेक्षायस्तस्पू
रणमुच्यते।५०॥ नापूर्वविधिरेषस्यात्प्राप्तत्वात्स्मृतिसंततेः। अनुभूते
हिविषयेस्मृतिंप्राप्तावविधिंविना।५१। स्मर्यंतएवपित्राद्याःश्राद्धाद्यर्थंतदा
ततः॥ अनुभूतोनिजात्मायंकृतोनस्मर्यतेवद।५२। नशाब्दज्ञानमात्रेणानुभूतं
ब्रह्मनद्रवेत्। अवाक्यार्थात्मकत्वेनेत्येतदत्रनसंगतं।५३॥ अवाक्यार्थात्मकं
ब्रह्मेत्येतद्वाक्येनगम्यते। अन्येनवायदावाक्यात्तदावाक्यार्थतांभवेत्।५४। अ
थान्येनानुभूतंतद्वाक्यार्थात्मकंतदा। तावतैवकृतार्थत्वाद्ध्यर्थध्यानादिचेष्टि
तं।५५। ब्रह्मसंसर्गरूपंचेद्वाक्यादध्यवसीयते। संसर्गरूपंनत्रेतिगीर्वाणी

रपिदुर्भणं ॥५६॥ घटाकाशोमहाकाशादुतिवाक्येयथातथा। तत्त्वमस्यादिवाक्येषु
क्तोखंडार्थधीर्नते ॥५७॥ साक्षात्कारोध्यानजन्यइत्युक्तंयत्तदप्यसत्। ध्यानं
क्रियानप्रमाणंकानुभूतिरमानतः ।५८। यथावस्तुतथाबुद्धिरनुभूतिरतोभवेत्
भ्रांतैवध्यानजन्याधीर्मृतपुत्रापरोक्षवत् ।५९। किंचवाक्येनयद्ध्यंतज्ज्ञांततेमते
ततः। तद्ध्यानंकोपयुज्येतसर्पध्यानसाम्यतः ।६०। अथसिध्यर्थवाक्येनब्रह्मा
नुभवइष्यते। अनुभूतिर्ध्वस्तमोहः कृतःस्मृतिमपेक्षते ।६१। मानार्थानुभवेना
त्ममोहोयदिननश्यति। तर्ह्येषस्मृतिमात्रेणसर्वथानैवनश्यति ।६२॥ अपिपा १४८
शुपतास्त्रेणविद्धश्चेन्नममारयः। सनिष्फलेषुतुन्नांगोनश्यतीत्यतिदुष्करं ।६३

अथात्मन्यवगतेमाद्यात्प्रमाणार्थसमाश्रितः। किमन्यस्मृतिसंतानात्प्रार्थ्यतेभव
ताफलं ।६४॥ भविष्यत्कालसंबंधिफलंस्यान्नहिनाकवत्। धीजन्मन्येवतत्सिध्ये
दग्निजन्मनिदाहवत् ।६५। किंचानुभवएवात्रनित्यंसंनिहितत्वतः॥ तथाप्यार
ब्धदोषेणबलाद्विस्मार्यतेपुमान् ।६६॥ मोचकात्प्रबलैर्मुक्तोबाणेमुनिवार्यते
प्रवृत्तत्वात्तथारब्धं कर्मज्ञानान्ननश्यति ॥७०॥ वाङ्मनः कायचेष्टानामभावेक
र्मणः फलं॥ भोक्तुंनशक्यतेतेनमनोविक्षिप्यतेबलात् ।७१॥ विक्षिप्तचित्तः पुरु
षस्तत्त्वसंस्मृतिवर्जितः॥ अविद्वानिवसंसारदुःखैरेषोभिभूयते ।७२। अवि
क्षेपेस्मृतिः प्राप्ताविक्षेपेतुनसाततः। पाक्षिक्यास्मृतिसंप्राप्तौतत्संतानोनिय

म्यते ।७३॥ उपस्थितंयदादुःखंतदात्मोपलब्धतये । आनंदात्मकमद्वैतंस्मरे ब्रह्म
पुनः पुनः ।७४॥ इत्येवंमृदुचित्तानांमतंभाष्यकृतस्तथा । अंगीकृत्यनरंचक्रु
रपूर्वविधिवारणे ।७५। अथैवमृतिरायातुकल्पांतनिचयेनवा । इत्यादिधी
रचित्तानांनित्यप्राप्तिरथोच्यते ।७६॥ यस्माद्वादितिवाक्योत्थ प्रत्यग्व्याख्या
त्मलेहिना । ज्ञानेनतमसोदाहान्नित्यप्राप्तौवृतस्मृतिः ।७७। देहादिभावना
लिंगादहंबुद्धेश्चयंपुरा । सदेक्षतेतमेवाद्यश्रुत्याब्रह्मतयेक्षते ।७८। ततश्च
प्राकृतोयद्वत्कर्त्रात्मानंसदास्मरन् । अस्तिविद्वांस्तथाब्रह्मस्मरत्वेतंविधेवि
ना ।७९॥ दुःखात्मनिचिदाभासेकिमायातंचिदात्मनि॥ चिदाभासेभोजिते

स्यादारब्धचरितार्थता ।८०॥ नष्टमोहस्यात्मतत्वेभोगंमन्येतनक्वचित् । नहिना
मविनिद्रोपिसुप्तवत्स्वप्नमीक्षते ॥८१। बलाद्विक्षिप्यतेचित्तंपित्यादियदुदीरि
तं । अस्त्येवतत्तालतात्रनित्यप्राप्तिर्नवार्यते ।८२॥ विक्षिप्तमपिचित्तमनात्मय
त्नेनयतं । प्रत्यगर्थमनालिंग्यनपराद्धोधनहामं ।८३। आत्मानंसर्वदोषात्तेत
त्प्रत्ययममन्वयात् । निःशेषानात्मबुद्धीनांयथैतत्स्यात्तथोच्यते ।८४॥ प्रत्य
ग्बोधः सर्वदैवभासत्वैतन्यबिंबितः । बुद्धित्रितयश्चैवंतत्तायोविस्फुलिंगव
त् ।८५। प्रागप्यनात्मसंबंधाज्जन्मप्रभृतित्रयः । आत्मनाप्रेरिताः सत्यः संब
द्धाः स्युरनात्मनि ।८६। स्वप्नेऽणएवमनूर्ध्वोद्वैर्नीनाविधैर्युतिं ॥ वियोगंवा

यथागच्छेच्चैतन्येऽज्ञानतोधियः।८७॥एवंमत्यर्थतःप्राप्तामदात्मस्मृतिसंततिः।
विमूढस्यापिउल्पावेदस्तुनःकिंविनंक्ष्यति ॥८८। यदिमोहाविनाशेनमत्यप्ये
षातिनिष्फला ॥विदुषस्तर्कमूढस्यसफलेत्यभ्युपेयतां।८९॥यःकिंफलमि
तिश्रेष्ठोविधिपक्षेप्यसौसमः।विधावदृष्टमितिचेदविधावपितत्समं ।९०।श्रु
संगिकनदीस्नानान्नादृष्टंहिजन्यते॥अर्थसिद्धव्रह्मचिंताप्येवंपुण्यप्रदाभ
वेत्।९१।जन्महीनस्यकिंपुण्यैरितिचोद्यंसमंद्वयोः॥अनिवार्यावस्तुशक्तिरि
तिउल्पंजडुत्तरं॥९२॥देहात्मचिंतामूढानांनित्यप्राप्तायघातया।विदुषांब्र
ह्मचिंतास्तुनातोनैयमिकोविधिः।९३॥नत्वेषापरिसंख्यास्याद्उभयत्रप्रसंग

तः॥अथात्मनिस्मृतिःप्राप्ताप्राप्तानात्मनिमातया।९४।२२००। कृत्यानुभूतमद्वै
तंद्वैतमद्यादिमाननः। उभयोरविशेषेणप्राप्तेस्मृतिसंततिः॥९५॥द्वैतस्मृति
निवृत्त्यर्थंअद्वैतस्मृतिसंततिः॥विधीयतेविधेर्द्वैतस्मृतिरोधःफलिष्यति।९६
मैवंकिंवास्तवद्वैतस्मृतिःप्राप्तेतवाधिता॥नाद्योवेदांतवाक्योत्थज्ञानेन
द्वैतबाधनात्।९७॥सम्यग्ज्ञानाग्निनिर्दग्धेब्रह्मण्येहेमवाधके॥मुक्ताश्र
ब्रह्मस्मृतिंनान्यवस्तुस्मृतिरुदेतिहि॥९८॥माननुविधानेनस्मृतिरन्या
नबाधिका।प्रमाणानुविधायिन्यातत्वस्मृत्यानुबाध्यते।९९॥लौकिका
नुभवोबाध्योवैदिकोबाधकोयथा॥तद्वन्न्ययोरपिस्मृत्योर्बाध्यबाधक

DR. BHAU DAJI MEMORIAL

तातथा ।९००॥ स्वास्थ्यास्वास्थ्यप्रदेयस्माद्ब्रह्मानात्मस्मृतीनतः । मुक्तानात्म
स्मृतिंब्रह्मस्मृतिमेवाश्रयेत्ततः ।१। ब्रह्मधीश्चुरत्वेपिबाधितद्वैतधींक्वचि
त् ॥ कदाचिज्जायतेसैषानिरोद्धुंयत्नमंगतं ।२॥ जीवनार्थंद्वैतभाननिरोधेजी
वनंकथं । अतोंशाक्तयानात्रयदिसंख्याविधिर्भवेत् ।३॥ तवश्रद्धाजडत्वंच
तन्निष्ठस्यैवप्रवर्तिता ॥ विधिचिंतावस्तुतत्वस्थितिसंक्षेपतः शृणु ।४। सकृद्विभा
तेचित्तत्वेरवौरात्र्यहनीयथा ॥ स्मृतिर्वाविस्मृतिर्वैतेसंभाव्येतेतथानहि । उ
पासीतेतिवाक्योक्तविध्यर्थंयदिएछसि ॥ तर्ह्यर्थस्मृतिविधंविधिर्ब्रह्मलक्षण १५१
लक्षितं ॥६॥ अज्ञातज्ञापनंतद्वदप्रवृत्तप्रवर्त्तनं ॥ विध्यर्थद्वयमेतद्धुवा कोस्मिन्

योजयिष्यते ।७॥ अज्ञाताज्ञाप्यतेतत्वेप्रत्यक् कूटस्यरूपता । उपासीतेतिशब्देन
तथाप्राकृप्रतिपादितं ॥८॥ कोहंकस्यकुतोभूवंकथंचेतिविचारकं । प्रवर्तयेद
ब्रह्मतत्त्वमुपासीतेतिगीरियं ।९। तथोत्पत्तिस्थितिध्वंसाजगतोस्यकुतोवृत्ति ॥
विचारोत्रविधेयः स्यादुपासीतेतिशब्दतः ।१०॥ विजिज्ञासस्वतपसाब्रह्मेत्यन्यत्र
चश्रुतं । अत्रत्वयव्यतिरेकारव्योव्यापारोत्रतपोमतं ।११। पर्यालोचनवाच्येषतपः
शब्दः श्रुतोमतः । संतापार्थेरथैवस्याद्ब्रह्मलक्षणवर्णनं ।१२॥ यतोभूतानिजा
यंतेतद्ब्रह्मेतिसमीरितं । लक्षणंचविचारार्थश्चैवंतत्रोपयुज्यते ।१३॥ एवंचोपा
स्तिरत्रात्मविचारः संविधीयते । सूत्रानुग्राहकोन्यायदृत्युक्तोन्यव्युदासतः ।

२४॥ ननुप्राणाद्यपूर्णात्मबोधो ऽकार्त्स्न्येनदूषितः ॥सो ऽकार्त्स्न्यदोषः शुद्धात्मबो
धैकस्मान्नसंभवेत्॥२५॥इत्यानंकापनुत्यर्थमत्रेदंश्रूयतेस्फुटं। अत्रह्येतेसर्वरा
कंनवंतीतिश्रुतेर्वचः।२६॥प्राणाद्युपाध्युपहिताःसर्वेप्यात्मानदूश्वरे। शुद्धात्मन्ये
कतांयांतिपुत्रभ्रात्रादयोयथा॥२७॥पुत्रोभ्रातापितेत्येकोभिद्यतेप्रतियोगि
भिः। पुत्रादयःसएकस्मिंस्तस्मिन्यांएत्येकतांस्वतः।२८॥आत्मनोनवदोषेण
संबंधोनात्मवस्तुनः॥रज्जुसर्पादिवन्नातःप्रतीचःशिष्यतेपराङ्।२९॥सर्व
मज्ञातमेवस्यात्यस्मिन्नज्ञातआत्मनि। ज्ञातेज्ञातंचतत्स्त्रीसौतावत्स्यान्न २५२
र्ववस्तुनः।३०॥युक्तानिरूप्यमाणस्यह्यात्मानस्यमनात्मनः। प्रत्याख्यातः

सचेत्तेनत्वनात्माशिष्यतांकथं॥२१॥अनात्मनोस्यतत्त्वमात्मनापकुतंवत
त्॥निस्तत्वोयमनात्मानः कथंसिध्यतुऊत्तरं।२२।स्वरूपंपरमात्मानंसे
वित्वासेहुमर्हति। तदज्ञानरोगस्यकिमन्यद्भेषजंभवेत्।२३॥ज्ञातायां
स्वैतन्मोहकल्पितानांयथैकता। प्रतीचोवतदज्ञानकल्पितानामेकतेष्यते।२४
एवंव्यवस्थितंवाक्यंकेचिद्वाचलतेन्यथा। समस्तव्यस्तरूपेणैकत्वात्मा
त्रोच्यतेकिल।२५॥विशेषसामान्यरूपोव्यक्तिजात्यात्मधेनुवत्। आत्मा
वस्याद्भेदावाल्याद्यावपुष्पोयथा॥२६॥भूम्याद्यात्मनः कार्य्यमृ
दोयद्वद्घटादयः। नाभिनेम्यरवश्चक्रस्यात्मनोन्नाद्भेदमताः।२७। एवंदृष्ट्वा

दिदृशंतैः समस्तव्यस्ततात्मनः। वास्तवेवक्रमेत्माक्रमस्तदेतन्नैवयुज्यते।२८। स
मस्तव्यस्ततांकिंतेज्ञेयत्वेनोपदिदृक्षते। उपास्यत्वेनवाहेधाप्यवाक्यानुष्ठिति
र्भवेत्॥२९॥ अनंतत्वात्पदार्थानांक्रमशोऽक्रमशोथवा॥ ज्ञानोपास्तीअ
शेषेणकर्तुंशक्येनकेनचित्। ३०॥ नचैकदेशविज्ञानेकृत्स्नत्वंलभ्यतेक
चित्॥ तस्मादशेषवेदांतानिर्विशेषात्मनिस्थिताः। ३१॥ नसमस्तेनचव्य
स्तेनोभयंप्रत्यगात्मनि। प्रत्यक्प्रवणयादृक्ष्यादृक्षतांयदिशक्यते। ३२
विशेषाणांकल्पितत्वान्निर्विशेषस्यवस्तुता॥ अतोकार्त्स्न्यमनाशंक्यंवि १५३
शुद्धात्मविबोधने। ३३। भ्रमाभासत्वमेतेनवाक्येनास्यनिवारितं। मात्वं

मंभाव्यतेनस्यपदनीयत्ववाक्यतः। ३४। अस्यसर्वस्यजगतआत्मेतियदुदीरितं। त
देतत्पदनीयंस्यादितिवाक्यस्ययोजनं। ३५। पदनीयेतिलक्षणेनप्रमातुंयोग्यतो
च्यते। अज्ञातत्वात्पुमर्थत्वात्स्वमाङ्योग्यतात्मनः। ३६। अव्याकृतव्याकृतयोरज्ञा
नात्मकतायतः। अतःआत्मातिरेकेणनाज्ञातोर्थोस्तिकश्चन। ३७। ज्ञेयार्थानर्थ
योर्यस्मात्समाप्तिःप्रत्यगात्मनि॥ परमः पुरुषार्थोतआत्मानवतिनेतरः। ३८।
अज्ञातत्वंपुराप्रोक्तमयाकृतगिरायथा॥ ज्ञेयार्थस्यसमाप्तिंतांवक्ष्यतेनेतिवा
क्यतः। ३९। अनेनतदेदमर्वमित्यात्मज्ञानमात्रतः। सार्वज्ञमुक्तमानंदस
माप्तिस्तुप्रवक्ष्यते। ४०। अन्यज्ञानेननान्यस्यक्वचिदस्यवबुद्धता। आत्म

ज्ञानेनसर्वमज्ञानंकथमुदीर्यते ॥४१॥ सत्यमेवंभवेदेतद्यद्यात्माप्यन्यदृष्यते। आत्मा
मावन्यइतिवनानुन्मत्तस्यगीरियं ।४२॥ अनन्यत्वेतृतीयेयमनेनेतिकथंभवे
त् ॥साधनार्थेतिचेदस्तुतदीयंभूतलक्षणा ।४३। आत्मार्थंयज्जगद्रूपंतेनरू
पेणतज्जगत् ॥ ज्ञातंतत्त्वविदात्मत्वमज्ञात्रमतत्वतः ।४४। उपलब्धौज
गत्सर्वमुपलभ्यंप्रकीर्त्तितं । प्रतीयतेजगत्तस्मादधिष्ठानपुरःसरं ।४५॥ उप
लब्धोस्तिमन्ऊंमोलंबोष्टेदेशकालवान् ॥ एवंएवंनिरेकेणनोत्तरार्थोनु
भूतये ।४६॥ मात्रादिव्याप्तेः सर्वंसंविन्त्वात्मन्यवस्थिता । अकस्मा दुदि १५४
ताबुद्धिः ऊंमादीस्तत्रकल्पयेत् ।४७॥ अक्रियेपियथाव्योम्निद्रु ति

"

स्थितिहानिभिः ॥ जगन्ननर्त्तिमय्येवंमदसद्विश्वरूपधृक् ।४८। प्रत्यक्तत्वेपरिज्ञाते
जगत्तत्संघबुध्यते ॥इत्यत्रपदद्दशंतोयथावत्सविविच्यते । ४९॥एकंपदंयथाश्व
स्यदृष्ट्वाश्वत्वमनेषतः ॥ दृष्ट्वानेवनवतिदृष्टोश्वइतिवर्णनात् ॥ ५०॥ एवं
स्वदेहमात्रस्थेसाक्षित्वेवलोकिते । अशेषजगतस्तत्वंलभ्येतेवनसंशयः ॥
५१॥ ज्ञानार्थेप्रकृतेप्यत्रलाभार्थेनोपसंहृतिः । युक्ताब्रह्मात्मतत्वेस्मिन्नेकार्थ्य
ज्ञानलाभयोः ॥५२॥ नित्यलब्धस्वरूपस्यज्ञानात्स्यादवलब्धता ॥ ज्ञानमात्रंत
स्यलाभः कर्णेचामीकरादिवत् ।५३॥ कीर्त्तिंचशिष्यसंघंचलभंतेब्रह्मवेदना
त् ॥ नित्यानुवादोप्येषोत्रप्रवृत्त्यर्थमुदीर्यते ।५४॥ आनंदस्यसमाप्तिर्यात्र

त्यगात्मविमूत्रिता। सावर्णतेनूनूत्यात्रस्यष्संर्वजनीनया।५५।वित्तात्पुत्रः प्रिय:पुत्रात्पिंडः पिंडात्तथेंद्रियं। इंद्रियेभ्यः प्रियः प्राणः आत्माप्रियतरस्ततः॥ ५६॥ स्वात्मभोगस्यहेतुत्वात्प्राणादोप्रीतिरिष्यते॥ नस्तनोनसामुख्याच्चात्मा प्रीतिर्यथातथा।५७॥ अतीचिनिर्निमित्तैवसर्वावस्थासुवीक्ष्यते। प्रीतिरग्नौष्णव त्तस्मान्मुख्यात्मावितिगम्यतां।५८॥ सर्वांतरत्वेनयुज्येतनिर्निमित्तता। बाह्ये षुसनिमित्तत्वंप्रीतेःस्यष्टंगवादिषु।५९॥ व्याध्याद्युपद्युतोलोकेमृतिमप्य भिवांछति॥ निर्निमित्तप्रियत्वेतुदेहादेस्तन्नयुज्यते।६०। अनात्मात्रियइत्येव योमुह्यतिपरात्मनः॥ विनाशित्वमुदाहृत्यमूढंतंबोधयेद्बुधः॥६१॥ अ

DR BHAU DAJI LAD

नात्माभोगकालेस्यमुख्यावत्त्रयछति॥ तस्महस्रगुणंदुःखंनाशकालेददातिहि ६२॥ याप्रीतिरविवेकानांविषयेष्वनपायिनी॥ व्युत्थाप्यविषयेभ्यस्तांप्रतीच्येव निवेशयेत्।६३॥ विषयादूषनंत्यक्तुकदाचिदपिनशक्यते॥ अतोदुःखप्रहत्वंतु शंकितुंचनशक्यते।६४॥ इत्यानंदज्ञेयवस्तुसमाप्तिभ्योपुमर्थता॥ सिद्धाप्रतीचः सप्रत्यक्पदनीयोभवेदतः।६५॥ ब्रह्मंचपदनीयंचस्वात्मतत्वंयतस्ततः। य दात्मविद्यासूत्रंतद्व्याख्यातुंयोग्यतामियात्।६६॥ पदच्छेदःपदार्थोक्तिर्वि ज ग्रहोवाक्ययोर्गपना। आक्षेपश्चसमाधानंव्याख्यानंपंचलक्षणं।६७॥ पदच्छेदा दयःसूत्रेविस्पष्टत्वात्तदुपेक्षिताः॥ तत्राक्षेपसमाधानेक्रियेतेबुद्धिशुद्धये

६८॥ सूत्रार्थज्ञमनुष्याणां मितिं विज्ञाय केचन । मुमुक्षवो गुरुं प्राप्य चोदयंत्यतिसं
त्रमात् ।६९॥ यद्ब्रह्मविद्यया सर्वभावाप्तिं मन्वते नराः ॥ तद्ब्रह्मकिंविदित्वाभूत्स
र्वमित्येतदीर्यतां ।७०॥ एवं मुमुक्षुर्निश्चोद्य कृतैकक्रतुयाजुरुः ॥ अन्यायासेनत
त्त्वंपरिदर्तुंवचोब्रवीत् ।७१॥ ब्रह्मैवबोधात्साक्षीवोभूत्वात्मानमवेत्युनः । अहं
ब्रह्मेतितद्बोधात्सर्वात्मकमभूत्तदा ।७२। न्यायेनैतिविचार्येतेशिष्यचोद्यगुरू
त्तरे ॥ तद्विचारेणसूत्रार्थोव्याख्यातोविशदोभवेत् ।७३॥ अव्याहतानुगत
वस्तुब्रह्मगिरोच्यते । मुख्योहतिधात्वर्थएवमत्युपपद्यते ।७४। तद्यावेद्य २५६
ते बुद्ध्यावेदवाक्येन जन्यया । ब्रह्मविद्येतितांसाक्षाच्छ्रुतीःप्रतिजानते ।७५॥

बुद्धि

विद्यायाः कृत्स्नभावाप्तौसाधनत्वंतृतीयया । अतंतस्मात्कृत्स्नत्वमविद्याकल्पितं
मतं ।७६। द्योतिकैवलवेद्विद्याकारिकानयतस्ततः । सर्वात्मभावः सर्वेषांसिद्ध
प्रागपिबोधतः ।७७। दृष्टार्थत्वानुविद्यायानाग्निहोत्राधिकारवत् । अधिकारोवैध
हेतुरपेक्षः कश्चिदिष्यते ।७८॥ विहिताः शांतिदांत्याद्यादृष्टादृष्टोपकारिणः ।
स्त्रीशूद्रान्त्यपिशांत्यादियुक्ताश्चेदधिकारिणः ।७९। अग्निहोत्राधिकारोवैतेषांनै
वविद्यानिषिध्यते ॥ वेदाधिकृत्यभावेपिपुराणेष्वधिकारिणः ।८०। मनुष्यमात्रो
विद्यायामधिकारीभवेद्ध्रुवं ॥ यतोतः सर्वभावादिमनुष्यादुत्पादीरितं ।८१। कर्मभ्य
दृवविज्ञानात्फलप्राप्तिंमुनिश्चितां । मन्यंतउनयत्रापिश्रुतिमानाविशेषतः ॥

८२॥ मनुष्यवेद्यंयद्ब्रह्मतदकृत्स्नमनंयदि। दृश्यंतिर्यंविहीनत्वादमुख्यार्थःप्रसज्य
ते।८३॥ मुख्यंब्रह्मैववेत्तस्माद्गौणंब्रह्मापसंभवात्॥ गौणंमुख्यस्यपूर्वत्वान्निर
र्थंब्रह्मगीर्नवेत्॥८४॥ अथकृत्स्नंब्रह्मतर्हिस्वतोवापरतोथवा। तत्कृत्स्नत्वस्व
तस्त्वेनुब्रह्मविद्यानिरर्थिका।८५। परतोपिचस्वतोकृत्स्नत्वेब्रह्मत्वंदुःस्थसिद्धं
कं॥ क्रियातोज्ञानतोवातद्यदिवोनयसंश्रयात्॥८६। नक्रियातोब्रह्मतास्यादुप
स्यादिप्रसंगतः॥ नाद्यंतौब्रह्मणोयुक्तावपूर्वत्वादिशास्त्रतः।८७॥ परस्परविरो
धेनज्ञानकर्मसमुच्चयः। पुरैवदूषितःपश्चादप्यसौदूषयिष्यते।८८। अथज्ञानो
त्कृत्स्नतास्यात्तत्तदाज्ञेयंतुकीदृशं॥ किंस्वरूपमन्यद्वास्वरूपत्वंविरुध्यते॥ २५७

८९॥ स्वयंज्ञातास्वयंज्ञेयमित्येकस्मिन्कथंनवेत्। नहिस्वस्कंधमारोढुंनिपुणोपी
हशक्नुयात्।९०॥ ब्रह्मणोज्ञेयमन्यच्चेत्तत्किंब्रह्मांतरंनवेत्॥ अब्रह्मवाग्रिमे
कल्पेह्यनवस्थाप्रसज्यते।९१॥ द्वितीयेब्रह्मणःकार्त्स्न्यंनवेद्ब्रह्मविद्यया। तथा
सत्यस्मदादेश्चब्रह्मविद्यानिरर्थिका॥९२॥ इत्यादिखंडनैरेवचोदयंतिमुमुक्षु
वः॥ एतावताचविद्यायाश्छिन्नेकर्तृकर्मणी।९३॥ कृत्स्नाकृत्स्नविकल्प्या
भ्यांविद्यायाःकर्मदूषितं। स्वरूपान्यविकल्पाभ्यांविद्याकर्तापिदूषितः।९४॥
अतोकिंशाद्रभावर्त्सीचोद्यद्वायमुदीरयेत्॥ किंतद्ब्रह्मेत्येवमेकंकिमवेदितिं
चापरं।९५॥ २३०१ शिष्यचोद्यस्यतात्पर्यमेवंतावद्व्यवस्थितं। गुरूत्तरस्य

तात्पर्यंयथावत्प्रतिपाद्यते।९६॥योगुरूत्तरवाक्यादौब्रह्मशब्दोस्त्यनेनकः।उक्तो
र्थः किंविराट् किंवामर्त्योयद्वापरेश्वरः।९७॥ विराट्स्यात्सपरंब्रह्मविद्याकर्त्रे
तियुज्यते।यतोऽपरब्रह्मविद्याफलंसर्वमवाप्तवान्।९८॥मैवंनपरविद्यार्थंशा
स्त्राधिकृतिर्भवेत्।विराजःकिंत्वनायासात्परविद्योदितामतः।९९॥उपा
सीतेतिसूत्रस्यव्याख्यानत्वाद्विचारणा।ब्रह्मकृताधिकृतिस्तत्रमनुष्यस्यभविष्यति
९००।वोद्यवाक्येमनुष्याणांविचाराधिकृतिःश्रुता।तस्मान्मर्त्येब्रह्मभावी
ब्रह्मशब्देनभण्यते।९१॥भाविनीहस्तिमाश्रित्यप्रयोगोदृश्यतेयथा।ओदनंप २५८
चतेत्यादिमंथेहापिभविष्यति॥२॥ इतिव्याचक्षते केचित्तदप्यत्रनयुज्यते

अब्रह्मत्वंस्वतःकिंवाकल्पितंब्रह्मभाविनः।३॥स्वतस्त्वेविद्ययानैतन्निवर्त्तेतिक
श्चन।ब्रह्मत्वंचेत्तयोत्पाद्यंमुक्तानित्यत्वमापतेत्।४॥अब्रह्मत्वंकल्पितंचे
त्स्वतःस्याद्ब्रह्मता तदा।कल्पनैवंदृष्टैवस्याद्ब्रह्मभावीतियाकृता॥५॥ बोधा
त्सर्वमपिब्रह्मसर्वजंतुःस्वभावतः।अब्रह्मत्वमविद्योत्थंविद्ययातन्निवर्त्तते
६॥अतःसंत्यज्यमुख्यार्थंब्रह्मभावीतिकल्पने।कृतार्थहानिरत्रस्यादकृ
तस्यचकल्पना।७॥अनुईत्यन्नाविनाऽपेक्षाभासद्विज्ञानमात्रके।ब्रह्मण्यत
द्विधाविधानसंभावेतिचेन्नतत्।८॥अविद्याविषयत्वंकिमसंभाव्यमुतात्मनः।
अविद्याकर्त्रतातत्रनाद्योविद्याविधानतः।९॥अविद्यारहितत्वेनुज्ञातंब्रह्मस

दातनं॥ विद्याविधानंविज्ञातेपिष्टपेषणवद्भवेत्॥१०॥ नवेद्मीत्यनुभूतिश्चसर्वेषांस्वा
त्मसाक्षिका। कुंठानुभूतिवत्तस्मान्नैवाविद्यापलप्यतां॥११॥द्वितीयेब्रह्मकर्तृ
त्वं वार्यतेवान्यकर्तृता। आपाद्यतेवेष्टमेवब्रह्मकर्तृत्ववारणं॥१२॥ अकार्यायां
अविद्यायाः कर्त्रपेक्षाऽऊतोनवेत्। अन्यकर्तृत्वमप्यत्रतदन्यासंभवान्नहि॥१३॥
नहिब्रह्मातिरेकेणकश्चिच्चेतनइष्यते। नान्योनास्तीतिशास्त्रेणदृष्टाद्यंतरवार
णात्॥१४॥ ननुशास्त्रोपदेशोयमेवंसत्यफलोभवेत्। नासौब्रह्मणिसाफल्यंना
प्यन्यस्मिन्समश्नुते॥१५॥ उपदेशानपेक्षत्वंतद्ब्रह्मत्वंपरात्मनः। असंभवात्त
दन्यस्यह्युपदेशोऽफलोभवेत्॥१६॥ ज्ञातेब्रह्मण्युताज्ञातेशास्त्रवैफल्यमुच्यते

आद्यदृष्टेद्वितीयेनुबोधः शास्त्रात्फलिष्यते॥१७॥ नचबोधस्यवैयर्थ्यंतेनाबोधनि
वर्त्तनात्। तन्निवृत्तिस्तुदृष्टत्वान्नाद्वैतेपिविरुध्यते॥१८॥ नदृष्टेनुपपन्नत्वंशंका
याश्चसमानतः॥ आशंक्यतेतावदेवयावत्स्वानुभवोनहि॥१९॥ अबुद्धत्वंवि
बोधात्सागनुभूतंयथातथा॥ बोधाद्ध्वंमबोधस्यनिवृत्तिरनुनूयते॥२०॥ ननुजी
वेशवाक्याभ्यांकर्त्रकर्त्रौविबोधनात्। तर्कशास्त्रप्रसिद्धेश्चस्याज्जीवोब्रह्मणः ए
थक्॥२१॥दुःखापनयनार्थत्वाच्छास्त्रेधिक्रियतेहिमः। तथाचब्रह्मभावीतियुक्तै
वैषात्रकल्पना॥२२॥मैवंब्रह्मोपदेशार्थंशास्त्रानर्थक्यमक्तितः। संसारिविद्यये।
वास्यपुरुषार्थस्यमापनात्॥२३॥ ब्रह्मभाविनिजात्मानमेवावेद्धियातया॥अ

DR BHAU DAJI MEMORIAL

न्नसर्वमितिप्राप्तः पुमर्थोजीवविद्यया।२४॥ततश्चमत्यज्ञानादिवाक्येनब्रह्मबोध
नं। व्यर्थस्याद्ब्रह्मविद्यायाः फलांतरविवर्जनात्।२५। अथब्रह्मण्यविज्ञाते
ब्रह्मास्मीत्यात्मनीसंपत्कर्तुमशक्यास्यान्नस्मिन्ज्ञातेनुशक्यते।२६। ब्रह्मविज्ञा
नमात्रेणनकस्यापिकृतार्थता।पारार्थ्ये नैवसर्वत्रविज्ञानंफलंवन्मतं।२७। नेत
देवंन्नदपादैर्ब्रह्मज्ञानातिरेकिणः। ज्ञानस्यैवपरार्थत्वमितिस्पष्टमुदीरितं।२८।
सर्वत्रैवहिविज्ञानंसंस्कारत्वेननिश्चितं। परांगंचात्मविज्ञानादन्यत्रेत्यबुधार्य
तां।२९।अतोब्रह्मण्यविज्ञातेतावतैवकृतार्थता।संपत्त्यहेत्वहंब्रह्मेत्येतद्गौण
प्रसज्यते।३०॥ सामानाधिकरण्येक्तिर्वस्त्वैक्येमुख्यतांव्रजेत्। खंछिद्रमुत्पलं

नीलमित्यादौनदृष्टेरुणात्।३१। अन्यस्मान्यत्रसंपत्त्यात्सिंहस्यपुरुषेयथा।मा
मानाधिकरण्यंचगौणांसिंहःपुमानिति।३२। ब्रह्मैवनवतीत्यादिब्रह्मभावफलं
चयत्। संपत्तौनन्नयुज्येतनान्यदन्यद्भवेत्क्वचित्।३३॥ अन्यथायोषितोग्नित्वं
सिंहंस्याद्ध्यानमात्रतः।ब्रह्मध्यानजन्मंचेदनित्यंस्वर्गवद्भवेत्।३४। तन्मोमा
त्रातरायत्वादाप्तमप्याप्यतेयुक्तं।नवसंपत्तमोदंनिमिथ्याज्ञानात्मकत्वतः।३५॥ न
चसंपत्तिमात्रेणदुःखिनोदुःखसंक्षयः॥आनंदरूपतावातःफलशास्त्रस्यबाधनं॥
३६॥अहंब्रह्मेत्यतोनैवसंपत्तिःकिंतुतादृशं॥ब्रह्मात्माखंडवस्त्वत्रशास्त्रेणप्रतिपा
द्यते।३७॥ कौटस्थ्यन्नमदेहादौब्रह्मतानमदन्यता।साक्षित्वाद्ब्रह्मतत्त्वस्यतस्मात्त्व

त्पङ्गनिद्यते।३८। कौटस्थ्यंब्रह्मणोरूपंमाहित्वांप्रत्यगात्मनः। अन्योन्याश्रयदोषेणनैत
दृष्टंतेनैकतातयोः।३९।अविद्यानानुगतमखंडंब्रह्मवेत्तदा। तद्विद्यायांसमारोप्य
मब्रह्मविद्येतिनिश्चिता।४०। संपत्तौजीवविद्येषाब्रह्मविद्यायवेत्ययं। मंदहएवपुं
मः स्यात्संन्यायात्माविनश्यति।४१। सर्वथाब्रह्मभावीतिकल्पनानैवयुज्यते। पर
ब्रह्मैवविद्यायामधिकार्यत्रवर्णितं।४२। परब्रह्मणएपयुक्तैषासाधकत्वप्रकल्पना। इति
चेच्छ्रुतिमेवैवंत्वमुपालभसेनमां।४३। विद्याधिकारिणंब्रह्मशास्त्रंप्रायुंक्तनोवय
मुपालंभस्वदीयोत्तत्त्यागमेपर्यवस्यति।४४। अत्तमाभवतः केयंसाधकत्वप्रकल्प
ने।किंनपश्यसिसंसारंतत्रैवाज्ञानकल्पितं।४५॥ अनात्मवस्तुयत्किंचित्तत्र ब्रह्मा

व नबोधतः।ब्रह्मणेवसमध्यस्तंशुक्तिकारजनादिवत्।४६। यच्चोद्येवादिभिःप्रोक्तंकृ
त्स्नाकृत्स्नादिखंडनं।तत्रयाह्यःकृत्स्नपक्षोनदोषोत्रमनागपि।४७। नकार्त्स्न्यंग्रा
हिमानेनहैतापत्तावकृत्स्नता।शंकनीयायतोमानंमेयस्यर्द्धिनकुत्रचित्।४८। ऐका
त्म्यस्यैवमेयत्वात्तत्थैवावबोधयेत्। अन्यथास्यादमानेत्तमयथावस्तुबोधिनः॥
४९। अवास्तवत्वान्मानस्यहैतंनैतत्प्रसज्यते। अवस्तुनोपिमानत्वंवस्तुत्वावबोध
नात्।५०। प्राग्बोधान्मानमात्रादेर्वस्तुत्वमवभासते। ऊर्ध्वंतुनैकवस्तुत्वंभासतेवा
धितत्वतः।५१॥ स्वतोवापरतोवेतिकृत्स्नत्वेयद्विकल्पितं। तत्रस्वतस्त्वसौदेयंनच
विद्यानिरर्थिका।५२। स्वतः कृत्स्नमपिब्रह्मस्यादकृत्स्नमविद्यया। तदविद्यापनुत्त

र्थं ब्रह्मविद्योपयुज्यते ॥५३॥ अहमेवपरं ब्रह्मेत्यस्यार्थस्याप्रबुद्धता । अविद्येतिवयंब्रू
मोयेह नास्तिमदात्मनि ।५४। परात्मनि तु चैतन्यंनित्यंस्याच्छशिशैत्यवत् । अवि
द्यानतद्यातन्नयुक्ताचंद्रेयद्योक्षता ।५५। अविद्यमानैवाविद्यावस्तुतत्त्वविचारिणां ॥न्न
विचारेणमूढानांवज्रादपिदृढायते ।५६। बुद्धतत्त्वस्यलोकोयंजडोन्मत्तपिशाच
वत् । बुद्धतत्त्वोपिलोकस्यजडोन्मत्तपिशाचवत् ।५७। बुद्धतत्त्वोहिसंसारिलोकचे
ष्टाविडंबकः । संसारिलोकोप्येतस्यबोधभाषाविडंबकः ।५८। तस्मात्व्युत्पन्नत २६२
स्यमास्तविद्याविदात्मनि । अव्युत्पन्नस्यदृष्टैषानवेत्तीत्यनुनूयते ।५९। नालुप्तचि
त्यविद्येतियोब्रवीतिदुराग्रहात् । सोलुप्तचित्वेवेत्यस्यकेनेतितदुदीर्यता ।६०। मा

नेनवेन्नदामानमज्ञातार्थंविनानहि । ततोबलादविद्येयमंगीकार्याविदात्मनि ।६१। अंगी
कृताप्यवस्तुत्वाद्बाधिकानेतिचेन्नतत् । अवस्तुताप्रजानानंबाधेनैवहिवस्तुवत् ।६२
रज्जुसर्पोप्यप्रबुद्धंनीषयेन्नास्तिकाहिवत् ॥विद्यावैयर्थ्यदोषोतोनैवास्मान्प्रतिढौकते
६३। अनादेरपिबाधोस्तितमसोविद्ययायथा । प्रमाणानांप्रमाणत्वंनक्वचिद्वःप्रसि
ध्यति ।६४॥ अज्ञातज्ञापकंमानमनाद्यज्ञानबाधया । घटादावपिमानत्वंलभते
किमुतात्मनि ।६५। एतावतामुमुक्षूणांवोद्येयत्कर्तृदूषणं । तन्निराकर्तृविद्या
याः कर्तृब्रह्मेतिसाधितं ।६६। ब्रह्मणोज्ञानकर्तृत्वंयदुक्तंतदिहाधुना । ब्रह्म
वादूदमग्रेभूदितिवाक्येपियोज्यते ।६७। निर्णीतोब्रह्मनाद्यार्थो वेदशास्त्रावधूतौ

भवेत्॥ इदमपि जीवरूपमिदंशब्देनकथ्यते। इदमविद्यायाः प्राक्तनः कालश्चक्रोयइ
तिशब्दितः। अभूतभवनंचैवमासीदितिपदोदितं। इत्थं सुखंब्रह्मैवबोधात्प्राक्ना
मरूपप्रवेशनात् जीवरूपमभूत्तेनविद्यायाः कर्त्तनङ्गवेत्॥७०। एवंस्थितेत्रवा
क्यार्थेवाशब्देनावधारणात् सूचितंजीवमिथ्यात्वंयत्तस्यपुरीर्यते॥७१। जीव
भावदशायांचब्रह्मैवनतदन्यथा। अनिर्ज्ञीतात्मतत्त्वंमद्ब्रह्मेवविभातितत् अ
ज्ञानतऋजीवत्वसंगतिर्ब्रह्मणोत्रका। कार्यकारणता होस्विदात्मात्मीयत्व
लक्षणा। ७२। ब्रह्माकार्यमनादित्वादविकारादकारणं। आत्मात्मीयत्वसंबंधो
ब्रह्मणस्तरवस्तुनः॥७३॥ सतोनिरात्मनोर्ब्रह्मभवेदज्ञानकार्ययोः॥ स्वरूपंते

नसंबंधआत्मात्मीयत्वलक्षणः॥७५॥निरात्मात्मात्मकत्वायस्वात्मद्वयमपेक्षते। तेना
विद्यास्वयंमेकुं ब्रह्मतत्त्वेनयुज्यते॥७६। कूटस्थत्वादसंगत्वान्मोहनकार्यसंगतिं
ब्रह्मनापेक्षतेनापिताभ्यांयुज्येतकर्हिचित्॥७७॥नीलत्वेनवियद्योगः खद्वत्वापे
क्षयानमन्। आत्मनैवंतमौयोगोनात्मवृत्तानुरोधतः॥७८। अविद्यावृत्तवीहा
यामन्यसंगतिरात्मनि। नात्यात्मात्मीयरूपेणस्याङ्गगस्यात्मकंततः॥७९॥प्र
त्यग्रूपातिरेकेणनान्यद्रूपमनात्मनः। वादिनिर्युक्तिनिःशंकंकश्चिन्साधयितुं
सदा॥८०॥स्वरूपशब्दवाच्योयंसर्वत्रात्मैवनेनरः। तथाचात्मातिरेकेणस्वरू
पंकस्यसंभवेत्॥८१। अतोऽविद्यामहानिद्रामवीतमनसामसौ। जन्मादिविक्रि

यावद्दृक्समदर्शनविभ्रमः ।८२॥ ब्रह्मैवमस्मत्तः साक्षात्तदबोधैकहेतुतः । इदंरू
पंममापेदेरज्ञाने वाहिरूपतां ।८३। अविद्याफलकाष्ठंवस्तु विद्याधिकारितां॥
वेद्यवेदितृरूपेणद्वैविध्यात्प्रतिपद्यते ।८४। स्वतोमुक्तंब्रह्मयस्मात्तस्माद्वेद्यत्वमर्ह
ति। संसारित्वमविद्यातोमुमुक्षुत्वंततोर्हति ।८५। ब्रह्मवादुदमग्रेभूदितिवाक्येगु
रूत्तरे ।श्रुतेविद्याधिकारित्वंयत्तद्ब्रह्मणिसुस्थितं ।८६। किमवेदितिवेद्यस्ययत्रा
क्षेपउदीरितः । तंसमाधिमुराहैतत्तदात्मानमवेदिति ।८७। स्वरूपस्यैववेद्यत्वे
स्वस्कंधारोहहर्षणं। यदुक्तंतदसद्यस्मात्सोपाधिर्वेदितातत: ।८८। अवेत्सोपाधि १६४
रात्माक्षयमात्मानंनिरुपाधिकं । ज्ञातृज्ञानज्ञेयभेदान्नदोषोत्रमनागपि ।८९।

वि

अविक्रांतस्तुदेहाद्यैरात्माभवतिवेदिता।विविक्तात्मावेदितव्योधीवृत्तिर्वेदनंभवेत्॥
९०॥ योवेदितानाद्यहंधीनामात्मनोपेक्षवेदिता। घटादीनामात्मनश्च बुद्धिरेवहि
वेदनं।९१। वेद्यंवेदनसामग्रीत्युभयंतु विशिष्यते। प्रत्यक्षादीनिसामग्रीघटादौ
श्रुतिरात्मनि।९२। यद्गोचरास्मात्सामग्रीज्ञानंतद्गोचरंयथा। रूपगोचरदृग्ज
न्यवेदनंरूपगोचरं।९३। तथात्मगोचरश्रुत्याजन्याधीरात्मगोचरा॥ स्वाभाविका
त्मावेद्योत्रमर्वोपाधिविवर्जितः।९४।२४०। प्राणित्यपानितिव्यानित्युदानितिस
मानिति। प्रविरूपदेहैक्यः सोयमात्मास्वाभाविकोमतः।९५। प्राणनादिक्रियैवा
त्र विस्पष्टात्मानुनस्फुटः। इतिचेन्नह्यसौदृष्टःश्रोतामंतेतिनिश्चिनु।९६। ज्ञानरू

क्रियासुचैतन्यमाविर्भवतियद्यपि। तथापितदुपाधित्वान्नश्यद्दृष्टिरितीच्छसि।९७। दृ
ष्टेर्द्रष्टाश्रुतेःश्रोतामतेर्मन्तेतिगम्यतां। अनित्यदृक्घटदृष्टेर्दृष्टात्रुनित्यदृक्सदा।
९८॥ घटःकालविभेदेनदृश्यतेनचदृश्यते॥नकदाचिन्नदृश्यंतेदृष्टिश्चत्यादिदृत
यः।९९।स्वदृश्यमानेघटेरूपंनेक्षतेपिहितेक्षणः।अपश्यतोरूपदृष्टिरनित्येत्यव
गम्यते।१००। दृष्टिश्चत्यादिविषयायादृष्टिःसात्मनाश्रिनी॥विषयान्यैनिचारेपिनैव
व्यभिचरत्यसौ।१। घटाद्याभासदृष्टिस्तुस्वप्नेध्वस्यापिविद्यते।चक्षुर्दृष्टिविनाशेपि
यादृष्टिःसाविदात्मदृक्। वामनाप्रत्ययोदृष्टौस्वप्नजाग्रदवस्थयोः।यथासौनित्य
दृष्टिःस्यात्सामुन्मोचननश्यति।३। द्रष्टुर्दृष्टेर्नलोपोस्तिमुग्धानांलोपविभ्रमः।

DR. BHAU DAJI MEMORIAL

दृश्यलोपेकृतोनोचेत्सुप्तिःकेनप्रसिध्यति।४। सुप्त्यादिसाधिकादृष्टिरेवंरूपंचि
दात्मनः। वक्रेरिवौष्ण्यमात्मानमेतमेवाधिकार्यचेत्।५। अधिकारित्वमापन्नंब्र
ह्मसोपाधिरूपदृक्। नित्यदृग्रूपमात्मानमेवावेन्निरुपाधिकं।६। विज्ञातारंन
विजानातेर्विजानीयादितिश्रुतेः॥नैवात्मावेदितुंशक्यइतिचेन्नतयेक्षणात्।७। वि
ज्ञातेरपिविज्ञात्रानविज्ञेयःकदाचन। इत्येवंवेदनेब्रूहिस्यादशक्तिस्तवात्रका॥८
नैवातावतास्फुरत्यात्मास्फोरकोज्ञानवर्जनात्। इतिचोद्यमचोद्यंस्यादन्यज्ञानान
वेक्षणात्।९। नित्यदृग्रूपआत्मेतिधीरत्रिःशास्त्रतोयदि। असंदिग्धामुमुत्पन्ना
तदास्यस्फोरकेणकिं।१०॥ निश्चिनोतियदाशास्त्रादात्मनोस्फोर्यरूपतः। तदास्फो

रकमाकांक्षन्ननुन्मत्तः कथंभवेत्।१२। नाविद्यमानेविषयेस्यादाकांक्षात्रधीमतः। दृग्
त्मस्फोरिकादृष्टिर्नसंभवतिकुत्रचित्।१३। दृष्टेवदृष्टीधीवृत्तिरात्मावेत्यनयोर्नधीः।१३
क्तात्मानंस्फोरयित्रमात्मनास्फोर्यतेयतः।१३। आत्मदृष्टिश्चनात्मानंस्फोरयेदविकारितः॥ स्फोरकासंभवाद्धीमान्नस्फोरकमपेक्षते।१४॥ अविद्यारोपनिष्कृत्यैतमात्मानमवेदिति। आत्मानिमुरवधीवृत्तिरात्मवेदनमुच्यते।१५॥ आत्मानमेवतद्वेदित्युक्तादेवकारतः। निर्मोल्यवत्परित्याज्यंदेहादीत्यवगम्यते।१६। त्यज्यमानेतुदेहादावात्मैकोवशिष्यते। परित्यक्तुमशक्यत्वादात्मानंनिकुतेत्रकः।१७। अन्योन्यं विवदंतेयेवादिनस्तेस्मदात्मनि। संवदंतेहि सर्वेपितस्यानुभवरूपतः।१८। साध

नंहषणंसर्वमनुभूतिबलाश्रयात्। सिद्धायतेवादिनांमानुभूतिस्तेनसंमता।१९। अ
भावोयेनभावेनज्ञायतेशून्यवादिनां। तस्यभावस्यभङ्गोवोवदकेननिवार्यते।२०॥
व्यभिचारिनयत्रास्तिप्रमाणंसर्ववादिनां। स्वयंहिस्माचयन्सिद्धंतदपह्नूयतेकथं।२१।
अनुभूत्यवसानानिसर्वमानानिमानतां। लक्षणेनान्यथानातोव्यभिचारःकथंचन॥
२२॥ सिध्यंतिसर्वमानानियत्रमादात्तदन्यतः। कस्मान्नसिध्येत्तत्तुल्यमहिम्नैवसिध्यति।२३। अप्राप्तःप्राप्यतेयोयमत्युक्तस्त्यज्यतेतथा। जानीयान्नमनात्मानंबुध्यंतंवपुरादिकं।२४॥ त्यज्यमानेपिनत्यक्तःप्राप्यतेमानेपिनाप्यते। आगमापायसाक्षीयःस आत्मानुभवात्मकः।२५। उत्सार्यानात्मनःसर्वान्नत्वयव्यतिरेकतः। प्रत्यक्प्रधानया

दृष्यानिजात्मानमवेत्यरं।२६।अहंब्रह्मास्मीतोजीवदृत्यवेद्ब्रह्मरूपतां।ब्रह्मोधितस्याह
मर्थस्यपुंजपतेब्रह्मरूपता।२७।ब्रह्मतानात्मनोन्यत्रनात्मताब्रह्मणोन्यतः।त
द्याथात्म्यप्रबोधाद्युतयोरेषविपर्ययः।अब्रह्मानात्मताहेतौप्रत्यक्कूधांतेनिवर्त्ति
ते।२८।आत्मानमेवब्रह्मेतिनिर्विघ्नंप्रतिपद्यते।२९।अविश्वासोत्रविघ्नश्चेन्नतस्या
विषयत्वतः।सर्वविश्वासहेतुत्वादविश्वासःकथंत्मनि।३०।सर्वोप्यात्मनिविश्वस्यत
तोनात्मनितद्वारात्।आविद्वद्गंगनावालंविश्वमित्मनपेक्षतः।३१।चैतन्यमात्रस्वरूपो
यंसदानन्दमपोदयः।अविद्यामस्त्रशस्त्रास्त्रैर्निष्क्रियोकारकोऽफलः।३२।आत्म
स्थामप्यविद्यांतामसंगोनस्त्रशस्त्रतः।दृष्यातपोवियन्निष्ठाविश्लेषोवियतायथा

३३॥नदृष्याक्रियतेयोगनातपेनापिशुष्यति।अविद्ययाविद्ययावानात्मन्यतिशय
स्तया।३४।प्रत्यस्यातापात्मनेयमाश्रयांतरवर्जनात्।अविद्यासिध्यतीवात्मन्यहो
रेवप्रकल्पिता।३५।कल्पितायाअविद्यायाःहानिःकल्पितविद्यया।यादृग्यदो
वलिस्तादृगितिन्यायविदोविदुः।३६।विद्यायाअप्यविद्यायाःकल्पितत्वेसमेस
ति।आत्मनोब्रह्मताउल्पाभवेत्संसारमोक्षयोः।३७॥निवर्त्यभेदाद्विन्नोर्थोब्र
ह्महंपदयोर्भवेत्।अब्रह्मानात्मनेवार्थेएकस्मिन्नपिवस्तुनि।३८।स्वानुभूत्यवसेयेस्मि
न्प्रतीयब्रह्मतांजनाः।आरोप्यशास्त्रंशास्त्रेस्मिन्नानात्वमकल्पयन्।३९।अनुभू
त्यवसायोहंब्रह्मशास्त्रमपर्पितं।अस्मीतिबोधादारोपद्वयमत्रनिवर्त्तते।४०॥

त्यस्कारोपहृयंवस्तुब्रह्मादंपदलक्षितं॥ अहयंत्वगात्मलरूपेणाव्यवतिष्ठते।४१।
अनन्यापेक्षमात्मलमहंग्राहेनलक्षने। तथैवब्रह्मग्राहेनप्रतीचोस्याद्वयात्मता
४२। अस्मीतिवर्त्तमानोक्तेर्विद्याकालेवमुक्तता। सिद्धांतोसौनसिद्धास्यादग्निहोत्रादि
कार्यवत्।४३॥ तस्मात्तत्सर्वमभवदितिवाक्येनवेदनात्। उच्यतेसर्वभावाप्तिरस
र्वत्वापवादतः।४४। स्वतःसर्वात्मकंब्रह्मभात्यसर्वमिवभ्रमात्। विद्ययाभ्रांतिवाधे
स्यसर्वत्वमवशिष्यते।४५। विद्यायांसर्वभावाप्तिहेतौये कर्तृकर्मणी। मुमु
क्षुभिरिहाहिभ्येगुरुणातेसमाहिते।४६। नत्वसौसर्वभावाप्तिर्नविद्यामात्रतोभवे
त्॥ विनोत्तमत्वानुष्ठानकालदेवाद्यनुग्रहं।४७॥ विघ्नस्यफलदोवेदोनश्रुत्याधमत्व

तः। देवादेस्तत्तमस्यैवतथाविद्याफलप्रदा।४८। यागज्ञानमनुष्याणांहिनानास्वर्गदंय
था। ब्रह्मज्ञानमनुष्याणांहिनासर्वाप्तिदंकथं।४९। गर्भाधानान्यत्कालेतथोत्तमेवि
द्याकृतयुगे। सर्वभावेनयच्छतिनान्यदाकालतोभवेत्।५०। राज्ञालूषिफलंयद्वत्करा
र्थंप्रतिबध्यते। सर्वभावस्तथादेवैर्योगिभुग्भिर्निवार्यते।५१। तस्मादनुत्तमेजन्मजन्म
न्यननुष्ठायिनः। कलौयुगेदेवाद्यृणवतोनविद्यासर्वभावदा।५२॥ इतिचोदयितुर्ये
त्रचत्वारश्चोद्यहेतवः। तद्योयदित्यादिवाक्यैश्चोर्म्मन्निरस्यति।५३। नतावदुत्तमं
जन्मसर्वभावप्रयोजकं। उत्तमस्यापिदेवादेःसर्वत्वंब्रह्मबोधतः।५४। योयोदेवे
ष्वृषीणांवा मध्येब्रह्मविबुध्यते ग। अस्मावस्मावेवसर्वमभूर्न्नान्यस्तुकश्चन।५५। म

नुष्याणांतथामध्येब्रह्मवित्सर्वभावभाक्। विद्याविद्येएवतस्मात्सर्वलान्यत्वकारणे।५८। ब्रह्मवाइदमग्रेनूरितिविद्याधिकारिता। श्रूयतेब्रह्मणोब्रह्मसर्वजातिषुतत्समं।५९। नपश्वादेःसर्वभावप्रसंगोबोधवर्जनात्। शूद्रजातिस्तुविदुरःमतिबोधेत्वमुच्यत।५९। यागविद्योवात्मविद्यानानुष्ठानमपेक्षते। फलदानइतिज्ञेयंवामदेवनिदर्शनात्।५९। ब्रह्मात्मत्ववामदेवःयश्चपन्मन्वादिरूपतां। प्रतिपेदेह्यनुष्ठानावसरस्तस्यकोवद।९०। प्रयोजनंचविद्यायाश्चनुष्ठानेत्रकिंभवेत्। किमंतरायाप गमःकिंवाजन्मनिरोधनं।९१। पुमर्थीवासितिःकिंवायद्वाबाह्यार्थबाधनं। अन्यद्वाकिंचिदत्रस्यात्सर्वमेवनभंभवेत्।९२। ब्रह्मप्राप्तिर्थं तरायस्यप्रत्यकसमो

रूपिणः। प्रत्यग्विज्ञानतोध्वस्तौकिंतरायोन्यउच्यतां।९३। सकृदात्मप्रसूत्येव निरुणद्ध्यखिलंभवं। विद्यामोहनिरासेनरोद्धव्यंजन्मकिंततः।९४। अविद्याध्वंसमात्रेणपुमर्थश्चसमाप्यते। आनंदस्यस्वरूपत्वादर्थनीयांतरंनहि।९५। नाबाधित्वेहबाध्यार्थबाधकोबाधकात्मतां। लभतेतःसलब्धैवविद्याबाधंप्रबाधते।९६। सम्यक्ज्ञानशिखिप्लुष्टमोहतत्कार्यरूपिणः। अपेक्षांक्षिप्यतेनान्यदतःस्यादननुष्ठितिः।९७। अनात्मबुद्धिमत्यत्वनिवारणमपेक्षते। अनुष्ठित्येतिचेन्मैवंसत्यत्वस्याप्रसक्तितः।९८। ध्यानादिधर्मरूपत्वगदैतात्मावबोधने। प्रत्यर्थिनिस्थितेनात्मधियांस्यात्सत्यताकुतः।९९। तस्मात्प्रश्नपनूवामदेवःप्रतिपेदे

दूनीरणात् विद्याकालेवसर्वाप्तिर्नविलंबाहितीस्यतां।७४ वामदेवस्यमन्वादिरूपाप्ति
र्नविरुध्यते। उपाधिमात्रभेदेनवस्तुतस्तैक्यसंभवात्।७१। वामदेवोमनुस्सूर्यइतिश्रुते
रुपाधयः। मूढत्वंवस्तुतोभातिविद्वत्त्वंवस्तुतोउचित्।७२। नचितोवामदेवेवामनोवा
न्येषुवाभिदा।तेनमन्वादिविद्वामदेवेनप्रत्यपद्यत।७३।यत्तुपुण्ययुगेसर्वभावोनतु
कलाविति। तदसद्बोधसाध्यस्यपुण्यकालानपेक्षणात्।७४। नसूर्यग्रहणापेक्षो
बोधान्निद्राक्षयः क्वचित्।। तथानसर्वभावोयंकालमेदमपेक्षते।७५। यएतर्हीपि
वेदाहंब्रह्मास्मीतितदेवसः। इदंसर्वंभवत्येवयदिदंजगदीक्षते।७६। अविचारित
म्यस्यनामरूपात्मकस्ययत्। जगतोवास्तवंरूपंसत्तत्वंब्रह्मतद्भवेत्।७७। तादृ

DR BHAU DA

ग्ब्रह्माहमस्मीतिसाक्षात्कृतवतः कथं। सर्वभावेविवादःस्यात्सर्वस्यब्रह्मनेतरत्
७८।। नामरूपेउनेसर्वतयोर्भायामयत्वतः।। ब्रह्मैववास्तवंसर्वं ज्ञानेनैवनदृष्यते
७९।। ब्रह्मैवनिखिलोजंतुर्बोधात् प्रागपिवस्तुतः। अब्रह्मत्वमबोधस्याद्बोधात्
उब्रह्मतातातः।८०। ब्रह्मबोधासर्वभावेभवेत्कृतयुगेनकिं।ननिवारयितुंशक्यः
सर्वभावकलावपि।८१।। नराणामधमर्णत्वात् सर्वभावंहिवौकसः।। वारयंति
हविर्भोक्तुंतैर्दत्तमितिचेन्नतत्। तेभ्यज्ञातात्मतत्त्वस्यप्रभुत्वस्तैमसोयतेः। इंद्रा
दयोपिनैवालंसर्वभावानिवारणे।८२।। यद्यपीन्द्रानृणांदेवास्तथापिब्रह्मरूपि
णः। अनीशाः प्रत्युतैतेषामात्मानंतितस्वित्।८३।। ईशेशितव्यसंबंधप्रत्यगज्ञा

नहेतुजः। ज्ञानीज्ञानात्तमोध्वस्तावीश्वराणामपीश्वरः।८५। अथमेणोभवेद्देवादे
र्ननुतत्त्ववित्। देवाद्यैश्वर्यविषयव्यतिक्रांतत्वहेतुतः।८६। नन्वस्मन्नविस्रंभः
कर्मानुष्ठानआपतेत्। देवपित्राद्युत्तमर्णैःफलवारणसंभवात्।८७। नैवंदेवे
शकालादीनपेक्ष्यैवकृतत्वतः। कर्मणःफलदानायानुकूलाद्यैश्वरादयः।८८। प्रति
बध्नंतियत्रैतेफलंतत्रान्यकर्मणः। प्रबलस्यफलंदातुमेवैतद्वजानते।८९। अत
कर्मप्रधानत्वंश्रुतिस्मृतिषुसंमतं। तत्तच्छास्त्रेषुकालादेरपिप्राधान्यमीरितं।९०।
कर्मकालेश्वरादीनांफलदानेविवक्षया। प्राधान्यंवस्तुतःसर्वंसर्वत्रापिह्यपेक्षते॥
९१॥ मत्यर्थमृणित्वेदेवाद्यानाज्ञानांकर्मणः फलं। प्रतिबध्नंतिवक्तव्यमनृणाज्ञा॥

निनांकिमुतः।९२॥नवेहाविदुषोपिस्यादृणित्वंहेत्वभावात्। नाकिंचिन्नःसुरैःप्रत्त
मृणित्वंयेननोभवेत्।९३।शास्त्रादृणित्वमितिचेन्नशास्त्रस्यार्थवादतः। अवसानवि
धेरर्थवादोऽृणित्ववचःश्रुतौ।९४।२५०० सर्वमप्यनृणःपश्चाद्देवानामंतरात्मतां।गतो
बोधादस्यदेवाः कथंस्युःप्रतिबंधकाः।९५।इत्थंयेमर्वभावस्यवारकास्तेद्यहेतवः
उन्मूलितास्तेनिर्विघ्नःसर्वभावोभवेत्ततः।९६। अत्रकेचित्सर्वभावोजीवतोनेतिमन्वते॥
विद्यामंतत्यभावाच्चरागादिप्रत्ययोत्थितेः।९७। जीवतोयद्यविद्येयंनिवर्त्ततदानि
ग्रं।विद्यांमंतनुयात्तेनरागाद्यवसरोनहि।९८। दृश्यंतएवामरणंरागाद्याविदुषामपि॥
अतोन्यएववोधोयमविद्यायानिवर्त्तकः।९९। नवानिवृत्ताविद्यस्यसर्वभावोस्ति

जीवतः। तस्मान्मरणकालीनविद्ययासर्वतानभवेत्।१९०। मैवंबोधः किमंत्यत्वादविद्याया
निवर्त्तकः। ब्रह्मैकविषयत्वाद्वाकिंदांत्यब्रह्मधीयतः।२। अनैकांतिकमंत्यत्वभङ्गानि
मित्तबोधने। ब्रह्मैकविषयत्वंचघ्नघ्नमेब्रह्मबोधने।२। अंत्यब्रह्ममतित्वस्यनदृष्टांतो
स्तिकश्चिन। केवलव्यतिरेकिवेनसपक्षस्यसत्वतः।३। अविद्याघातिनीमुक्तिधीः सप
क्षोभवेदिति। अनध्यवसितोहेतुःसपक्षावर्त्तनाद्भवेत्।४। यद्येकैकोंत्यआद्योवावोधो
ऽविद्यांननाशयेत्। विद्यासंततिरेवास्तुतद्धिविद्यानिवर्त्तिका।५॥ अविछिन्नैवामर
णंसंततिः किंनिवर्त्तिका॥ विछिन्नावातत्रतारावदविछिन्नानसंभवेत्।६। सतिभो
जनमुत्पादावविछेदः कथंभवेत्। नोजनादिनिरोधेपिधीर्ह्यन्यांनास्तिसंतति:।७।

यदिविछिन्नसंतानःस्यादविद्यानिवर्त्तकः। तदामरणकालीनः प्राचीनोवेतिकथ्यतां॥
८। मरणेतुनविश्वासोहिक्किकावशवर्त्तिनः॥ ज्ञानेसंततिनिष्पत्तौतमौमात्रसमाप्ति
तः।९। प्राचीनोप्येषसंतानोनिश्चितः किमियत्तया। उतानिश्चितआद्येउनास्तिनिश्च
यकारणं।१०। संतत्यारंभकधियामियत्तानवधारणात्। दूयतामुक्तिरित्येषनस्याच्छा
स्त्रस्यनिर्णयः।११। अस्तिनिश्चितसंतानोमोक्षोप्यत्रास्तिबालिकः। ततः कृत्वाकर्मका
र्यीकर्मछिद्रेणसंततिः।१२। इतिमत्वाऊर्वनेयेकर्मछिद्रेषुसंततिं। नूनंतेनास्ति
कायेणवीक्षंतेसूर्यमंडलं।१३। वस्तुतंत्रातत्वविद्यानृतंत्रानैवतेनसा। नृनिः कर्तुम
कर्तुंवास्वेछयानैवशक्यते।१४। यतएवमतोयोनः प्रत्यक्संमोहहानिकृत्। आयो

त्यः संततोन्योवासंबोधः सर्वभावदः।१५। नचानिवर्तकोबोधोमोहस्येत्यपिशंक्यते॥
ण॥ यतोनुभूयतेमोहनिवृत्तिस्तत्त्ववेदिनः।१६। विद्यासंततभावोयोजीवतः सर्व
वादिना। प्रायुक्तस्तत्रसंतानमात्रंतावदवारणं।१७। प्रमेयज्ञानसंबंधेधारावाहिक
संततिः। केनवारयितुंशक्यासर्वमेयेषुदर्शनात्।१८। यावज्जीवमविच्छिन्नासंतति
स्तेननेक्ष्यते। मात्रशब्दनाभविच्छिन्नसंततेःकिंफलंतव।१९। तादृक्संततिहानेः
स्यपुनर्भ्रांत्युदयेसति। रागद्वेषानिरोधेननमुक्तिरितिचेदलं।२०। मुक्तिरायुः
क्षयात्पूर्वंपश्चाद्वातवसंमतानैषः प्रारब्धभोगसंदेवैरप्यनिवारणात्।२१। पश्चा २७३
त्तनीउषामुक्तिः साकेनापिनवार्यते। रागादिनिर्वायतेसेत्येतत्स्माद्बालभाषितं

२२॥ संचितारब्धयोर्ज्ञानभोगाभ्यांकर्मणोः क्षयेजन्महेतोरसद्भावान्मुक्तिरेवावशिष्यते।२३। रागादिजन्येनागामिकर्मणाश्लिष्यतेनहि॥ विज्ञातविषयज्ञातयोस्यजगृद्धः पुण्यपापतके।२४। ब्रह्मात्मबोधमात्रेणनास्त्वार्थस्यसमाप्तितः। रागादयःसंतुकामं नतद्भावोपराध्यति।२५। रागादिरोधाद्येमुक्तिमाकुस्तेचलयेऊतः। नमुक्तास्तत्ररागादेर्निरोधोभूद्दोषतः।२६। तादानपिनपर्याप्तोनिरोधोमुक्तयेकथं। श्लथीयोहः समभ्यस्तोनिरोधोलंविमुक्तये।२७। बोधाभावादमुक्तिश्चेत्स्खलयेतर्हिबोधतः। मुक्तिरित्येववक्तव्यंकोर्थोरागादिरोधनुः।२८। रागादिषनिरुद्धेषुबोधएवनसंभवेत्। यदितर्हिनिरुध्यंतामाबोधंतेबुधुस्मुनिः।२९। पश्चान्नुयदिबोधेन

वाध्यतेस्मुनथैवतत् अथारब्धेनजन्मेरन्नजनेतांभोगसिद्धये।३०। निरोद्धुंनहिशक्यं
तेरागाद्याभोगहेतवः। बुभुत्सुबुद्धमूढानांमध्येकेनापिधीमता।३१। अभोगहेत
वोयेस्युरविचारैकनिर्मिताः नेतुबुद्धबुभुत्सुभ्यांनिरुध्यंतेविचारतः।३२। ये
भोगहेतवस्तेपिप्रबुद्धेदृष्टबीजवत्। दृश्यंतेबोधदग्धास्तेनीरागादिःसुखीभवे
त्।३३। आगमाद्देदचेद्ब्रह्मब्रह्मैवभवतिस्वयं। फलावस्थस्यचमतः। कांतोरा
गादिसंततिः।३४। ज्ञातत्वस्यनपुनर्भ्रांत्युत्पत्तिर्हेतुतः। विशेषाज्ञानजाभ्रां
तिर्विशेषज्ञानिनः कुतः।३५। यः सामान्यग्रहोयच्च विशेषाग्रहणंतथा। आ
रोप्यस्यैवसंस्कार स्तत्त्रयंभ्रांतिकारणं।३६। चिदात्मत्वंतुसामान्यंविशेषोत्र

ब्रह्मरूपता। नवेदारोप्यसंस्कारोद्यनादिर्दैतवासना।३७। तत्रब्रह्मात्मनिज्ञाते निर्हेतु
र्विभ्रमः कथं। उदेतिहैतधीस्तेषांबाधितेवानुवर्तते।३८। यथानुदृत्यारब्धस्य
शेषोप्यत्रोपभुज्यते॥ विद्यासर्वभावस्यभुंजानेनानुभूयते।३९। देहादिरेव
भोगस्यहेतुर्नत्वस्यवस्तुता। अनृतेनापि भोगोस्तिस्वप्नेदेहादिनायतः।४०॥
वस्तुत्वमेवविद्येयंबाधतेनानृतात्मतां। नादर्शस्यमुखंचाल्यंस्वमुरेकत्वविद्
द्यया।४१॥ वास्तवांशस्यदग्धत्वात् प्रतीत्याभोग संभवात्। जीवन्मुक्तिकथा
प्रोक्ताप्रारब्धांतमनिंदिता।४२। तस्मान्नजीवतः सर्वभावः क्वापिविरुध्यते।
अहं ब्रह्मेतियोवेत्तिसद्यः सर्वंभवत्यसौ।४३॥ आत्मेत्येवेतिविद्यायाः सूत्रे

यस्मत्रितंपुरा। तद्व्याख्यानमिदंकृत्वासंक्षेपेणसमापितं।४४। इष्टमादेयविद्यायाःसूत्रवृत्तीउदाहृता। हेयाविद्यास्वकार्येणयुक्तासूत्रयतिश्रुतिः।४५। यस्मादन्यांदेवतांयउपास्तेसंनवेदसः॥ इतिसूत्रमविद्यायाःसकार्यायाःश्रुतीरितं।४६॥ सब्रह्मत्वापरिज्ञानमविद्यानर्थकारिणी। अन्योपास्त्यापारतंत्र्यमिहानर्थदूतीर्यते।४७॥ नन्वव्याकृतमज्ञानंव्याकृतंकार्यमीरितं। तद्वयमत्रापिभूयःकस्मादुदीर्यते।४८॥ श्रुणुविद्याफलेपुंसोविसंवादभ्रमोदयं। बिनिवारयितुंबोधविनिवर्त्यविविच्यते।४९। अध्यात्ममधिदैवंच जीवत्वेशत्वकल्पिका॥ द्विधाशक्तिरविद्यायाद्वैविध्यंतद्विविच्यते॥५०

स्वाश्रयंमोहयेद्यासौशक्तिर्जीवत्वकल्पिका। सास्यब्रह्मत्वमाहत्यजनयेज्जीवतात्रमं।५१। जीवोहमितिमूढोन्यामुपास्तेदेवतामयं। सेयंमोहकरीशक्तिर्विद्ययैवनिवर्त्तते।५२। नमोहयतिशेषोशक्तिः स्वाश्रयंमाधिदैविकी। आविर्भावतिरोभावौव्याकृताव्याकृतानिधौ।५३। प्रतिभासतएवैषाविदुषोप्यत्रजीवतः। तस्माःप्रारब्धभोगांतेप्रतिभासोनिवर्त्तते।५४। नामाधिदैविकीशक्तिर्मायेतिकेचनआध्यात्मिकीमोहकरीमविद्येतिप्रचक्षते।५५। अविद्यामाययोर्भेदमात्यंतिकमपाकरोत्। यत्वाद्विवरणाचार्यऊचेत्वाकारनिन्नतां।५६। सृष्टिप्रकरणेतत्रमायाकारःपुरोदितः। अव्याकृतगिरातस्यकार्यव्याकृतमीरितं।५७। कर्मप्रक

DR BHAU DAJI

रणेत्वस्मिन्नविद्याकारईर्यते।सोस्माद्विन्नादेवतीतिधीरविद्याविजृंभिता।५८।स्व
स्यतत्त्वमविज्ञाययागदानादिकर्म यिः।स्वतोन्यदेवताःपातित्यनद्वान्विणिजं
यथा।५९।अपिभूरिपशोःपुंसएकस्मिन्नपितस्करैः।क्रियमाणेपशौदुःखं
किमुसर्वापहारतः।६०।सर्वस्वउल्वेनृपशौब्रह्मधीपरिमोषिणा क्रियमाणेम
हदुःखंस्यात्सर्वेषांदिवौकसां।६१।तस्मादेषांनप्रियंतद्यन्मनुष्याविजानते।
ब्रह्मात्मत्वमतोदेवाःप्रतिबध्नंतिबोधजं।६२।प्रमादिनोवहिश्चित्ताःपिशुनाः
कलहोत्सुकाः।मंन्यामिनोपिदृप्यंतेदेवमंहूषितात्मायाः।६३।मुमुक्षुःकर्म २७६
निर्हेवानाराधयेषामनुग्रहात्।अंतःस्थितोवेत्तिनेच्छंपारतंव्यानिवर्तते।६४।

योदेवपारतंत्र्यस्यहेतुर्मोहश्चिदात्मनः।ब्रह्मत्वबुध्याहेयोमावित्येतदिहवर्ण्यते।६५।
प्रामाण्यंकर्मकांडस्यदेवानांप्रभुतातथा।पशुकल्पेषुमूढेषुभवेन्नतुविवेकिषु।
६६।इत्यमाध्यात्मिकात्तानंकर्माधिरूतिकारणं।बोधहेयंजगद्धेतोरयत्नात्त्रिवेचि
तं।६७।नन्वब्रह्मत्वधीर्यद्वदब्रह्मेतिबोधतः।निवर्त्ततेनथाद्वैतधीरस्यद्वैतबोध
तः।६८।ततश्चजीवतोबोधहेयंकिंचिदथेतरत्।भोक्तुर्भोगस्यदेहांतेनश्यतीत्यभी
रिनं।६९।नैषदोषोयतोबोधःस्वस्यानंदहन्नपि।नद्वेड्भोगहेतुत्वंप्रारब्धप्रतिबं
धतः।७०।मणेर्दाहयथावह्नेःप्रतिबध्नंतिदग्धृतां।नतुप्रकाशसामर्थ्यंतथाज्ञान
निबंधनं।७१।भोगोपयुक्तंदेहादियावत्तावन्नबाध्यते।विद्ययानुपयुक्तस्तुबाध्यतेजी

वनोभ्रमः ।९२। ननुदेहाभिमानेनविनाभोगोनदृश्यते । सुप्तौतेनात्रभोगायजीवभ्रांति
रपेक्षिता ।९३। मैवंदेहाभिमानस्यजीवभ्रांतेः एवकृतः ॥ कर्मजन्योभिमानः स्या
द्भ्रांतिस्त्वज्ञानमात्रजा ।९४॥ कर्मक्षयेभिमानोयंसुषुप्तौविप्रलीयते । पुनः कर्मो
द्भवेसोयमुदेत्येवहिजागरे ।९५। लिंगदेहसंबंधोलदेहसंबंधोलिंगकर्मजः । क
र्माभावाद्ब्रह्मणस्तुजीवतानैवकर्मजा ।९६॥ लिंगदेहस्यामानिध्यादविवेकेन
जीवता॥ प्राणधारणरूपैषाभ्रमाद्ब्रह्मणिकल्पिता ।९७॥ अविवेककृतांयत्तद्विवेके
नविलीयते । कर्मोपादितसंबंधोलीनः स्यात्कर्मणः क्षये ।९८। अज्ञानजत्वात्कर्मा ९७
पिवाध्यंयद्यपिविद्यया । तथाप्यनीतकर्मैनद्बाध्यतेविद्ययाकथं ।९९। फलंनालभते

यावत्तावत्कर्मस्वरूपतः । वर्त्तेफलमुत्पाद्यनिवर्त्तेतैवबीजवत् ।१००। यद्योत्पाद्यांकुरं
बीजंजहात्येवहिबीजता । सोंकुरोदृश्यरूपेणावर्त्तेनविनश्यति ।१। तथादेहा
दिमुत्पाद्ययुक्तंकतिपयायुषाकर्मत्यजतिकर्मत्वंदेहादिरनुवर्त्तते ।२। मुक्तोबाणो
यथावेगक्षयेपततिनान्यथा । असौदेहस्तथैवायुःक्षयेनाम्यतिनान्यथा ।३। या
वदायुस्तावदेषः भुंक्तेभ्रमविवर्जितः । अंतरेणापिजीवत्वभ्रमंभोगोत्रमंनवेत् ।४।
सुखदुःखविकाराद्यधियःसाक्षिवभास्यता । भोगःप्रोक्तःसभोगश्चसमानोमूढबुद्ध
योः ।५। भोक्तृत्वमपिकर्त्तृत्वंविद्याभासगतंचिति । मूढआरोपयेद्बुद्धेनेतिवैषम्य
मेतयोः ॥६॥ इत्युक्तायुक्तितस्तस्यतावदेवचिरंत्विति । अतेर्ज्ञानंनुनृतेश्चभोगो

बाध्योनबोधतः।९७॥ कर्माधिकारीजीवस्यभ्रांतिरूपदवेदनं। तद्बोधवाध्यतद्बाधे
यातिदेवाद्यधीनतां।९८। ननुबोधात्पुरापात्मानदेवादिवद्गतः। देहादिनूर्द्धम
प्यस्त्रियद्देवादिवद्गानुगं।९९। तथाचमत्यबुद्धस्यकर्मित्वंनविवेकिनः। इतिध्रुव
स्थापयितुंनशक्यमितिचेन्नतत्।१००॥ मुक्तोरूमार्त्तोदेहादिरारब्धांतेविलीयते।
भाविजन्मनकस्यापीत्येवंज्ञाने ऋतः क्रिया।॥१॥ अवाप्याम्युत्तमंदेहमित्यध्
स्यात्ममोहतः॥ तद्देहमाधनेपुण्येयद्यागास्त्रेपवर्त्तते।२। अतः कर्मप्रकरणेक
र्महेतुमवेदनं। सूत्रयित्वाथतत्कार्यपारतंत्र्यादिवर्णयते।३। स्थष्टीकृतंपारतंत्र्यं
पश्चद्दष्टांततोहरणं। वर्णाश्रमादिवद्धर्मसृष्टिः कर्मार्थमीरिता।४। नन्वेवंतर्हि

मुक्तिश्चस्यादेवात्मधियंविना। अज्ञानकर्मणोः क्रत्यामादरेणोपवर्णनात्।५॥
मैवमात्माकिमज्ञातोमुक्तिदः कर्मवारुहन्। आम्नायरूषिवन्नायमज्ञानात्माफल
प्रदः।६। अनधीतोयथावेदोनार्थज्ञानेनपालयेत्। आरूतावारूषिः पातिनाक
र्त्तारं फलार्थिनं॥७॥ तथास्वात्माप्यविज्ञातोमुमुक्षुंमोक्षदानतः। नपालयत्यतो
मुक्तिरज्ञस्यनहिकस्यचित्।८। स्वात्मारयलोकमज्ञात्वायोदेहादेस्त्रलोकतः॥
प्रेत्यसोपुनरप्यन्यंदेहलोकं व्रजेद्दृढं।९। अनात्मविन्महत्पुण्यमश्वमेधादिकंय
दि। कुर्यान्नित्यपदायैतथाप्यंतेविनश्यति।१०० कृतस्यहिक्षयोऽवश्यं गोष्ठगा
रादिवद्भवेत्॥ नमोक्षायादरस्तस्मात् क्रतावज्ञानकर्मणोः।१। किंनुजीवन्मुक्ति

कालेबोधहेयंविवेचितं ॥ मुक्तिस्तुविद्यासूत्रेणसूत्रितास्याद्विचारतः ।२॥ आत्मान
मेवंनिर्द्वैतंस्वप्नंचविचारयेत् ॥ विचारयतियस्तस्यफलंनक्षीयतेक्वचित् ।३।
कामीकामयतेयद्यत्सुखंस्वर्गादिजंपुमान् । अस्मादेवात्मनस्तत्तत्सृजतेकर्म
सृजितात् ।४॥ अविनाशोऽखिलानंदहेतुत्वंचेत्यदोद्वयं । नकर्मणांफलेयुक्तंयुक्तं
विद्याफलेतुतत् ।५। सिद्धस्यव्यंजिकाविद्यायत्कृतात्माफलमुच्यते । नह्यात्मनोवि
नाशोस्तिनित्यंविद्याफलंततः ।६॥ सार्वभौमादिकाःप्रोक्ताउत्तरोत्तरहर्षिताः ॥ हिर
ण्यगर्भपर्यंतास्त्रानंदात्मबिंदवः ।७॥ ब्रह्मानंदस्यभूतानिमात्रांयांतीत्युदीरणात् ९७९
तत्तत्कर्मानुसारेणब्रह्मानंदःस्फुरेन्नृणां ॥८॥ तत्तद्विषयकामेनचित्तेस्मिन्व्याकुलीकृते

आनंदःस्वात्मभूतोपिसतिरोधीयतेनृणां ।९॥ पुण्येनविषयेलब्धेचित्तेस्वास्थ्यमुपा
गते ॥ आत्मानंदःस्फुरेत्तावद्यावद्याकुलतांतरं ।१०। एवंचविषयानंदस्य ब्रह्मानं
दस्यबिंदवः । सर्वानंदनिधिर्विद्याफलमित्यतईरितं ।११॥ आनंदलिंगनिव्यक्तिहेतु
कर्मप्रसिद्धये । ब्रह्मक्षत्रादिवर्णानांसृष्टिर्यत्तेनवर्णिता ।१२। वर्णाश्रमाभिमानीसन्न
न्यस्तः पराच्युतिः । देवादीनामाश्रयःस्यात्सर्वेषामापिपीलिकं ।१३। देवानांयागहो
माभ्यामृषीणांवेदपाठतः ॥ पितॄणांश्राद्धतोन्नृणांदत्त्वान्नगृह्दानतः ।१४। पशूनां
तृणनीराभ्यामुच्छिष्टकणधान्यतः । स्वारुटिहिंसुरख्यानामेवंसर्वाश्रयोगृही ॥१५॥
कर्मणानार्जितोयस्मान्नकश्चिदुपकारकृत् ॥ गृही देवादिनिस्तस्मादर्जितोभूत्सक

र्मनिः।१६॥ स्वस्वकर्मार्जितत्वेनदेवाद्याःस्वस्वदेहवत्। अविनाशंसदेच्छंतिगृहिणःस्वोप
कारिणः।१७॥ तत्त्वबुद्ध्याननुष्ठानंनाशोयंगृहिणोमहान्। एषदेवादिभिःसर्वै र्नैवश्
क्यश्चिकित्सितुं।१८। कर्मणामननुष्ठानंमृतिरोगादिनाद्भुतं। नाशावात्यंतिकोनाशो
यस्मात्पश्चात्करिष्यति।१९। माभूत्सर्वस्वहानिर्नोब्रह्मयाथात्म्यविद्यया। इतिदेवाद्
योद्येनान्प्रतिबध्नंतियत्नतः।२०। नत्वनर्थकरेकेनगृहीत्वेवंप्रवर्तितः। पारतंत्र्यम्
तेनैवधीमानत्रप्रवर्त्तते।२१। देवादिपारतंत्र्येतुगृहिणमधिकारिणं। मिथ्याधी
मात्रहेतुत्वान्नाप्यविद्याप्रवर्त्तिका।२२। नहिप्रवर्त्तकंब्रूमःकामएवप्रवर्त्तक
कामएषक्रोधएषइत्यादिस्मृतिवाक्यतः।२३। अकामतःक्रियाकाविदृश्यते

नेहकस्यचित्। यद्यद्धिकुरुतेजंतुस्तत्तत्कामस्यचेष्टितं।२४॥ तस्मात्कामयतेसर्वंब्रह्म
चारीचतुष्टयं। जायामेस्यादथापत्यमथवित्तमथक्रिया।२५। एतावानेवसंसारोका
मोनैवाधिकःक्वचित्। लोकांतरंकर्मफलंकर्मोक्षेवेरितंभवेत्।२६॥ असंभवेतु
जायादेर्मनोवागादिषुक्रमात्। चात्माजायादिसंकल्प्यध्यायेदात्मादिसिद्धये।२७॥
म एवंकाम्यैरितःसम्यानित्यकर्मीधिकारितां। अवगंधंतिगृहिणंदेवाद्याधिकारिणं
२८। इत्यविद्यासूत्रउक्तोनर्थोयत्नेनविश्रुतः॥ अयंनिवर्त्सेविदुषाजीवतेतिश्रुतम
तिः।२९॥ ११३०॥ इतितृतीयाध्यायस्यचतुर्थंब्राह्मणं॥ ॥जीवनःकर्मकर्तृ
त्वलक्षणोनर्थईरितः। मृतस्याविदुषःकर्मफलानर्थइहोच्यते।१। सर्वजन्मन्यनुष्ठा

यकर्मोपासतीत्यनात्मवित्। जगत्सृष्टान्नरूपेणसृजत्युत्तरजन्मनि।२। चतुर्थब्राह्मणे
प्रोक्तं यद्यपिज्ञानकर्मणोः। फलंतयापिवैषम्यमस्तिजीवेशरूपतः। ३। उत्कृष्ट ज्ञा
नकर्मभ्यांवैराजंपदमाप्ययत्। जगत्सृजतितत्प्रोक्तंचतुर्थब्राह्मणेपुरा।४। निकृ
ष्टज्ञानकर्मभ्यांमनुष्यादिपदंगतः। स्वभोग्यंसृजतेयत्तत्पंचमेस्मिन्नुदीर्यते।५। स्व
प्नाक्रीडत्यविभ्रांतऐंद्रजालिकवद्विराट्। स्वप्नदृष्टेवविभ्रांतः सृष्ट्वाक्रीडतिमा
नवः।६। येनदृश्यतेतत्तुतेनदृष्टंस्वकर्मणा॥ दृश्यस्यभ्रांतिरूपत्वादृतंसृष्टिरुच्य
ते।७॥ सृष्टंजगद्विराजेदंसदेवपशुमानुषं॥ मर्त्येनापिजगत्सृष्टंसविराट्न
रदेवतं।८॥ तेनतेनेक्षितः स्वप्नस्तत्तत्कर्मानुसारतः। सुखदुःखेतस्यतस्य य

थादत्तेतयाजगत्।९॥ ब्रह्मादिस्तंबपर्यंतंजीवानांसृष्टनासमा। समान्नान्यत्रमूढो
तः सृजतीत्यभिधीयते।१०। एकंव्रीहियवाद्यन्नंसर्वसाधारणंतुतत्॥ हेदर्शरूपणि
मासारथेदेवनामेवतेमते।११। क्षीरमेकंपशूनांतन्मनोवाक्प्राणरूपकं। अन्न
त्रयंचिदात्मार्थंतेनव्यवहरत्ययं।१२। नत्वन्नान्यत्रभुज्यंतेऊषरस्थितधान्यवत्॥
कस्मात्तेषांह्ययोनस्यादितिचेत्तदुदीर्यते।१३॥ भुंजानःपुरुषोभूयःकरोतिज्ञानक
र्मणी॥ ३ स्त्रीयेत्र्यप्यस्त्रीयेत्रनुछिन्नंततोजगत्।१४। एवंप्रवंप्रूपेणसा
ध्यसाधनलक्षणं। अविद्यादृतदृष्टीनांजगन्नित्यमवेक्षते।१५। इहजन्मनिकर्तृ
त्वंभाविजन्मनिभोक्तृता। पुनस्तत्रापिकर्तृत्वंततऊर्ध्वंचभोक्तृता।१६। तत्रकर्तृत्व

विस्तारः सर्वब्राह्मणेरितः। दृष्टभोक्तृत्वविस्तारदृष्टविद्याद्विधोदिता। १७॥ एवमाध्या
त्मिका विद्यामन्नस्याप्याधिदैवतं॥ विराट्त्वंवांछतः पुंसस्त्रान्नात्मोपास्तिरीर्यते॥१८॥
सृष्टेयद्यपिमर्त्येनवर्त्तमानोविराट्स्वयं॥ तथाप्यस्येश्वरोभूत्वाभातितादृशाकर्मणा॥१९॥
स्वप्नवत्कल्पितोराजागुरुर्वास्कनियामकः॥ यद्यातथाविराडेषस्वान्नधारंनियच्छति॥२०॥
स्वेनेहमेवराजेतिदृष्टामर्वंनियच्छति॥ नत्वनेननियम्यःस्यान्नविराट्तेनतद्भवेत्॥
२१॥विनोपास्तिंविराडेषस्वान्नत्वेनकल्प्यते॥ उपासकस्यस्वत्वेनेत्येषाकल्पकयोर्निदा
२२॥ कर्मोत्कर्षापकर्षौचस्वत्वनित्वेनेकारणं॥ तस्मादुपासनोत्कृष्टावर्ण्यतेस्वत्वसिद्धये २८२
२३॥ अस्याद्युपासनं सर्वंस्वत्वार्थंयद्यपीरितं॥ तथाप्यविद्याकार्यत्वसिद्धयेत्रापुदीर्यते

२४॥ अध्यात्ममधिभूतंचविज्ञेयमधिदैवतं॥ उपासनायव्याप्तित्वंविराजोन्नत्रयात्मनः॥२५
अन्नत्रयस्यसंव्याप्तिरध्यात्मंसानुभूतिनः॥ शास्त्रैकगम्यमन्यत्रतत्राध्यात्मंप्रदर्श्यते॥२६॥अ
नुमेयंमनोरूपंमात्रिवेद्यास्तुवृत्तयः॥ कादाचित्कार्थविज्ञानंलिंगंतद्वद्विशेषधीः॥२७॥आत्मे
द्रियार्थसान्निध्येसंतरैतेप्यर्थवेदनं॥ क्षणिकंदृग्रूपतेनस्वदंतःकरणंसर्वकं॥२८॥लोचना
गोचरेदृष्टेत्वचास्पर्शंवेदनं॥ पादस्पर्शनुदित्येषविशेषोज्ञापनेधिया॥२९॥लिंगद्व
यानुमेयेस्मिन्विज्ञेकामात्रिवृत्तयः॥ भास्यंतेमात्रिणारूपंनेत्रेणेवापरोक्षतः॥३०॥
श्रोत्रेनमनसारूपन्नपंचोत्रोपलक्षते॥ वागिंद्रियेणनिष्पाद्यनामवागिहगीयते
३१॥ पंचवृत्त्यात्मकान्त्राणान्निष्कर्मोपलक्षते। नामरूपक्रियाएवमध्यात्मंरूपव

र्णिताः ।३२।। देहेंद्रियादिसंघातरूपाएतास्त्रिदंडवत् एकीभूताइहाध्यात्मंचिंतनीया
उपासकैः ।३३।। अधिभूतंतथोपास्यवाङ्मनः प्राणसंहिताः ।। नामरूपक्रियाः शास्त्रेषो
क्तंलोकादिरूपतः ।३४। अधिदैवंतुपृथिवीवाग्धिष्ठानगोलकं। अग्निर्वाचः स्वरूपंस्या
त्मनोरविरिहेष्यते ।३५। रथाग्नियोगादुत्पन्नोवायुरेषोंतरिक्षगः । इंद्रोमरुत्पतइत्येनं
ध्यात्वावैरीनसंभवेत् ।३६।। चंद्रोधिदैवंप्राणस्यतएतेत्राधिदैविकाः ।। अध्यात्ममधिभू
तंचसर्वंव्याप्यव्यवस्थिताः ।३७।। नामरूपक्रियास्तस्मादनंताअधिदैवतं ।। विराड्रूपा
नि ध्यात्वाध्यायेत्कालात्मतांपुनः ।३८। कालात्मकोविराडेषचंद्रःषोडशकलाः ।। ति १८३
थयः प्रतिपन्मुख्याः कलाः पंचदशेरिताः ।३९।। आगमापायरूपास्ताश्चैकाषोडशी

कला ।। तयासर्वप्राणिजातंदर्शेविशतिचंद्रमाः ।४०।। इतिध्यात्वाथचंद्रत्वंस्वस्मिन्संपा
दयेद्बुधः ।। देहोऽयंवाकलावित्तंकलाः पंचदशेरिताः ।४१। आदर्यतेक्षीयतेचक्रमादि
त्येनविग्रहः ।। स्वामीदेहोस्यनित्यत्वादित्यत्रचिंतयेत् ।४२।। अन्नात्मोपासनंप्रोक्तंतत्फ
लोक्तिप्रसंगतः । पुत्रकर्मोपासनानांफलंवक्ष्यामियद्यं ।४३। पुत्रेणजय्योलोकोयंपि
तृलोकेस्तकर्मणा ।विधयादेवलोकोतोद्वाभ्यांविधाप्रदास्यते ।४४। क्रियात्वात्प्रोक्तहेतु
त्वंयुज्यतेकर्मविधयोः । द्व्यात्मनस्तुपुत्रस्यकथमित्युच्यतेशृणु ।४५। अत्रजिष्यन्म
रिष्यंश्चपिताकर्तव्यमात्मनः ।पुत्रेध्ययनयागादिसर्वमप्यर्पयत्यसौ ।४६। यागाध्यय
नकाम्यानिकुर्वन्पुत्रःपितुर्गृहे । वसत्येतावतापुत्रजितोयंलोकउच्यते ।४७। पुत्रक

मोपासनानांचसंगात्फलमीरितं ॥ अस्मात्मोपासकेस्याद्यविराट्प्राप्तिरुदीर्यते ।४८। सर्वसिद्धविराजोवाक्स्थिरयस्यासंभिकामती । उपासितातस्मादाद्देवीवागाविरात्मुं ।४९। मनःप्राणोतयादैवौविशतोतउपासकः । सर्वेषामपिभूतानांभवत्यात्माविराडिव ।५०। सर्वभूतात्मभूतोसौसर्वानन्यत्ववेदनः । जगदुत्पत्तिसंहारैःक्रीडन्निवविचेष्टते ।५१। ननुसर्वविराज्येषविरोद्दिंदुरिवोदधौ ॥ विराडंतरस्रूपेणजायतेवोभयेनतत् ।५२॥ नोपास्तिकर्यतालाद्येविराजः सर्वसिद्धितः ॥ द्वितीयेद्विगुणीभूतोविराड्रूपेतजंतुभिः ।५३॥ नैषदोषंकल्पनायाद्वैगुण्यस्याप्रसंगतः । नरज्जुसर्पोद्विगुणोभातिह्याभांप्रकल्पितः ।५४॥ १८४

विराट्स्वेभ्योन्यइत्येवंकल्पयंत्यनुपासकाः । उपासकाः कल्पयंतिस्वयमेवविराडिति

५४॥ यद्यथाकल्पतेयेनतत्तथानेनवीक्षते । अन्येनकल्पितंत्वन्योनकश्चिद्धीह्युंक्षमः । ५५। कल्पितस्यफलत्वंचयुज्यतेस्वप्नभोगवत् । कल्पितंनिखिलंद्वैपमितिवेदांतडिंडिमः ॥ ५६॥ तस्मादुपास्तिजन्योयंविराट्तस्योपमाश्रुतौ । सर्वसिद्धविराट्प्रोक्तायथैषादेवतेतिहि ।५७। सर्वभूतैर्यथासृज्योविराट् । सर्वस्तथाविराट् ॥ स्वप्नतेनूतनोप्येषसर्वभूतात्मकत्वतः ।५८। नचसर्वप्रजादुःखप्रसंगोस्मिन्नुपासके ॥ कृत्स्नाभिमानिनस्तस्यप्रजामात्रेनहंमतेः ।५९। कुक्षिस्थकृमिदुःखेननमनागपिसंगतिः । तथास्मदादिगैर्दुःखैर्नविराजोस्तिसंगतिः ।६०। ईश्वरत्वाच्चतस्यान्यदुःखैर्नस्यात्समागमः ॥ अस्माकंदुःखसंप्राप्तिरनैश्वर्यकृतैवहि ६१ सत्यसंकल्पयुक्तस्यदृष्टंतद्धवेन्नहा । अनिष्टंनभवत्येव

ऊतोदुःखंप्रयुज्यते ॥६२॥ उपास्मात्सकलपापस्मरंध्वात्दुःखकारणं। नास्तिपुण्यैकसाध्य
त्वात्सुखमेचविराट्पदे।६३। इत्यंप्रोक्ताविराट्प्राप्तिर्मर्त्यस्यत्र्यन्नदर्शिनः।अन्नात्मदर्श
जीवेच्चेत्तदाकर्तव्यमुच्यते ।६४॥ सर्वकर्माणिसन्यस्यप्राणापानावनुस्मरन्। सर्वव्यापार
कालेषुनान्यत्किंचिद्विचिंतयेत्।६५। वागादयःश्रमग्रस्तानप्राणस्तेनतेसकलाः।प्राण
रूपमनुप्राप्यप्राणनाम्नाघकीर्तिताः।६६॥ इंद्रियेषुपरिस्पंदःप्राणांशेनार्थगृहीतय
द्रियार्थस्मृतःप्राणःसर्वरूपःप्रशस्यते।६७। प्राणोध्यातंयथातद्वायुःश्रेष्ठोधिदैवतं।
प्राणवायुस्वरूपोहंप्राणिनीत्येवचिंतयेत्।६८। आमृत्यनन्यव्यापारश्चिंतयन्प्राणदेव
तां। यातिसायुज्यमालोक्येध्यानोत्कर्षानुसारतः॥२७०० इत्येवोक्तायाविराट्प्राप्तेरनुवा

DR BHAU DA

देयमिष्यते। उपासनांतरंचेदंनवेत्त्यगुपक्रमात्।७०। इत्यनात्मविदांभावीसंसारःस
र्वदुरितः। यंचमेब्राह्मणेतेनहेयोसौतत्त्वविद्यया।७१॥ ॥इतिवार्त्तिकमारेन्तृतीयाध्याय
स्यपंचमंब्राह्मणं॥ अविद्यासूत्रमारभ्यमाधब्राह्मणवर्णितं। विद्यासूत्रात्पुरोक्तंचज
गासंक्षिप्यवर्ण्यते॥१॥ अल्पत्वेसतितस्यागंसंभावयतिधीर्हृणां। षष्ठेस्मिन्ब्राह्मणेते
नजगत्संक्षिपतिश्रुतिः।२॥ ब्रह्मादिस्थावरांतंयज्जगत्तत्त्रयमेवहि। नामरूपंकर्मचे
तिनास्तिवस्त्वंतरंक्वचित्।३। नामानिनामसामान्येसर्वाण्यंतर्भवंतिहि। उद्भूतिस्थि
तिनाशेषुनविशेषःस्थकस्थितोः।४। सामान्याच्चेत्स्थगूतानुप्रेरन्नेवतेसदा। ततो
नामविशेषाणांतत्सामान्येनसंग्रहः॥५॥ रूपकर्मविशेषाणांमयदं योजयेत्तथा।६।

दृश्यन्नीदृयः सर्वेरूपात्मानोनिरूपणात्॥६॥ नामादित्रिनयस्यापिस्यात्संद्योतेन संग्रहः॥त्रिदंडविष्टंभइवपुष्पेकीभवेत्त्रयं॥७॥अध्यात्मदेहउद्दिष्टोधिदैवंतुविराडिति।वपुष्यंतःस्थितःप्राणःक्षेत्रोध्यात्माधिदैवयोः॥८॥नित्यःप्राणोलिंगरूपश्चासंसारविमोक्षणात्॥मोनित्यपिंडस्याधारोगृहस्तंभवदांतरः॥९॥सोयंदेहादिसंघातोनामादित्रयसंग्रहः॥संघातेदृग्रूपतेनामरूपकर्मत्रयंजनैः॥१०॥एतदृष्टांततः केचिद्भेदाभेदौपरात्मनि॥आरुरुक्षुनयुक्तंस्यात्परस्परविरोधतः॥११॥दृग्रूपस्यमायिकत्वेननविरोधोस्तिकश्चन॥तदेवंब्रह्मणेषष्ठेजगत्संग्रहइरितः॥१२॥ब्रह्मणध्यारोपएवंतृतीये ध्यायदूरितः॥मुमुक्षुनिर्निवर्त्तीयंतत्त्वगोचरविद्यया॥१३॥इमस्तेतथासप्तम्नातान्य

श्रुतीयाध्यायसंग्रहे॥१४॥२७९॥इतिवार्त्तिकसारेद्वितीयाध्यायस्यषष्ठंब्राह्मणं॥समाप्तोद्वितीयाध्यायः॥ ॥योधारोप॥६

थउपोद्घा॥संख्याताःसंख्ययाश्लोकाॅस्तृतीयोक्तश्चउद्यमार्वयोद्यते॥विद्यासूत्रस्यतात्पर्यमथवात्रनिरूप्यते॥१॥संतिषड्ब्राह्मणान्यत्रत्रयमंब्राह्मणत्रयं॥अपवादप्रधानंसद्ब्रह्मतत्त्वनिरूपकं॥२॥चउद्यैत्वात्मसूत्रस्यसाक्षात्तात्पर्यविस्मृतिः॥फलानुसारीसार्वात्म्यविस्तारःपंचमेस्मृतः॥३॥विद्यावंशस्यविस्तारोजयार्थंषष्ठइरितः॥जयाद्गुरूननुस्मृत्यविद्यांप्राप्नोतिमुस्थिरां॥४॥अपवादप्रधानंयद्ब्राह्मणत्रयमीरितं॥तत्राद्येनात्मनातावत्ब्रह्मणादीनामयोद्यते॥५॥अतः प्राणात्मवाद्यत्रवालाकिः सर्वपक्षभूत्॥ब्रह्मात्मतत्त्वविज्ञानसिद्धांतोप्रतिवक्तितं॥६॥मुखावबुद्धयेयद्वाश्रद्धाचारादिसिद्धये॥आख्यायिकामुखाक्षेपउक्तिप्रत्युक्तितोभवेत्॥७॥अष्टोपिब्रह्मतेहंब्रवाणीतियदुक्तवान्॥गार्ग्यन्तेना

जातश्रोत्रोः श्रद्धालुत्वंप्रतीयते ।८। श्रद्धालुरधिकारीयोजिज्ञासुर्विनयान्वितः । श्रएष्टे
नापिवक्तव्यातस्मैविद्येतिशास्त्रतः ।९। विनेयमतीयद्वाजानिषेधतोधमः । उत्त
मश्चैवमाचारइतिविज्ञापितंनवेत् ॥१०। प्रश्नोत्तरेस्वयंराजायदुवाचततोगुरुः । श्रबु
द्धमपिमच्छिष्यंनोपेक्षेतेनिगद्यते ।११। श्रध्यात्ममधिदैवंचब्रह्मस्यात्प्राणदेवता
समष्टिव्यष्टिरूपामावितिगार्ग्यस्यनिर्णयः ।१२। व्याघाद्यष्टयः प्रोक्ताःसमष्टिरूपविरा
डुभवेत् नमुख्यब्रह्मतैतेषामिनिराशोविनिर्णयः ।१३। श्रज्ञातेजगदज्ञातंज्ञा
तेज्ञातंतुयत्ततत् । तदेवब्रह्मप्रणत्वान्नरव्याघाश्चकृच्छ्रतः ।१४। श्रव्याहतानानुग १८७
तंस्मृतःसिद्धात्मवस्तुनि । मुख्यार्थोब्रह्मनाशेतोवेदितव्यंतदेवहि ॥१५। प्रतीचिमा

त्मादिज्ञातेज्ञेयंसर्वमाप्यते । निःशेषनस्तमोधस्तेःपुमर्थस्त्वमवाप्यते ।१६। ब्रह्मवि
द्वितदेवत्वंनविदंयदुपाप्यते । इतिश्रुतिरुपाप्यंमुख्यब्रह्मत्ववादिका ।१७। तस्मादुपा स्म
सकोगार्ग्यैनमुख्यंब्रह्मवेत्त्यंत । श्रन्वयव्यतिरेकाभ्यांबोधयामासतंनृपः ।१८। स्यादिज्ञा
नमयोभोक्तानप्राणइतिजागरे ॥विवेकोदुःशकोयस्मादब्रह्मावपिसुस्थितौ ।१९॥
योविज्ञानमयःसुप्तावसावुपरतिंगतः ॥ वर्त्ततेसर्ववित्प्राणोविवेकःसुंशकस्तदा ॥
२०॥तस्मात्सुषुप्तंपुरुषश्चामंत्र्यप्राणनामनि । श्रन्नबोधादभोक्तृत्वंप्राणस्यसंसृत्ये
नृपः ।२१॥यदिभोक्ताभवेत्प्राणोजाग्रद्वच्छ्रुतमागतं । श्रश्रोष्यन्नाशृणोत्तस्मान्नस्या
द्भोक्तोपलादिवत् ।२२। नविज्ञानमयस्मावद्दृश्यणेदितिचेन्नया । श्रस्वश्रवणमेत

स्यप्राणमात्रानहंकृतेः।२३। नबुध्यतेदेवदत्तश्चाक्तोगुलिनामनिः। तावन्मात्रानहं
मानादेवं प्राणस्यनामनिः।२४। स्वनामान्यपितोजीवः मुप्तोवेत्तीतिचेन्नदा। जीवो
नामात्रचिन्मात्रः सोपाधिर्वेतिगम्यतां।२५। बोधाबोधौचितेर्नस्तः कूटस्थज्ञप्तिमात्र
तः। उपाधिलोपात्सोपाधिर्नवेत्तीतियुज्यते।२६। श्रोत्रादीनामुपाधीनांमुप्तावुपर
तत्वतः। यथाजीवोनवेत्त्येवं प्राणोपीत्यभदुच्यते।२७। नेंद्रियाणांभवेत्स्वापोयदि
प्राणात्रधानता॥ नामात्याः शेरतेयस्माद्वाङ्मिस्वामिनिजाग्रति।२८। स्वापः प्रा
णस्यनाशंकोयतः स्वप्नमुष्टुप्तयोः॥ ऊर्वाणमनुमुलंशब्दं प्राण आस्तेप्रबो
धवत्।२९। तस्मादभोक्तृतैवास्यस्वनामात्रति बोधने॥ हेतुर्वा चस्वप्नयात्रा

णदेवतायाश्चभोक्तृता।३०॥ देवतात्रतिषेधार्थंबोध्यतेचंद्रनामनिः। तदबोधोदभोक्तृत्वंदेवतायाः
मुनिश्चितं।३१। प्राणस्याभोक्तृतांगार्ग्योव्यबुध्यततोनृपः॥ विज्ञानमयबोधायचक्रेयत्नमु
पायतः।३२॥ आपिप्पापिप्पबऊचाः मुप्तंराजाव्यबोधयत्। आपेषणोत्यसंहोभात्तोसौ
प्रत्यबुध्यत।३३। आपेषाल्लीनबुद्ध्यादिमुत्पत्तौपरात्मनः। घटाकाशवदुत्पत्तिर्यत्रबोधो
यमिष्यते।३४। अतश्चापेषणघोसावुत्थितःकरणैःसह। राजेवसचिवैःसार्धंसभोक्तेत्यव
गीयतां।३५। क्रोधहर्षभयोद्वेगज्ञानधर्मैर्विशेषयन्। शरीरंयःसमुत्तस्थौसभोक्तेत्यवगीय
तां।३६। मृतकल्पमिमंदेहंस्वपितावेशयन्निव। ह्वलन्निवसमुत्तस्थौपः सभोक्तेतिगम्यतां।
३७॥ देहएवास्तभोक्तेतिनवक्तव्यंजडत्वतः। स्पर्शयेषणवैषम्यादप्यभोक्तृनवेद्वपुः।३८

ईषत्स्पर्शादबुद्धोपिपेषणेनविबुध्यते। एतच्चदेहादन्यस्ययुक्तंसंबंधभेदतः।३९।देहादन्य
स्मदेहेस्मिन्समंबंधःकर्मभिःकृतः। अभिमानात्मकःसोपिकर्मभेदादनेकधा।४०। नीद्रा
भिमानवेलायामीषत्स्पर्शेनबुध्यते। अन्यचित्तत्वबेलायांदृढंस्पर्शमपेक्षते।४१। स्वाप्ना
न्नरूपन्नबोधायपाणिपेषमपेक्षते। सुषुप्तःपेषणाभ्यामाबुध्यतेस्मचित्तंहितत्।४२। देह
स्यभोक्तृतायांतु कस्यकृत्राभिमानिता। ततोबोधस्यवैषम्यंकिंकृतंस्पर्शपेषयोः।४३।
करणानामभोक्तृत्वंप्रत्येकंस्मृत्यसंभवात्। चक्षुर्दृष्टंनहिस्मर्तुमन्येषांशक्तिरिष्यते।४४।
संघातस्यपरार्थत्वादभोक्तृत्वंगृहादिवत्। स्याद्विज्ञानमयोभोक्ताप्रोक्तदोषविवर्जनात्।
४५॥ सुखदुःखानुसंधानंभोगस्थितिसउच्यते। नजडेधितिनिर्णीतमन्वयव्यतिरेकतः।४६

नान्वयोव्यतिरेकोवायद्यप्यहेतवस्तुनि। व्युत्पत्तिरथापाभ्यांभवतिव्यावहारिकी।४७। अ
ध्यस्तयापिव्युत्पत्त्याकृत्स्नभ्रांतिर्निवर्त्तते। स्वप्नताडनदाहादिभीत्यास्वप्ननिवर्त्तनात्।४८
अतोन्वयेनविज्ञानमयोभोक्तात्रवर्ण्यते। चिदन्वयोहिभोग्येषुनिखिलेष्वनुभूयते।४९। भोग्य
नांव्यभिचारेपिभोक्तृत्वव्यभिचारवान्। विज्ञानमयतातस्यविज्ञानप्रचुरत्वतः।५०। विज्ञा
नमंतःकरणंतस्मिन्नात्मोपलभ्यते॥ राजश्चंद्रेयथातद्वद्विज्ञानमयतातत्तः।५१। स्वाभाम
वदविद्योत्थबुद्ध्यादिव्यापिविभ्रमात्। तदात्मताभिमानीसन्नहमित्युपलभ्यते।५२।
यद्यप्युपलब्धिमात्रोपिविज्ञानाध्यस्तकर्त्तृतां। प्राप्योपलब्धास्यातेनविज्ञानमयउच्य
ते॥५३॥ स्फटिकोरक्ततांप्राप्यजपाकुसुमकल्पिनां। पद्मरागायतेनद्वदुपलब्धृत्वमा

त्मनः ।५४॥ यद्वोपलभ्योदेहादेर्विवेचितः । स्याद्विज्ञानमयस्तेनपुरुषः परिसरणात् ।५५॥
अदोषानूकल्पितानेषविज्ञानादीननात्मनः । आत्मासरयतिप्रत्यक्सूर्यादीनूरज्ञानाय
था ।५६॥ योविज्ञानमयस्तस्यद्वैतधीः स्वप्नजायते॥ अस्मिंसुप्तौउमानास्तिस्वभावोस्यात्रको
भवेत् ।५७॥ तस्यस्वभावंनिर्णेतुंसुप्तौकाभूदयंपुनः । कुतआगादिमंदेहमित्येतदिहचिंत्यते॥
५८॥ विहायेतच्छरीरंकिंसुप्तोदेहांतरंगतः ॥ विनष्टोवाथवावास्तेविदोषज्ञानवर्जितः ॥५९॥
देहप्राणाविहत्यत्काग्छेन्निःसाधनःकथं । नाशोबोधंयुनर्नस्यान्नस्थितोज्ञानवर्जनं ।६०॥
ज्ञःस्वभावोत्रतिष्ठेद्वेदमिमन्येतविग्रहं । औपाधिकोभिमानश्चेदुपाधेःक्वगतिस्तदा ।६१॥
उच्यतेकर्मनिर्जीवःसुखदुःखोपभुक्तये । जाग्रत्स्वप्नावबोधेतिस्वीकृत्यकर्मसुषुप्तति

DR BHAU DAJI

६२॥ अक्रियस्याप्यवस्थासुसंचारोबुद्ध्युपाधितः ॥ घटोपाधिवशाद्घटदाकाशस्यगमाग
मौ ॥६३॥ बुधेश्वाज्ञानकार्यायाःस्थानंहृदयमिष्यते॥ तत्रेंद्रियाणिसर्वाणिबुद्धितंत्राणिस
र्वदा ।६४॥ गोलकेषुधीस्थानिनाडीभिःकर्मणोवशात् । प्रसारयत्यधिष्ठायमत्स्यजाल
कवद्बहिः ।६५। बुधावक्षेषुचात्मांविद्रूपःप्रतिबिंबति । तादृग्बुद्धींद्रियोपाधिर्जागर्त्यात्मे
तिगम्यते ।६६। कर्मक्षयेबुद्धिरशैःमहाज्ञानेविलीयते ॥ चैतन्यप्रतिबिंबाश्चलीयंतेसास्त्र
यानतु ।६७। तदेंद्रियाणांविज्ञानं । धीविज्ञानेनसंयुतं॥ विज्ञानमयत्रादृतद्भूतिश्च
त्योपवर्ण्यते ।६८। धीविज्ञानोपसंहारेविज्ञानमयताहतौ॥ निर्विकारात्मचैत
न्यंकेवलंपरिशिष्यते ।६९॥ एतदेवविवक्षित्वाप्रतिपादयतिश्रुतिः । एषोंतर्हृद

याकाशस्तस्मिंश्चेतेदृतीदृशी।७०। बुद्धिर्हृदयनाड्येनझन्निष्ट्वाद्विवक्षते। आसमंता
त्र्याकाशातेयमित्याकाशोत्रविद्वपुः।७१। बुद्धेरंतःप्रतीचोन्योनान्यः संभाव्यतेयतः
तस्मादाकाशनाड्येनप्रत्यगात्मेहगृह्यते।७२। घ्राणादीनोंजन्मवक्षतेप्रत्यगात्मनः यतो.
तस्माच्चाकाशनाड्येनब्रह्मैवात्रानिधीयते॥७३॥ अधिष्ठानत्वमंतस्थमपरिछिन्नव
स्तुनः। अंतर्बहिर्विकारोयंनमुख्यउपपद्यते।७४। पराक्क्रमेयभूमिभ्योमनस्विवु
ध्यतेमति। अनन्यबोधप्रत्यक्त्वाद्यएषइतिभण्यते।७५। स्वतोवगमरूपेस्मिन्कू
टस्थेनिर्हयात्मनः। कार्त्स्न्येनावस्थितिर्भोक्तुः शेतइत्यनिधीयते।७६। घटभंगेयथा
काशोमहाकाशान्नभिद्यते॥ विज्ञानलोपेविज्ञानमयस्यैवयरात्मता।७७। देहाद्यध्

स्तांहित्वासुप्तौस्वात्मनिवर्त्तते। इत्येतन्नाध्यतेऋत्यासमाख्यायास्ययुक्तितः।७८। स्वप्नस्य
स्वपितीत्येषासमाख्यासर्वसंमता। निरुक्तिमाऽऽछंदोगाःस्वमपीतइतीदृशीं।७९॥
अतःसमाख्ययासुप्तौसाभाविकात्मनःस्थितिः। युक्तिश्चोपाधिसंहारः संसारित्वनि
वृत्तये।८०। रागाद्युपाधिसंबंधात्संसारित्वमिवेक्षते॥ तेत्वपसंहृताःसर्वतोसंसारि
तात्मनः।८१। सुप्तौकाभूदितिप्रश्नोयःमएवंविचिंतितः। तेनासंसारितैतस्यस्वभा
वइतिनिश्चितं।८२। सुप्तंबुद्धइत्येवस्वप्नेपश्यंतिचेतियः। विकल्पएषभूतानामविद्यारा
त्रिगायिनां॥ चित्तसंमोहमात्रेस्मिंस्त्रोकोयंपरिविद्यते॥ दिग्मोहाकुलविज्ञानोनष्टमार्गः
दृवाध्वगः।८४॥ इतिप्रपंचमिथ्यात्वंविस्पष्टयितुमंजसा। महाराजादयःऋत्यालोकाःस्व

प्राउदाहृताः । पाणिपेषप्रबोधेनदेहादीनामनात्मता । यद्यप्युक्तातथाप्यात्मविशुद्धिस्तावतानहि । एषासिद्धादेहादितादात्म्यमात्रस्यैवमृषात्मता । नतुदेहस्यमिथ्यात्वंतेनसंगोस्यशंक्यते ॥ ९ । स्पष्टंदेहात्मनोर्देहे भभ्युपेत्यापितार्किकाः । रागादिसंगमिच्छंतितन्निवृत्तैप्रयत्यते ॥ १० । असंगत्वंस्वभावोस्यसुस्पष्टोयद्यपिवर्णितः । तथापिस्वप्नमोलंव्यसोसिद्ध इतिशंक्यते ॥ ११ । सर्वेंद्रियवियोगेपि मुविदुःखिलमात्मनः । स्वप्नेदृष्टमतः संगआत्मनस्तात्त्विकोभवेत् ॥ १२ । नैवं मृषालात्स्वप्नस्यमनोमात्रविजृंभणात् । बाह्येंद्रियविलोपेपि नमनोलुप्यतेतदा ॥ १३ । महाराजादयः स्वस्यस्वप्नानुभवगोचराः । नवास्तवाइतिज्ञेयाः रायानोभ्रःपृथक्कृतः ॥ १४ । यदे रायानायेदृष्टास्तेतुस्वप्नेवनंगताः । जाग्रद्दृष्टंमृषास्वप्नेस्वप्नस्थंजागरेमृषा ॥ १५ । अ

१७१

न्योन्यव्यभिचारित्वात्स्वप्नजाग्रद्वस्तुयोः । मिथ्यात्वमित्यसावर्थः स्वप्नश्रुत्याविवक्षितः ॥ १४ । स्वप्नेदेहाद्बहिर्गत्वातत्तद्वस्त्ववलोकनात् । व्यभिचारीतिचेन्नभिन्ननीर्गत्यसंभवात् ॥ १५ । अंतः कृतः पर्वताद्याइतिचेदतएवहि । आदायावासनाः स्वप्नमीक्षते ॥ १६ । वासनासुचवस्तूलधीरविद्याविजृंभिता । इत्यात्मनोविशुद्धत्वंस्वप्नेश्रुत्योपवर्णितं ॥ १७ । व्यतिरेकंविशुद्धिंचजाग्रत्स्वप्नयोः श्रुतिः । प्रदर्श्यैवंप्रयत्नेनदृष्टरूपंमुमोक्षवे ॥ १८ । यद्यपिद्वैतमिथ्यात्वान्मिथ्यात्वंद्वयतान्मनः । भात्येवाथापितद्वैतंस्वप्नजाग्रद्वस्तुयोः ॥ १९ । द्वैतभावंप्रतीत्यापिहीनंमुग्नावदर्शयत् । सर्वंयद्यप्यथाप्यत्रविस्पष्टीक्रियतेपुनः ॥ २० । दृश्यंमिथ्यात्वतद्द्रष्टुर्दृष्टावास्तवीयतः । दृश्यंसापेक्षतेप्यैषाशंकात्रविनिवार्यते ॥ २१ । नकिंचन

यदावेदनदामुष्यइतीरणात्। आत्मनोज्ञानकर्तृत्वंमुक्तौनास्तीतिगम्यते।२।मामासबुद्धि
र्ज्ञानस्यकर्त्रीतिसंनिधानतः।स्फटिकेपद्मरागत्वमिवस्यात्ज्ञातृतात्मनि।३।परप्रयुक्तं
ज्ञातृत्वंपरलोपेविलुप्यते। अतोत्संसारितामुष्यावात्मनःस्वानुरूपितः।४। नयथाश्रोत्रवि
ज्ञानंरूपेणेतिसमागमं। संसारेणतथैवात्माकौटस्थ्यान्नेतिसंगति।५।निःसंगस्यसमंगेन
कूटस्थस्याविनाशिना। आत्मनोनात्मनायोगोवास्तवोनोपपद्यते।६। मुक्तोकेनक्रमेणाय
मुपाधिःप्रविलीयते। तत्क्रमस्यावबोधायहृदयादिविविच्यते।७। आनाभितस्तथाकंर्म्ह
दयंमध्यतःस्थितं। सनालपद्मकोशाभंपंचछिद्रमधोमुखं।८। कदंबकुसुमोद्भूतकेसराइ
वमर्वतः। प्रसृताहृदयान्नाड्योबद्धन्नरसरश्मिताः।९। निर्गत्यहृदयाद्बुद्धिन्नामुख्यप्रंत्र

पश्यति। नाभिर्देहाद्बहिर्गत्वाजाग्रतीत्यभिधीयते।१०। पुनः प्रत्यवसर्प्यैषापुरीतद्देष्टितेहृ
दि। प्रविश्यलीयतेदेहंव्याप्यसामान्यरश्मितः।११। बुद्धेरव्याकृतावस्थारश्मिःसामान्यसंश्रिता
व्याप्योदेहंस्थयासुप्तौतैलेनेवतिलोखिलः।१२। व्याकृतोपाधिविलयेद्वैतभानंनिवर्त्तते। सु
प्तीनवत्प्रलयत्वंतदानीप्रत्यगात्मनः।१३। सर्वसंसारदुःखानामत्यंतोपरमात्तदा। आनंद
स्यपरानिष्टदृष्टेतेःसोपमीयते।१४। इंद्रियस्याप्रबुद्धत्वात्स्वेष्टप्राप्तेर्विकल्पितः॥ नीरा
गाणांबालराजब्राह्मणानांक्रमात्सुखं।२५। दुःखंरागद्वेषजन्यंतदभावेसुखंस्वतः। इति
व्याप्तिगृहीत्यर्थंबकुदृष्टांतवर्णनं।२६। यावद्यावत्प्रबुद्धत्वंरागादेर्जायतेहृदि। तावत्तावत्प्र
बुद्धत्वंदुःखस्याप्यभिजायते।२७ यावद्यावत्तनुत्वंस्याद्रागादेःप्रत्यगात्मनि। तावत्ताव

नुलंभ्यात् दुःखस्यापिसुखात्मनि।१९। अशेषदुःखहेतूनांविलोपात्सुखआत्मनि। दुःखही
नेपरानिष्टानंदस्येत्युपपद्यते।१९। आनंदस्यात्मरूपत्वाद्विषयीक्रियतेनसः। स्वप्नकारा विदा
त्मत्वा तत्स्वयमेवविभाव्यते।२०। अद्वयानंदरूपत्वमित्थंसुप्तौप्रदर्शितं। एतावतास्वभावो
स्यनिर्णीतःप्रत्यगात्मनः।२१। क्वासूदेतिप्रश्ननिर्णीयकृतआगतः। इतिप्रश्नंविनिर्णे
तुमूर्णनाभ्यादिकाश्रुतिः।२२। यत्रा भून्नतएवैषआगच्छेदितियद्यपि। ज्ञायतेर्थान्नथाप्य
त्रतदुक्तिरुपयुज्यते।२३। अवध्यवधिमद्भेदआधारोधेययोर्मिदा। यथालोकेतथा
नात्रेत्यसावर्थोविवक्षितः।२४। एतदर्थानुकूलौद्वौप्रश्नौतेनोत्तरंपृथक्। उक्तंतस्योत्तर २९५
स्यैषतात्पर्यार्थउदीर्यते।२५। नान्यत्रा भूदयंसुप्तोनान्यस्मादुत्थितःपुनः॥ सुप्तुत्थान

भ्रमःप्रणेर्बुध्युपाधिविज्ञंनितः॥२६॥ अथवादर्शितंसुप्तावमंर्गत्वंचिदात्मनः। जगद्धेतुत
योक्तानेब्रह्मनातस्यवर्ण्यते।२७। अवास्तवत्वाज्जगतोनाद्वयत्वंविहन्यते। दृश्यमज्ञानजत्वे
ननवस्तुस्वप्नदृश्यवत्।२८। नासतोजन्मनायोगः सतःसत्वान्नचेष्यते। कूटस्थोविक्रिया
नास्तितस्मादज्ञानतोजनिः।२९। वास्तवीजनिमाकुर्यात्तेवाच्यंसृष्टिकारणं॥ प्रधानंपर
माण्वादिःप्रवर्त्तकमपेक्षते।३०। नतत्प्रवर्त्तकदृश्यश्चेन्नसोपिकेनप्रवर्त्तितः। लीनत्वा
त्कामकर्मादिनप्रवर्त्तयितुंक्षमं।३१। शक्तिर्नियामिकाचेसाकेनान्येननियम्यते। अवि
चारितरम्यातः सृष्टिरात्मनिकल्पिता।३२। तथाप्येकात्मबोधायश्रुत्यासृष्टिरुदीर्य
ते। बुध्यारोहायमंदानांसृष्टौदृष्टांतउच्यते।३३। अचेतनोयथातंतुरूर्णनाभेः सचेत

नात्। जातश्चिदात्मनस्तद्वत्प्राणलोकाद्यचेतनं ॥३४॥विस्फुलिंगायथाचाग्नेर्जायंतेग्निस्वभा
वकाः। तथासुप्तात्मनोजीवाविज्ञानमयनामकाः॥३५॥ प्राणाद्युत्पत्तिमिजीवाउत्पन्नाइ
तिविभ्रमः। आकाशोत्पत्तिविभ्रांतिर्यथाकुंभादिजन्मनिः॥३६॥ प्राणाद्युत्पत्तिरप्यत्रभ्रांतै
वेतिमतंयदि। तथाप्यस्तिविशेषोत्रतयोः प्राणादिजीवयोः॥३७॥ स्वरूपतोजन्मतस्यप्राण
दिर्भ्रांतिकल्पितः। जीवस्यकल्पितंजन्मस्वरूपंतुनकल्पितं॥३८॥ उद्भूतिस्थितिनाशा स्यु
र्जगतोस्यप्रतिक्षणं। अविद्यामात्रहेत्वत्रानीषांविद्यतेक्रमः॥३९॥ यस्मादविद्यया
वात्माप्राणहेत्रजरूपभाक्स्यतोतःसपरंब्रह्मतस्योपनिषदुच्यते॥४०॥ यद्वुब्रह्म
त्यणोनामबोधायोपासनायवा। तत्स्यादुपनिषच्छब्दवाच्यंतच्चात्रबुद्धये॥४१॥ सत्य

स्यसत्यमित्येतन्नामब्रह्मावबोधकं। प्राणात्प्रायातताः सत्याःसत्यंब्रह्मैववस्कृतः॥४२
॥असत्योदेहउदितएकजन्मन्युपक्षयात्। सत्याः प्राणालिंगरूपात्रामोहमनुपक्षया
त्॥४३॥मोक्षेप्यक्षीणआत्मानुसत्यात्सत्यउदाहृताः॥सत्यस्यसत्यंप्रोवाच
ब्रह्मवालाकयेनृपः॥४४॥एतद्ब्राह्मणतात्पर्यविचारस्यप्रसंगतः। लक्षणास्त्रस्यता
त्पर्यमिदानींनिरूप्यते॥४५॥संसार्येवकिमात्मास्यादुतासंसार्यपीश्वरः। सर्वेशोनिष्ठ
नेजीवादथवानहिनिष्ठते॥४६॥नानारसमभेदेपिब्रह्मैकरसमेववा। सतिचैकरसेब्रह्मे
कविरोधोत्रास्तिवानवा॥४७॥संसार्येवास्तिनेशोन्योयस्मादत्रश्रुतिःस्वयं। सुप्तासंसा
रिणोजीवात्प्राणाद्युत्पत्तिमब्रवीत्॥४८॥मैत्रेयीब्राह्मणेप्येवंभार्यादिप्रीतिरूचिनं

संसारिणमुपक्रम्यदृष्टव्यःसइतीर्यते ।४९। नवासौमुक्तपवस्थायामसंसारीभविष्य
ति ।स्वभावस्यान्यथाभावोयस्मान्नक्वापिदृश्यते।५०। सांख्यादयस्तथेशस्यस्वभावंव
ऊ युक्तिभिः।आपादयंतियत्नेनतेभ्योन्यःकोधिकोधिया ।५१। एवंग्राह्येवदामोत्र
बऊ ऋत्युपजीवनात्।असंसारीपरोक्तीवोयस्यसर्वमिदंवशे।५२। यःसर्वज्ञःस
र्वविच्चयोज्ञानायादिवर्जितः।यःस्थित्यामितथानेतिनेतीतिनिचागमः।५३।ब्रह्म
ब्रवाणीत्युक्तत्वादत्रापिब्रह्मणःऋतिः।ग्राणाद्युत्पत्तिमाचष्टेनतुसंसारिजीवतः ।
५४॥ सतासौम्येत्यादिशास्त्रात्सुप्तौब्रह्मावशेषतः।जगत्सृष्टिर्युज्यतेसोसृष्टिप्राप्या
त्मरात्मनः।५५। द्रष्टव्यश्चपरात्मैवसर्वमात्मेतिवर्णनात्॥असंसार्यभिप्रायतोत्रभवेत्

संसार्यपिक्रमः।५६॥जगत्सृष्ट्यादिसामर्थ्यनेशादन्यस्यतेनते।सांख्यादयोबुद्धिहीना
बुद्धिमंतश्रुतार्किकाः।५७जीवेशभेदमाऊस्तेनसाजीवोमहेश्वरंगआराधयेदहंब्र
ह्मेत्येवंमत्वायतत्परः।५८। नैतदेवंब्रह्मणेत्रमंत्रब्राह्मणमानतः।त्रवेदाःश्रूयते
तस्मान्नास्तिजीवेशयोर्भिदा।५९॥तत्सृष्ट्वानुप्राविशत्तत्पुरःपुरुषश्चाविशत्।इत्या
दीन्यत्रवाक्यानिसंतिब्राह्मणमंत्रयोः।६०।जीवोब्रह्मविकारोतोब्रह्मनानारसंततः।बं
धमोक्षव्यवस्थेतिकेचित्तन्नयुज्यते।६१। घटकेशादधीनीवविकारोभवतीतियः।युत
सिद्धोदृश्यवंशोमृत्पिंडोघटतांव्रजेत्।६२।केशास्तयुतसिद्धांशःपलितत्वंसमश्नु
ते॥क्षीरंसर्वदधिभवतिभवेद्ब्रह्मनतुत्रिधा।६३।कूटस्थत्वान्निरंशत्वाद्ब्रह्मणोनास्ति

विक्रिया। दिव्योद्यमूर्तिरुत्पादिश्रुतिवाक्यसहस्रतः। ६४। विस्फुलिंगश्चकेतज्ञो वोब्रह्मांशः
संस्मरेद्यदि। तर्ह्यशस्फुटनाद्ब्रह्मसंयुज्येतव्रणेननत्। ६५। अकायमव्रणंचेतिश्रुतिर्व्रणनि
षेधिनी। स्वप्नसंसारवत्तस्मा जीवसंसारदृष्यतां। ६६। विस्फुलिंगाद्युपन्यासः क्षेत्रज्ञपरमा
त्मनोः। ऐकात्म्यप्रतिपत्त्यर्थोनजीवंभेदुमर्हति। ६७। मृल्लोहविस्फुलिंगैस्तुसृष्टिर्यावोदिता
न्यथा। उपायःसोवतायेरोत्पाद्यरागमवेदिनः। ६८। विस्फुलिंगोयथोत्पत्तेः सर्वमय्यात्म
कस्मथा। क्षेत्रज्ञः सृष्टितः सर्वंपरमात्मैवनापरः। ६९। भ्रांत्याक्षेत्रज्ञताभातिबोधादे
षानिवर्त्तते। इत्यत्रराजपुत्रस्यव्याधतास्यान्निदर्शनं। ७०। राजपुत्रोरोगवद्गडुन्मत्त
मन्वनेगतः॥ चिरंव्याधगृहेस्थित्वाव्याधोस्मीत्यभिमन्यते। ७१। उन्मादशांतावप्येषनतां

समस्मारराजतां। अभिज्ञःकश्चिदागत्यस्मारयामासराजतां। ७२॥ ततोराज्ञेभिषिक्तःमन्त्र्या
धतांनैवमन्यते। ब्रह्मण्येवंयोजनीयोबंधमोक्षौप्रकल्पितौ। ७३॥ ब्रह्मैवाविद्ययादेहंश
प्यरागादिदोषतः। मदमत्कर्मजन्मादिबंधमात्मन्यमन्यत। ७४। नित्यकर्मविपाकेनरा
गाद्यपगमेसति। गुरुशास्त्रोपदेशेनब्रह्मत्वंस्वस्यबुध्यते। ७५। जीवन्मुक्तिंततः प्राप्यस्व
बंधंनमन्यते। इत्थंबंधस्यमिथ्यात्वाद्ब्रह्मैकरसमेवहि। ७६। अस्वीनपराधुक्तेः ब्रह्मा
नघनशाश्वतः। नेदृङ्नापवादाच्चब्रह्मैकरसमिष्यतां। ७७॥ केचिदेकरसेतस्मिंविरोधं
मानमेययोः। बकुधाचोदयंत्यत्रपंडितंमन्यतांगताः। ७८। सर्वाद्वैतंबोधयेच्चैदधीतोपनि
षन्नदा। स्वप्नामाण्यंकर्मकांडप्रमाण्यमपिहंत्यसौ। ७९। गुरुशास्त्राद्यभावेनस्वप्नामाण्यम

संनवि॥ निषेधविध्यभावेनकर्मकांडेप्यमानता। ३७। ज्ञेयंचाद्वैतवस्तत्रसर्वमानैर्विरुध्य
ते॥ भिन्नारूपादिविषयामीयंतेचक्षुरादिभिः॥ ८१। नानात्मानोनुमीयंतेसुखदुःखव्यव
स्थया। आगमेनापिगम्यास्तेयामकामादिनेदृतः। ८२। प्रत्यक्षेणानुमानेनशास्त्रेणापिविरुद्ध
तां। एवमुद्भावयंत्येनेब्रह्मैकत्वप्रहूषकाः। ८३॥ नैषदोषोऽप्रमाणत्वंकर्मोपनिषदोवदन्। बो
धात्मागथवापश्चान्नप्राक्द्वैतसंभवात्। ८४। गुरुशास्त्रादयः संतिबोधात्सर्वमबाधिताः। अ
बोधसंशयभ्रांतिवाक्यानास्त्यप्रमाकृतः। ८५। बोधादूर्ध्वंचवैफल्यात्अप्रमात्वंकिंनवेक्ष्यते॥
मानांतरविरोधाद्वामेयस्यासंभवादुत॥ ८६॥ संसारानर्थदानारयेवेदांतज्ञानजेफलौ। अ
न्यद्वेणानुभूतेत्रनैष्फल्यंकथमुच्यते। ८७। किमेकविषयत्वेनकिंवाविषयभेदतः। विरोधः

शंक्यतेनत्रनैकार्थौस्तिविरुद्धता। ८८। विभिन्नविषयत्वेतुनितरामविरुद्धता। नैवासंभवशं
कास्मिन्सर्वार्थेषवभासनात्। ८९। प्रमाणमप्रमाणंचप्रमाभासस्तथैवच। ऊर्ध्वंत्वेवप्रमांयत्रत
दसंभावनाकृतः। ९०। दृष्टः प्रबुधैकात्म्येगुरुशास्त्राद्यसंभवः। मानस्यचरितार्थत्वात्॥
स्वप्रामाण्यंनहंत्यतः। ९१। कर्मकांडस्यमात्वंचहन्याद्युपनिषत्कथं। कांडयोरेकवाक्य
त्वमथवाभिन्नवाक्यता। ९२। उपायोपेयबोधित्वात्कर्मवेदैकवाक्यता। यदितर्ह्यविरुद्धत्वा
त्कृतः प्रामाण्यघातिता। ९३। अथात्रभिन्नवाक्यत्वंसिध्येन्नैकार्थभेदतः। तदापिनविरो
धोस्तिविभिन्नविषयत्वतः। ९४। निषेधतिविधत्तेवा। नामावुपनिषत्क्रियां। प्रत्यक्षतैक
मबोधेतद्वाक्योपहेयोयतः। ९५। द्वैतेमिथ्यावाधितेबोधात्कर्मकांडस्यसर्वथा। अपफ

येनविषयदूतिरांकानयुज्यते।९६।नद्वैतमत्यतांकर्मकांडस्यविषयोपिच्च।साध्यसाधन
संबंधोनत्वमाविद्बाध्यते।९७।द्वैतमत्यत्वमिथ्यात्वेत्रांविचार्यैवमानवः।इष्टप्राप्तिमनिष्ट
स्यनिवृत्तिमभिवांछति।९८।साध्यसाधनसंबंधंतादृशाः कामिनोर्कवत्।कर्मकांडोभास
यतेकामीतत्रप्रवर्त्तते।९९।अकामतः क्रियाकाचित्दृश्यतेनेहकस्यचित्।यद्यद्धिकुरु
तेजंतुस्तत्तत्कामस्यचेष्टितं।१००।ननिवर्त्तीयितुंशक्तापुरुषान्कामिनः श्रुतिः।नापिप्रेर
यितुंशक्ताविरक्तान्कर्मसुक्वचित्।१।यथोचितंबोधयतिश्रुतिः।कामिविरागिणौ।।वर्त्त
तेकर्मकांडस्यमानत्वंहन्यतेऊतः।२।नाप्यद्वैतविरोधोस्तिरूपादिग्राहकेंद्रियैः।किं २९८
भोश्वाद्यादिभेदेनव्यामैकत्वंविरुध्यते।३।मायाकल्पितरूपादीन्प्रतिनाश्वस्तुगादयः।गृ

ह्णंत्येवकिमायातमद्वैतमपरमार्थतः।४।नानात्मानोनुभीयंतइत्येतदपिदुर्घटं।।किमप्रमेये
नानात्वमाहोस्विन्मेयत्वात्मनि।५।अप्रमेयेनुमानस्यप्रवृत्तिर्नकथंचन।।प्रमेयत्वेस्यनाना
त्वाद्भेदोस्माभिरपीष्यते।६।ग्रामकामादिभेदोत्यंतेदंचैवंनयेद्बुधः।दृश्योभेदःप्रमेयाणां
काम्पंतःकरणात्मनां।७।प्रत्यक्षमनुमानंचशास्त्रंचप्रत्युताद्दये।आत्मन्येवप्रसिध्यंतिमु
नयांसुविचारिणं।८।आत्मावभासिकाहंधीःसाचैकत्रैवजायते।।निपुणोप्यहमित्येवंनानै
कत्रात्मनिमन्यते।९।एकात्मवंतोदेहाःस्युर्विवादोयत्रवर्त्तते।शारीरत्वाविशेषत्वात्तत्रति
वादिशारीरवत्।१०।वेदांतेष्वखिलेष्वात्मवस्त्वेकमितिडिंडिमः।तस्मादेकरसेन्योक्तवि
रोधोनास्तिकश्चन।११।२११।। ॥इतिवार्त्तिकसारेचतुर्थाध्यायस्यप्रथमंब्राह्मणं॥ ॥८॥

सर्वस्मिन्ब्राह्मणेप्राणादन्यश्चात्मेतिविस्मृतं। संगृहीतंचतात्पर्यमत्यमत्येतिनामतः।२।वस्तु
संग्रहवाक्यत्वात्सूत्रप्रायमितिस्थितिः।मत्यशब्दद्वयस्यार्थौप्राणात्मानावबोधतः।३।आ
दिश्रियेतेतावर्थौक्रमेणब्राह्मणद्वये।भवत्येतावतास्पष्टंगार्ग्यराजमतद्वयं।३।तत्रप्रा
णस्योपाधिःस्यादात्मोक्रांतिप्रवेशयोः।अतश्चात्मत्वविभ्रांतिर्बिलाकेरभवत्पुरा।४।
आत्मोपाधित्वयैवास्यप्राणस्यास्योपास्यता।सप्राणस्तूपाधिश्चब्राह्मणेस्मिन्विविच्य
ते।५।शिरस्त्वद्विषयासंगरहितःप्राणइष्यते।वागादीनामिवयतोविषयोस्यनहरूपते
६।शरीरमस्याधानंस्याद्देहंआपादमस्तकं।सामान्यरूपासंघाप्यचेष्टयत्यनियंयत
७।अत्याधानंशिरोज्ञेयंप्रतिछिद्रव्यवस्थितः।प्रसारयतिनेत्रादीन्प्राणोमूर्ध्निविशेष

तः।८।प्राणस्यबंधनस्तंभः शरीरबलमिष्यते।दौर्बल्येसतिदेहस्यप्राणोक्रांतिर्हिदृश्य
ते।९।बंधनायाम्पदामानंवस्त्रबंधनरज्जुवत्।अन्नेत्रिधाविभिन्नेस्मिन्भागाभ्यांवध्यते
द्वयं।१०।स्थूलभागःपुरीषंस्यान्मध्यमोदेहपोषकः।प्राणंतर्पयतेसूक्ष्मइतिबंधंवपुर्द्वयं
११।एवंविवेचितंप्राणंयउपास्तेतृणादिमः।आत्मत्वान्नद्विषतःसप्तमूर्ध्निछिद्रव्यवस्थिता
न्।१२।आत्मनाःसहोत्पत्तेःशब्दाद्यासंगरत्नयः।द्विषंतिचमुमुक्षुंतानप्रत्यगृह्यपहारतः
स्व।१३।सेवंतेहिस्थितंप्राणंसप्तरुद्रादिदेवताः।अक्षीणदृत्युपास्तेयःसोन्नाद्यमुपाश्नुते
१४।कर्णादिसप्तछिद्रेषुगौतमाद्यृषिनामकाः।स्थिताप्राणइतिध्यायेद्वाचंचब्रह्मवादिनीं।
१५।हिरण्यगर्भरूपेणसर्वभुक्त्वादुपासकः।इतिगार्ग्यमतंसम्यक्ब्रह्मणेस्मिन्प्रपंचितं

॥ गार्ग्येणोक्तं ब्रह्मविस्तृत्य
तन्निरासायसांप्रतं। तृतीयब्राह्मणेप्राह राजोक्तब्रह्मविस्तृतं।१। प्रथमब्राह्मणेराजाब्र
ह्मयद्यप्युवोषतः। उवाचाथापिमत्स्यमत्स्यतानदिविस्तृता।२। सत्यमत्स्यत्वविस्तार
मुखेनप्रतिपाद्यते॥ निःप्रपंचब्रह्मतत्त्वंतृतीयब्राह्मणेस्फुटं।३॥ हेएवब्रह्मणोरूपेप्रपं
चत्वमुपागते। मूर्त्तामूर्त्तात्मकेयाभ्यामरूपंब्रह्मरूप्यते।४॥ मूर्त्तामूर्त्तेप्रपंचस्यवासनात्वेति
वाद्वयं। नवासनमिदंरूपमनिदंचेतिवाद्वयं।५। सन्निवेशेनयद्रूपंयस्यतन्मूर्त्तमुच्यते
स्त्रित्वंब्रह्मत्रयंमूर्त्तममूर्त्तंत्वितरद्वयं।६। मूर्त्तामूर्त्तस्वभावत्वमशेषजगतीस्थितं। आवि २७०
स्कृतस्तत्स्वभावोमर्त्यत्वादिविशेषणैः।७। मूर्त्तंस्थूलवपुर्मर्त्यंसूक्ष्मात्तद्विप्रविनाशतः

अमूर्त्तंसूक्ष्मममृतमामोक्षमविनाशतः।८। पांचभौतिकतात्तुल्यायद्यपिस्थूलसूक्ष्मयोः॥
तथाप्यत्रविशेषोस्तिप्रधानगुणभावतः।९। स्थूलस्यमूर्त्तिप्राधान्यान्नद्रुषातद्विलोक्यते। च
मूर्त्तस्यप्रधानत्वात्सूक्ष्मंनैवविलोक्यते।१०। पांचभौतिकयोःस्थूलसूक्ष्मयोर्मर्त्यतामृते। यथा
तद्वत्परिछेदव्यापित्वेचविशेषणे।११। मदितित्पदितिप्रोक्तेप्रत्यक्षत्वपरोक्षते। मूर्त्तामूर्त्ते
चताद्रूक्षादृपेद्वेसत्यनामनी।१२। अध्यात्ममधिदैवंचयथाशास्त्रंव्यवस्थितं। अभिद्रुमुभय
स्यापिस्थूलसूक्ष्मवपुर्द्वयं।१३। स्थूलमारतयाज्ञेयंचक्षुरादित्यमंडले। मूर्त्तमर्त्यपरिछिन्न
प्रत्यक्षत्वविशेषिते।१४। अमूर्त्तामृतमंव्याप्तपरोक्षत्वैस्वसंयुतं। उभयत्रास्थितंलिंगंमूर्त्त मत्र
रमत्रचयते।१५॥ हिरण्यगर्भक्षेत्रज्ञममूर्त्तरसमूचिरे। केचिन्मेधाकर्ममुख्यादियद्वाद्या

दिसर्जनात्।१६।नैवं मूर्तरसेनाम्यविरूपत्वप्रसंगतः। वाक्यत्वयुक्तौउल्यायोनयुक्तार्थवि
रूपता।१७।यद्वन्मूर्तरसोभीष्टश्चउविधविशेषणः॥अचेतनस्तथैवायममूर्तरसद्
ष्यतां।१८।अचेतनोप्यन्नमयोदेहःपुरुषसंश्रितः। श्रुत्यंतरेतथात्रास्तलिंगंपुरुषसंज्ञि
क।१९।ब्रह्मोपाधिस्थानतयारव्यदृष्टेरतिसारता। व्यवहारेपाधितयालिंगस्यापिवसार
ता।२०।मारासारयुतेरूपेमूर्तीमूर्तेउदीरिते। अरूपंब्रह्मरूपाभ्यांव्यवहारेनिरूप्यते।
२१।मूर्तामूर्तव्यवस्थेयंयथाश्रुत्युपवर्णिता। अथयुक्त्यनुसारेणमान्यथाप्युपवर्ण्यते।२२
अमूर्तनातिसूक्ष्मेत्रममाप्तामूलकारणे। मूर्तत्वमथतिस्थूलेकार्यसंघेसमाप्यते।२३
मध्येकारणकार्याणांमूर्तताअमूर्ततेदृमे। आपेक्षिकौयथायोगमुदाहरणमिष्यतां।२४॥

२०१

अविद्यामात्रगंब्रह्मकारणंबुद्ध्युपाधिगं। ज्ञात्वतद्व्युपाधिस्थंज्ञायमानंघटादिकं।२५।एवं
चसत्युपाधीनांक्रमेकमनिमूर्तता। उपाधिरहौमूर्तत्वंवर्धतेत्युदितंभवेत्।२६।मूर्तामूर्ते
ब्रह्मरूपेदृतिपक्षौनिरूपितः। अपंचतद्वासनेद्वैरूपेदृत्येषवर्ण्यते।२७॥अपंचोनामसर्वोक्त
मूर्तीमूर्तेद्वयंभवेत्। तद्वासनाविचित्राःस्युरनंतालिंगमाश्रिताः।२८।अनेकवासनाचित्रं
तल्लिंगंपटभित्तिवत्। मायेंद्रजालसदृशंव्यामोहास्पदमात्मनः।२९।एतावन्मात्रआत्मेति
तत्रभ्रांतानिरागमाः। बौद्धकाणादसांख्याद्यास्तर्कमात्रोपजीविनः।३०।एकैकांवासनांतत्र
प्रतिक्षणविनश्वरीं। आहुःक्षणिकमात्मानंबौद्धाविज्ञानवादिनः।३१।आत्मनोद्रव्यभूत
स्यगुणाबुध्यादयोनव। वासनाख्यानवेदोक्तादृतिवैशेषिकादयः।३२।त्रिगुणंयत्प्रधानं

तत्पुरुषार्थनहेतुना । प्रवर्त्तनेवासनात्वक्त्रिमत्रेतिकापिलाः ।३३। अप्योपनिषदंमन्याः प्र
क्रियांकल्पयंत्यमूं । वस्तुनोराद्यायः प्रोक्तास्तत्तमाधममध्यमाः ।३४। उत्तमः परमात्मास्मा
न्मूर्त्तामूर्त्तात्मकोधमः । जीवात्मामध्यमः साकंवासनाज्ञानकर्मभिः ।३५। कृत्स्नशक्तिरविद्या
ख्यापरमात्मनउत्थिता ।३६। विकृत्यपरमात्मांशंजीवभावंनयत्यमुं । यद्यंशेषरात्मकोदो
षोभूमेर्जातोविकृत्यतं । भूम्यंशमास्तेनदूरस्थारविद्येयंपरात्मनः । ३७। अनात्मधर्मएवे
यमविद्याभ्रांतिलक्षणा । अंशोस्मिन्मांसमित्यंतमनुवर्त्तीमहेतवः । ३८। वासनाकाम
कर्माणिलिंगस्थान्येवतान्यपि । लिंगादात्मानमायांतिगंधःपुष्पपुटेयथा । ३९। गंधःपुष्पयु
णःपुष्पात्पुटमाश्रित्यतिष्ठति । क्रमुमापगमेप्येवंलिंगस्थावासनात्मनि । ४०। निर्गुणोपि

परैकांशोबाह्यादभ्यागतेवद्द । कर्मणासगुणस्तेनकर्त्ताभोक्ताभवत्ययं ।४१। वैशेषिकम
तंचैवमंशादनुसृतंभवेत् । अपांचभौतिकंरूपंचैवमैंतत्सावासनं ।४२। इत्यौपनिषदंम
न्यैरुक्तंनर्तृप्रपंचकैः ।। लिंगस्यवासनारूपएवंमुह्यंतिवादिनः ।४३। अश्रौतत्वादुपेक्ष्या
ःस्युःप्रक्रियावादिकल्पिताः । राशित्रयस्यगमकंवचोनोपलभामहे ।४४। जीवोनब्रह्मणोन्यो
स्तिचैकामसंकल्पसर्वकाः । वासनास्थमनोधर्मामध्यमोराशिरत्रकः ।४५। एतस्यपुरुषस्ये
तिश्रुतेश्चेतनधर्मता । नवासनानामांशंकालिंगस्यपुरुषत्वतः ।४६। हृदयेह्येवरूपाणि
कामायेस्युरुदाहृताः । इत्यादिनिर्वासनानांश्रयतेलिंगधर्मता ।४७। नपुष्पगंधवल्लिंगवा
सनाजीवमाश्रयेत् । असंगोहीतिजीवस्यसर्वसंबंधवारणात् ।४८। अविद्यायासंगत्वे

तविद्यानतदीरिता। परात्मनस्तदुत्थाने मुक्तादप्युदियादसौ।४९।अविद्याचेदनिर्वीज्यात
यालिंगस्थवासनां॥आरोप्यंतंयथाकाममलिंगेपिविदात्मनि।५०वासनाभूरिरूपास्तालिं
गस्थालिंगमाक्षिणः।कुर्वंतिबऊरूपत्वंमणेरात्मरणंयथा।५१।भौतिकंबऊरूपत्वंभूतवा
सनयाकृतं।पुष्पवासनयाजन्योगंधपोष्योयथापुटे।५२।आत्मनोत्वमपेतद्यदास्याद्भौति
कंतदा।भूतलेशस्वरूपाणांवासनानांतुकाकथा।५३॥भूतभौतिकवस्तूनांपदासंयुज्यते
मनः।तदैवाधीयतेचित्तेतत्त्रैगुण्यात्मकवासना।५४।हिंगुगंधोयथालग्नः करंडेनविमुंचति॥
एवंजगद्वासनाश्चनमुंचंतिधियंचिरं।५५॥कदाचित्कांचिदुद्बोध्याकर्मणाभोगसिद्धये॥
भोगकालेनतास्वात्माःमुभास्तिष्ठंतिमानसे।५६।अनंतकल्पोपचयादनंताएववासनाः॥

उदाहरणमात्रंतुदृष्टांतैरिहवर्णिते॥५७॥हारिद्रंवसनंयद्वत्संसर्गात्पीततांव्रजेत्।तद्व
न्नार्यादिसंसर्गीत्स्त्रिंगरागादिमान्भवेत्।५८।ईषत्पांडुस्वपुरुषः स्यात्ततःश्वेतकंवलः।
तथेषच्छुभयायुक्तस्ततोरागादिभागपि।५९।दृढगोपीतिरक्तःस्यात्ततएवतथामनः॥
विविक्तदेवास्थस्यापिविषयश्चवणंक्वचित्।६०।अग्नेरर्चिर्यथाभास्वदहत्यपितथाक्वचि
त्॥वेदज्ञास्त्रविदप्यन्यैर्बाध्येतेर्षाद्युपद्रवैः॥६१॥सितांभोजंयथासौम्यंसुगंधिमृदुच
स्ततः।जन्मनैवतथाचित्तंयुक्तंरागादिभिः।६२॥तीव्रविद्युद्यथात्यंतंघनध्वांता
यनोदरुत्॥तथाहिरण्यगर्भस्यसर्वज्ञावासनाभवेत्।६३॥तामुपोसीनआप्नोतिश्रिय
मत्यंतमूर्जितां।रजःसत्वतमोयोगाद्वासनानांविचित्रता।६४।प्रपंचवासनोद्भूतरूपे

इत्येवमीरितं। तथेदमनिदंरूपेइतिपक्षोधुनोच्यते। ६५। सर्वमनंजगत्सर्वंतन्नेदंरूपमीरितं। मच्चत्पच्चेतिसत्यंतत्प्रोच्यतेपांचभौतिकं। ६६। सत्यम्यसत्यमनिदंवक्तव्यंनिष्प्रपंचतः॥ आदेशोनंतरंतस्यक्रियतेनन्यमानिनः। ६७। आदेशोनेतिनेतीति ब्रह्मतत्त्वावबोधकः॥ यथायमुपपद्येततथासम्यङ्निरूप्यते। ६८। इतिशब्देनचिद्ब्रह्मस्वमनूद्यतेनिषिध्यते। नकारेणेहिरुक्तिरुक्तवीप्सारुक्तनिषिद्धये। ६९॥ मूर्तंवायदिवामूर्तंमज्ञानंवासनाथवा। अध्यात्ममधिदैवंवातत्सर्वंनिषिध्यते। ७०॥ नचेद्दीप्तानदाह्याभ्यांदह्यमेवंनिषिध्यते॥ ततश्चब्रह्मणाशंकादृश्येनास्मिन्प्रसज्यते। ७१॥ वीप्सयासर्वदृश्यस्यनिषेधेतत्वनिष्ठ्यते। अमेयमेवमेवातोयथावद्ब्रह्मबुध्यते। ७२। नशून्यंनिष्ठ्यतेस्यापिदृश्यत्वादेव

DR BHAU DAJI

निरुक्तवान्। नाचाभावनिषेधोन्यद्ब्रह्मणः शिष्यतेत्रकिं। ७३॥ ३०० नब्रह्मणोनिषेधः स्यादितिशब्दासमर्पणात्। ब्रह्मवेदितिशब्दार्थः किमन्यदनिदंभवेत्। ७४॥ नांतरेणाखिलंदंतत्वमिदमर्थः प्रसिध्यति॥ यत्तेस्यादनिदंतत्वंतदेवब्रह्मनेमते। ७५॥ निषेधोपिसमस्तस्यवनाद्यः साक्षीनिषिध्यते॥ यन्निषेधुमवाक्यंतत्साक्षीब्रह्मेतिगम्यतां। ७६॥ इतिशब्देनकाराभ्यांवाच्यंब्रह्मनानहि। अतिरिक्तंनुनोक्तंकथंब्रह्मविबुध्यते। ७७॥ स्वतःप्रत्यक्परागर्थहृयेनैषानुरंजिता। धीर्निषिद्धापरागर्थात्प्रतीचिनतेस्थितिं। ७८। कीदृक्तत्त्वंपदार्थेतिचेन्नादृगीदृगितिहृयं। यत्तन्नप्रसरत्येतत्त्वंपदार्थेत्यवधार्यतां। ७९। ज्ञानक्रियाभ्यांव्याप्यंनहित्पाकांक्षानिवर्तनात्॥ अप्रमिस्तिएकस्मिन्धी स्तिरत्यविकीर्षिते। ८०। दृश्यत्वा

दितिशब्दार्थौप्रमिमितविकीर्षितौ। तस्मागेंकृत्यलंज्ञेयज्ञेयकार्यसमाप्तितः।९२। आत्मनः
सप्रकाशत्वाद्वुधेस्तस्यदृष्टपाततः। अन्यापेक्षत्वमात्रेणमापर्यवस्यतिशास्त्रगीः।९३। स
र्वप्रत्ययवेद्येवाब्रह्मरूपेव्यवस्थिते। प्रपंचस्यप्रविलयः शब्देनप्रतिपाद्यते।९३। इतिप्राह्
ब्रह्मसिद्धिकारोवेदरहस्यवित् अतोन्यान्यनिषेधेनब्रह्मबोधःसमाप्यते।९४। घटेघटोनि
षिध्यःसन्पटादन्यत्रतिष्ठति॥ इदंजगत्तथान्यत्रस्यादित्येतदसंगतं।९५। रूपिद्रव्यान्निषि
द्धंतद्रूपंनान्यत्रतिष्ठति। रूपंघटस्यनिर्नष्टंन्यत्रहिकाप्युपलभ्यते॥९६। रूपिणोब्रह्मणस्त
द्वज्जगद्रूपंनिराकृतं। नब्रह्मणिनचान्यत्रस्थाङ्मर्हतिऊत्रवित्।९७। घटवक्रगतोभंगोना
स्तीतियदिमन्यसे। मास्तविद्याकल्पितस्यबोधादेवनिवर्त्तितः।९८। जगतोस्तिलमृज्ञानंतनि

वृत्तिस्थिदात्मना। जगतातन्निवृत्त्यावाकर्थंद्वैतंप्रसज्यते।९९। अयोग्यत्वाद्यथानीलंरूपंत्रो
त्रेणकर्त्तृन। नाग्रहीन्नचगृह्णातिनग्रहीष्यतिशब्दवत्।१००। तद्वत्प्रकारणंद्वैतंप्रत्यक्त्वाव
लोकनात्॥ प्रतीचिब्रह्मतत्त्वेस्मिन्नान्यदस्तिनविष्यति।१०१। तदेवंनेतिनेतीतिवाक्यादे
शात्पुमानयं॥ निवृत्तसर्वबाह्यार्थः सम्पद्धि र्वात्मन्यात्मनि।१०२। अथवानेतिनेतीतियत्त्वा
देशःसयोज्यतां। जीवब्रह्मैक्यसिध्यर्थमहंब्रह्मेतिवाक्यवत्।१०३॥ अहंशब्दोबुद्धिवाची
साक्षिणंलक्षयेद्यथा।निषेधकोनकारोपिसाक्षिणंलक्षयेत्तथा।१०४। ब्रह्मशब्दोजगद्धेतु
वाचीचिन्मात्रलक्षकः। इतिशब्दोजगन्मात्रवाचीचिन्मात्रलक्षकः।१०५। अखंडैकरसस्फु
ल्योवाक्यार्थोवाक्ययोर्द्वयोः। उक्तार्थस्यैवदार्ढ्यायद्विर्नेतीतिवचःस्मृतं।१०६। अथवात्रे

तिश्चौद्वौजीवेशोपाधिवाचिनौ।नकाराभ्यासुपाधीद्वौनिषिध्यब्रह्मलक्ष्यते।९७। यथा
मात्रादिसन्तेयंप्रत्यक्संवित्तिसाक्षिका। अमात्रादेरभावोपितथातत्तेनलक्ष्यते॥
९७॥मथ्यामात्रादिमन्तेयंप्रत्यक्संवित्तिसाक्षिका॥अमात्रादेरभावोपितथातत्तेन
लक्ष्यते॥९८॥अतिरोहितसंवित्कोदृष्टिमात्रात्मकत्वतः।विनैववाचकौंशब्दंबोध्यो
लक्षणयाप्यतः॥९९। अनन्यानुभवेनैवभावाभावात्मभूमिषु। प्रत्यक्कूटस्थमात्मानं
पश्यन्नास्तेफलात्मतः।३००। अतोमात्रादिसंबंधोयत्रयत्रनिवर्त्तते।तत्रतत्रैकलःप्र
त्यक्स्वमहिम्नैवसिध्यति।१। एतदस्मुखतःसिद्धंप्रमात्राद्यनपेक्षतः।सर्वस्यैवततःसि
द्धेःकथंसिध्येत्तदन्यतः।२।नदिष्टंनेतिनेतीतिवाक्यंब्रह्मात्मबोधकं।जीवेशोपाधि

निकृत्यालक्षसारखंडावसानतः।३। अथातआदेशइतिप्रतिज्ञायातिसंभ्रमात्।निषे
धोनेतिनेतीतिनयुक्तइतिचेच्छृणु।४। अवाच्यमनसगम्यस्यनिषेधमुखंविना। अस्मनो
मुखत्वआदेशोनिषेधोयुज्यतेततः।५। इत्येवमनिदंरूपंब्रह्मणः प्रतिपादितं॥नि
र्नामूस्तत्स्यनामैतन्नसत्यमितिश्रुतं।६। सच्चत्यच्चेतिसत्यारथाःप्राणास्तेब्रह्मणात्म
ना॥आत्मवंतस्ततोब्रह्मसत्यमितीरितं।७। व्यावहारिकमेवैतन्नामोक्तंनतुवा
स्तवं॥शब्दप्रवृत्तिहेतूनांसाक्षाद्ब्रह्मण्यसंभवात्।८॥ ॥इतिवार्तिकसारेचतुर्थीध्या
यस्यतृतीयंब्राह्मणं॥ ॥अथोदितःसमारोपइत्येवंब्राह्मणत्रये।आत्मेत्येवेतिमं
त्रार्थोब्राह्मणेस्मिन्नुदीर्यते।१॥अथोदितंयदिजगद्ब्रह्मणोन्यतयास्थितं।ततःसंसारमत

प्राप्तिरतः सर्वात्मभुच्यते ॥२॥ अथवाब्रह्मवचीतिप्रक्रम्यब्रह्मता पुरा। नेतिनेत्यनिदंरूपेप
ती चोक्तमापिता ॥३॥ दृहत्वात्मानमारभ्यसृष्टिस्थित्यंतकारिणि। ब्रह्मणिप्रत्यगात्मत्वंसमा
पयितुमुद्यमः ॥४॥ वित्तस्यकर्महेतुत्वात्तत्त्यागोज्ञानसाधनं। इतिदर्शयितुंब्राह्मक्रतिरारभ्य
यिकांक्षभांप्या एषणात्रयमन्यासोवित्तत्यागेनलक्ष्यते। ज्ञानस्यहेतुःसन्यासइतिश्रुतस्त्वेषडिंडि
मः ॥६॥ ज्ञानादेवामृतत्वंस्यादविद्याध्वंसमात्रतः। अमृतत्वस्यनाशास्तिवित्तसाध्येनकर्मणा
॥७॥ नकर्मकारणंमुक्तेर्नाग्निस्तापस्यनेष्यते। कर्मभ्योजन्मनियतंजन्मचेन्निरितिः कुतः ॥८॥
द्विविधःकर्मसन्यासः फलसाधनभेदतः। फलायज्ञानिनस्त्यागोनिष्ठासोज्ञानसिद्धये ॥९॥ ज्ञ
नित्याद्याश्वलक्ष्योयंजीवन्मुक्तिफलेच्छया। चित्तविक्षेपबीजंगार्हस्थ्यंत्यक्तुमिच्छति ॥१०॥

२०७

गृहस्थएवजनकोजीवन्मुक्तोस्तियद्यपि। धीसाम्यातिशयोयापिसर्वकर्मत्यजोस्तिहि ॥११॥
विज्ञानसाधनत्वेनमैत्रेयीवित्तमत्यजत्। तत्यागेधीसमाधानात्ज्ञानेस्यादधिकारिता ॥१२॥
चतुर्थ्याश्रमोनार्यानास्तिचेन्मास्तुसाप्यसौ। ज्ञानांगंसर्वसंत्यागमर्हत्येवानिषेधकात् ॥१३॥
स४ निदिध्यासेतिशब्दात्सर्वत्यागफलंजगौ। नह्यन्यचिंतामत्यक्त्वानिदिध्यासितुमर्हति ॥१४॥
निरंतरविचारोयःश्रुतार्थस्यगुरोर्मुखात्॥ तन्निदिध्यासनंप्रोक्तंत्वेकाग्र्येणालभ्यते ॥१५॥ अ
नात्मन्यरुचिश्चेन्नरुचिश्चात्मनिचेद्भवेत्। पुण्यपुंजेनसुदृढंतच्चित्तमैकाग्र्यमर्हति ॥१६॥ श्रद्धा
ऽकरित्तमैकाग्र्यंविवेकेनानिवर्धयेत्॥ स्त्रियास्त्रियविवेकोतोमैत्रेय्याउपदिश्यते ॥१७॥ पति
जायादिभोगेषुभोक्तर्यात्मनिचेच्छते। प्रीतिस्तत्रत्वमुख्येयं ऊत्रमुख्येतिचिंत्यतां ॥१८॥ सदा

भूयाममेवाहंमानश्रूवंकदाचन। इत्यनौपाधिकीप्रीतिः प्राणिनामात्मनीष्यते।१९।सम्बंधो
पाधिनैवभोग्येप्रीतिर्नेतुस्वतः। अन्यथावैरिभोग्येपिभोग्यत्वात्प्रीतिरापतेत्।२०। ननुद्वे
ष्योपिवैर्यादावात्मसंबंधितोभवेत्। वैरिवैरिण्यपिद्वेषः प्रसज्येतान्वयेतिचेत्।२१। बाढंतथा
प्ययंद्वेषोनात्मनिद्वेषसाधकः॥ प्रत्युतप्रीतिमेवात्मन्यसौद्वेषोपिसाधयेत्।२२। वैरिदुःख
प्रदानेनप्रीतेरुच्छादकत्वतः। द्विष्यतेनेनसद्वेषः प्रीतेरात्मनिकल्पकः।२३॥ एवंविचारिणः
पुंसआत्मात्रेयाननात्मनः। मूढस्यतद्विपर्यासात्प्रेयः पुत्रादिमन्यते।२४। अविचारेण
पुत्रादौयाप्रीतिस्तांविचारतः। आत्मन्येवोपसंहृत्यचित्तैकाग्र्यंविवर्धयेत्।२५। ऐकाग्र्यम
चलंकृत्वानिदिध्यासनकारणं। आत्माद्रष्टव्यइत्येतत्सूत्रंव्याख्यातुमाददे।२६। आत्मा

वाऽरेद्रष्टव्यइत्युपक्रम्यालोकेनुभूयतेः। श्रवणेनात्रात्मशब्देनप्रमेयंनिर्दिदिक्षितं।२७। द्रष्टव्यइति
निर्दिष्टप्रमितिर्दर्शितायुना। अज्ञातज्ञापनंतत्रप्रत्ययेनाभिधीयते।२८। अज्ञातआत्मावे
दांतजन्यज्ञानेनमीयते। इत्येवैषोत्रवाक्यार्थोनाप्रवृत्तप्रवर्त्तनं।२९। ननुहंप्रत्ययेनात्मा
वेदांतश्रवणात्पुरा॥ विज्ञातइत्यिवेन्मैवंमार्वात्मानवबोधनात्।३०। लिंगदेहपरिछेदस्त्री
पशाद्यिण्डहंमतिः। मार्वात्म्यमात्मनस्तत्स्यंतद्ज्ञानमहंधिया।३१। मर्वीमूषनिषक्तेवत्
मार्वात्म्यंप्रतिपाद्यते। कार्यज्ञेयसमाप्तिःस्यात्मार्वात्म्यस्यावबोधतः।३२। नाविद्धस्तंतमो
नास्तिनचज्ञानमनुत्थितं। नानिवृत्तस्तथानर्थोनानवाप्तंसुखंतथा।३३॥ इत्यज्ञातज्ञापना
र्थोविधिरत्रोपवर्णितः। अप्रवृत्तप्रवृत्त्याख्योविधिर्नात्रोपपद्यते।३४॥ विधेयंवाफलंचास्य

नमंभवतिकिंचन॥ ब्रह्मतद्धीस्तदभ्यासउपायोवाविधीयतां।३५। नब्रह्मनित्यमिद्धत्वाद्धि
धा उंशाकृतेकचित् अनूतभावीयागादिर्विधिर्महंतिनेतरः।३६॥ नित्येननभवेनंयस्मयस्म
वानित्यभूतता। नतयोर्विधियोग्यत्वंखपुष्पाकाङ्क्षयोरिव।३७॥ तद्धीर्विधेयेत्यस्मिंश्चपूर्वो
धीः केतिकथ्यतां। अंतःकरणवृत्तिर्वीकिंवातत्फलवेदनं।३८। वृत्तिः प्रत्यक्चिदाकारा
किंवासार्वात्म्यगोचरा॥ आद्येविधिरशक्यत्वान्नियमोवाथवेतरः।३९। प्रत्यक्चिदाकारता
याः प्राप्तत्वान्नास्त्यपूर्वता। समाहितावुत्थितावावृत्तिः सर्वी चिदाकृतिः।४०। नसमाहि
तधीः कश्चित्स्मृतीचोन्मत्तप्रपद्यते॥ व्युत्थितोपिचात्मानंपश्यन्नेवान्यदीक्षते।४१। एवंच
नित्यप्राप्तत्वान्नियमोपिनयुज्यते॥ नकाचिद्वृत्तिरस्यत्रचिदाकारविवर्जिता।४२। नाना

DR BHAU DA

द्वयैर्यथायोगेवियोगेचमदाघटः॥ वियत्संसर्गएवास्तेनविपद्वर्जितः क्वचित्।४३। बा
ह्यवाह्यादिनियोगेवियोगेचतथाधियः। प्रत्यक्चैतन्यसंसर्गो नित्येत्येतत्स्वसा
क्षिकं।४४॥ अनात्मदृष्टिरूपैपरिसंख्येतिचेन्नतत्। नखल्वनात्मविभ्रांतिर्विधिर्वा
रयितुंप्रभुः।४५। प्रमाणजन्यज्ञानेनविनाविधिशतैरपि॥ रज्जुसर्पादिविभ्रांतिर्नहि
क्वापिनिवर्त्तते।४६॥ सार्वात्म्यगोचरावृत्तिरप्यत्रनविधीयते। यतोप्युक्तप्रतंत्रासात
स्मादत्रकथंविधिः।४७। कर्तृतंत्रायदिभवेत्तदायोषाग्निबुद्धिवत्॥ क्रियास्यात्
क्रियायानैवक्वाप्यविद्यानिवर्त्तते।४८। फलसंवेदनंनापिविधात्रिहमृक्यते। संवे
दनस्यनित्यत्वात्फलत्वंतूपचारतः।४९॥ प्रमाणमप्रमाणंचप्रमाभासश्चसर्वदा॥

चैतन्याभासितंतच्चचैतन्यंफलमुच्यते।५०॥ मानादिव्यभिचारेपिसंविदव्यभिचारिणी
अतोनित्यतयानेतद्विधेयंफलवेदनं।५१॥ विधेयोभ्यासइतिचेन्नाज्ञात्वानुपयोगतः।
अविज्ञातेब्रह्मतत्त्वेनद्वुद्यावर्त्तनंकथं।५२। ज्ञातेप्यविषयप्रत्यङ्अनाकारस्यतस्य
धीः॥ नैवावर्त्तयितुंशक्यादेवतामूर्त्तिबुद्धिवत्॥५३॥ अभ्यासस्योपयोगोपिकिंजी
वब्रह्मस्वरूपता।मुक्तौचेतोनिवर्त्तिर्वीकिंवाविद्यानिवर्त्तनं।५४॥नजीवब्रह्मतााभ्या
मसापेक्षाकिंतुमास्वतः।नघटादेर्घटादित्वंबुद्ध्यभ्यासमपेक्षते।५५।भावनोप
चितंचेतोनकैवल्येनगच्छति॥तस्मेहैवसमुच्छित्तेस्तद्धेत्वज्ञानहानतः।५६॥भाव
नाभावितंचेतोपुत्रजन्मांतरप्रदं।तत्रचेतोनुवृत्तिःस्यात्साकैवल्येकथंभवेत्

५७॥ब्रह्मात्मैकत्वविज्ञानमविद्यामात्मनिस्थितां।मूलज्ञानंनचेद्धंतिज्ञानंमेवनतद्भवे
त्।५८। एकाश्रयैकविषयौज्ञानमोहौतथासति।अविरोधितंतमोमोहात्रास्तेइत्युक्तिर्ज
डवल्गुका।५९॥ज्ञानोपायोविधेयश्चेन्नोपायस्याप्रतीतितः।आत्माद्रष्टव्यइत्युक्तौज्ञा
नोपायोनभासते।६०॥विधेःफलंचनास्त्येवतत्किंमात्वंपदात्क्वयः॥नैरपेक्ष्यमवच्छे
दहानिर्वाज्ञानबाधनं।६१॥मात्वंमानांतराप्राप्तवस्तुतत्त्वावबोधतः॥सिद्ध्यत्येवोपनि
षदांप्रामाण्येविधिनात्रकिं।६२॥विधेरपीहमानत्वंसाध्यसाधनबोधनात्॥नवि
धित्वादन्यथास्याद्धाधितोपिविधिःप्रमा।६३।अरण्यनिलसंबंधिप्रबाधाजुकुया
दिति॥ सर्वपक्षविरोधिवेदोन्यूनबाधितवानमुं।६४। यदात्वयंक्रियामात्रमात्रमा

कांक्षतिविधिंननु। अस्त्वस्मीत्येवमादिमुलभंतन्नक्रियापदं।६६। कर्मवाक्येऽधिवैतेषुवेदां
तेषुनपेक्षता। नास्त्रापेक्षितुंयोग्यंसरित्तीरफलोक्तिवत्।६७। फलानिचह्युर्योग्या
निर्योग्यंब्रह्मतुकल्पते। प्रत्यक्षस्यानुमादेर्वानाद्योरूपादिवर्जनात्।६८। नेतीत्यस्थूल
मित्यादिवाक्याद्योर्थोवगम्यते। योगिप्रत्यक्षतोवायंकथंगम्येततद्वद। यत्राप्यतिरा
योदृष्टः सःस्वार्थानतिलंघनात्। पुरमूर्त्तादिदृष्टास्यान्नरूपैश्चेत्रदृष्टिता।६९। तस्मा
दिंद्रियगम्येषुशिल्पंकुर्वंतुयोगिनः। अतींद्रियंब्रह्मतत्तंवाक्यादेवविजानते।७०। व्या
प्तिग्रहादिराहित्यान्नानुमानादियोग्यता। नैरपेक्ष्यमतःसिद्धंवेदांतानांविधेरिव ७१ २११
जीवावच्छेदहानिश्चविधिनानैवसिध्यति। अविद्ययाकल्पितस्यविद्ययैवनिवर्त्तना।

त्।७२। अज्ञानबाधनंचस्यात्ज्ञानादेवविधेर्ननु॥ द्वैविध्यमप्यविद्यायानयुक्तंपरकल्पि
तं॥७३॥ अविद्यैवंकाज्ञानहेयाविधिहेयातथेतरा। इत्येवंकल्पयंत्यन्येतच्चाद्वैतेकथंभ
वेत्।७४। विषयस्याविनेदेनज्ञानानांस्याद्व्यथानिदा। अज्ञानस्यतथावाच्यानाज्ञानविष
योस्तिमा।७५। विधेयतत्फलाभावादप्रवृत्तप्रवर्त्तनं। दुर्घटंतेनदुर्वोक्तमज्ञातज्ञापनंभवे
त्।७६। ननुविद्वद्धितार्थत्तिर्नास्तीतिप्रतिपादितं। उत्पन्नेवतनोविद्याकिंशास्त्रेणेति
चेच्छृणु।७७। उत्पन्नप्रतिपित्तानंप्रमाद्यलाद्युपपद्यतात्॥ अनुत्पन्नमिवाभातिदुत्पन्नेःपु
रान्नृणां।७८। व्युत्पाद्यतेपुमान्शास्त्रैरन्वयव्यतिरेकतः। व्युत्पादनमिदंप्रोक्तमज्ञातज्ञा
पनंबुधैः।७९। अविचारितसिद्धेतदज्ञातज्ञापनेत्वपि। नाद्वैतेवास्तवंयुक्तमितरव्य

वहारवत्।८०। अव्युत्पत्तिर्बंधहेतुर्व्युत्पत्तिर्बंधमोचनी। आत्मव्युत्पत्तयेतस्माद्विधेयत्रश्र
रच्या २ वणादिकं। आत्मेत्येवेतिसूत्रस्यद्विर्वाप्युपयोदिता। आत्मतत्त्वपरत्वेनतद्विचारपरत्व
तः।८२। आत्माद्रष्टव्यइत्युक्त्यातत्स्वरूपदर्शिता। श्रोतव्यइत्यादिनातुविचारउप
दिश्यते।८३। अत्यर्थोविकृतेर्हेतुः शास्त्रयुक्तिविवेकजन्। अतिलिंगादिकोन्यायः। प्रोक्तः
श्रोतव्यइत्यतः। अर्थासंभावनोच्छेदीतर्कोमननमीरितं। वेदशास्त्राविरोधेनतर्कोयाह्योन
चेतरः।८५। अपरोक्षत्वबोधोत्रनिदिध्यासनमुच्यते। ध्यानाङ्गकानिदृत्यर्थंविज्ञानेनेत्युदी
रणात्।८६। द्रष्टव्यइतिविज्ञानमुद्दिश्यश्रवणंतथा। मननंचविधायाथविज्ञानमवधिंजगौ २१२
७। श्रवणादिक्रियातावत्कर्त्तव्येहप्रयत्नतः। यावद्ग्रंथोक्तंविज्ञानमाविर्भवतिभास्व

रं।८८। अनन्यायत्तविज्ञानेश्रवणादेरुपायतः। जातेनापेक्षतेकिंचित्प्रतीचोनुभवात्म
रं।८९। ऐकात्म्यज्ञानविध्वंसव्यतिरेकेणनेष्यते। एकात्म्यविज्ञानफलंज्ञानमेवहितत्त्व
तः।९०। नत्वनात्मानविज्ञातआत्मदर्शनमात्रतः॥ ततोऽकृत्स्नत्वदोषश्चेन्मैवंसर्वस्यवेद
नात्।९१। आत्मनोदर्शनेनेदंदृश्यंस्यादखिलंजगत्। प्रत्यङ्मात्रैकयाह्यात्माकार्यकारण
वस्तुनः।९२। कार्यात्माकारणात्माचह्यात्मानौपरात्मनः। प्रत्यग्याथात्म्यमोहोत्थौमो
हेनष्टेविनश्यतः।९३। मोहतत्कार्ययोर्बोधे प्रत्यक्सर्वंनिवर्तते॥ अतः प्रतीचिविज्ञा
तेमूलनंसर्ववेदनं।९४। तत्रैवंमतियोमूढः समस्तव्यस्तरूपतां॥ ज्ञातव्यांमन्यतेतन्तु।
वेदएवनिषेधति।९५। योविप्रजानिं चैतन्यादन्यदस्तिनिमन्यते॥ कैवल्यात्तंपराक्रुर्या

द्विप्रजातिः पराङ्मुखं ॥९६॥ आत्मनोऽहमितिभ्रांत्याऽहंस्मृतिसमादिषु ॥ प्रवृत्तोलक्षनेजन्मे
त्येवैवास्मपराक्रिया ॥९७॥ विप्रत्ववत्क्षत्रलोकदेवभूतादिकंजगत् । सस्माद्भेदेन
पश्यंतंक्लेशयेदपराधिनं ॥९८॥ यदस्तितन्नजानातियन्नेहास्तितदीक्षते । इत्येवमपरा
धोस्यविघतेभेददर्शिनः ॥९९॥ योन्यथासंतमात्मानमन्यथाप्रतिपद्यते । किंतेननकृ
तंपापंचौरेणात्मापहारिणा ॥१००॥ अपोदितत्वाज्ञात्यादिदर्शनस्येहकिंपुनः ॥ द्रष्टव्यं
दृत्यतोवक्तिसर्वारंडत्वदर्शनं ॥१॥ प्रत्यक्षेनयथाभातिश्रुत्याबुद्धिप्रमाणकः । तावन्मा
त्रैकयाथात्म्यमुक्तंजात्यादिदृश्यतो ॥२॥ एवंश्रोतव्यआत्मायंसमासः श्रवणेविधिः । कथं ११३
मंतव्यइत्यत्रदुंदुभ्यादिनिदर्शनं ॥३॥ स्थितौजनौलयेप्येतद्गदात्मातिरेकतः । नास्तीत्ये

तद्भेणत्रदृष्टांतैःप्रतिपाद्यते ॥४॥ यथादुंदुनिशब्दत्वमामान्यादुच्छितात्स्थक् । नादा
उंशाङ्कुयात्कश्चित्विशेषानभिकोशवत् ॥५॥ तद्वदात्मातिरेकेणनात्मीयोर्थोभिनाग
पि । यतः समीहितंशाक्यस्तेनासौरज्जुसर्पवत् ॥६॥ सामान्यंतद्विशेषाश्चतद्विशेषाद्
तित्रयः । दुंदुनिस्तस्यवाद्यातः शब्दश्चेत्येवनिरीरिताः ॥७॥ सामान्यंदोदुभः शब्दोवीरादि
रसंयुतः । विशेषस्तद्विशेषाश्चनीचोच्चादिविभेदिनः ॥८॥ नीचादिभेदिनः शब्दावीरा
दिरसंयुते । अंतर्भवंतिसोप्यंतर्भूतः स्यादौदुंभध्वनौ ॥९॥ एवंशंखेपिवीणायांयो
जयित्वाततः पुनः ॥ शंखदुंदुभिवीणारव्यध्वनीनन्यत्रयोजयेत् ॥१०॥ ध्वनित्रयंमहाशब्द
सामान्येतर्हिवेदिति ॥ विवक्षयाशंखभेरीवीणास्तित्रउदीरिताः ॥११॥ यथाविशेषसा

मान्यतस्सामान्यपरंपरा। शक्तेस्थितातथासर्वमुपलक्षिस्थमीक्षते।२२॥उपलब्धोस्तिस
न्नुकंनोलंबोष्टोदेशाकालवान्। पूर्वपूर्वातिरेकेणनोत्तरोर्थोनुमूयते।२३। एवंचि
दन्वयान्सर्वंचित्पश्यन्तंतथासति॥चिदात्मैवास्यसर्वस्यनात्मिकंरूपमिष्यते॥२४।स्थि
तिकालेयथैकात्म्यंशक्यतेज्ञातुमंजसा। यथोक्तंन्यायतस्तद्वदुत्पत्तावपिशक्यते।२५
धूमार्चिर्विस्फुलिंगादिविभागजननात्पुरा। अग्निरेवनधूमाद्यास्तथैकात्म्यंजनेःपुरा।
२६। स्वार्थसाधनयत्नादीननपेक्ष्ययथास्मृतान्। धूमादीन्कृतभुक्तद्वद्गादीन्प्रत्यगी २१५
श्वरः।२७।नार्थंबुध्वावेदसृष्टिःकालिदासादिवाक्यवत्। किंतुश्यामद्वायत्नात्स्मादतो
पौरुषेयता।२८। मंत्राश्चतुर्विधाज्ञेयास्तत्रवेदादिगीरिता। ब्राह्मणंचेतिहासादिरूप

मष्टविधंभवेत्।२९॥प्रसिद्धैर्वेतिहासाद्यैस्तद्वेदाद्युपबृंहकाः। निखिलापिजगत्सृष्टिः श
ब्दसृष्ट्यापलक्ष्यते।३०।प्रज्ञानव्यतिरेकेणयथैवस्थितिमर्गयोः। वस्त्वंतरंनसंभाव्यंप्रल
येपितथोच्यते।३१॥स्वाभाविकात्यंतिकौद्वौप्रलयौजगतस्तयोः। स्वाभाविकः स्याक्कल्पां
तेबोधादात्यंतिकोमतः।३२। समुद्रखिल्पोदृष्टांतोक्रमान्त्रलययोर्मतौ। लीयतेऽब्जलंय
दृत्तथाब्रह्मण्यतज्जगत्।३३। माद्राद्यथप्रणाश्चावाजलमब्धौविलीयते। माद्राऽगादि
कानद्यस्तत्प्रणाश्याजलांतरं।३४। तथैवकारणंवस्तुमाद्राब्रह्मणिलीयते। कार्यंतुकार
णद्वारेत्येतदत्रविवक्षितं।३५। अतस्वरमकार्याणांस्वर्णादीनांस्वकारणे। त्वगादौविल
यस्तद्वत्त्वगादेश्चस्वकारणे।३६॥लग्राह्यंस्वर्णसामान्यंलक्ष्यतेनोपलक्ष्यते। सामान्या

तद्विशेषाणांजातत्वात्तत्रतल्लयः।२७। कठिनः पार्थिवः स्पर्शः शीतोष्णौजलवह्निजौ। मृदुर्वा
योरितिस्पर्शविशेषाद्दृष्टकीर्तिताः।२८। लीयंतेस्पर्शसामान्येतद्विशेषायथातथा।
गंधादीनांचसामान्येतद्विशेषलयोभवेत्।२९। गंधरूपरसस्पर्शशब्दसामान्यपंचकं।सं
कल्प्यतेतन्मनसाबुद्ध्यानिश्चीयतेतथा।३०। संकल्पानांतुपंचानां मनःशक्तिलय
भवेत्संकल्पसामान्येनिश्चयेयोजयेत्तथा।३१। संकल्पोनिश्चयश्चैतौज्ञानशक्तेःसमुद्भ
तौ॥ ज्ञानशक्त्याख्यसामान्येलीयेतेतावुभावपि।३२। ज्ञानशक्तिविकाशानांज्ञानश
क्तौयथालयः।क्रियाशक्तिविकासानांक्रियाशक्तौतथाभवेत्।३३। आदानत्याग
भेदानांकर्मणांहस्तसंज्ञके।आदानत्यागसामान्येलयोन्यत्रापिसौनयः।३४। विसर्गो

नंदगमनभाषणानांलयेमति।प्राणेगत्यादिसामान्यपंचकंप्रविलीयते।३५। क्रियाश
क्त्याख्यसामान्येलीयतेप्राणपंचकं। ज्ञानशक्तिक्रियाशक्त्योर्लयोब्रह्मणिमायिनि।३६
विषयाणांलयःप्रोक्तोनेंद्रियाणांश्रुताविति।नमंतव्यंयतोह्याणांग्राह्यजातीयतेष्यते।
३७। एकंवाप्याख्यसामान्यंग्राह्यग्राहकरूपतः।स्पर्शस्त्वकत्वेतिनित्यादेवंसर्वत्रयोज्य
तां।३८। ग्राहकग्राह्यनियमएकजातिलसाधकः॥ ग्राह्यग्राहकयोरूपदीपयोस्तेजस
त्वतः।३९। सर्वभूतात्मकत्वात्तुसर्वार्थग्रहणंह्ययोः।मनोबुद्धोरितिज्ञेयमन्यथातद्वयं
भवात्।४०। मनोन्नमयमित्येषाश्रुतिः।पार्थिवरूपतां॥ ब्रूतेमनमिनैवान्नभूतात्मत्वंनि
वारयेत्।४१।विषयप्रलयेनाहलयस्योदितंत्वतः।लयः सर्वस्यजगतोब्रह्मणीत्यत्रमु

स्थितं।४२॥एवंमंतव्यआत्मायमर्थोमंभवनुत्तये।दुंदुभ्याद्युक्तदृष्टांतन्यायमार्गेणयत्न
तः।४३॥अपरायत्तबोधाख्यनिदिध्यासनसिद्धये।आत्यंतिकलयंवक्तुंखिल्यदृष्टांतउच्य
ते।४४।सामुद्रंभोलवणंक्षेत्रेभानुविपाकतः।लवणेपलतांप्राप्यसैंधवंखिल्यउच्यते।
४५॥सखिल्यउदधौक्षिप्तस्तापन्नांतोविलीयते।४६॥अत्राकः पुनरुद्धर्तुंखिल्यरूपेणपू
र्ववत्॥४७॥खिल्योदृत्येनीरमध्यावाददीतयेतोयतः॥तत्रतत्रसोलभ्यःखिल्यस्तेषनक्र
त्रचित्।४७।सामुद्रस्यांभसःपातात्खिल्यतेवपरात्मनः।आब्रह्मस्तंबपर्यंतंजीवतास्या
दविद्यया।४८।महद्भूतमनंतंस्यादपारंविद्घनंसतः।देहेंद्रियाख्यभूतेभ्योजीवत्वेनसमु ११६
ल्लिति।४९।महत्त्वेमर्कगत्वंस्याद्भूतत्वंनित्यमिष्यते।अनंतापारशब्दाभ्यांव्याप्तिर्नित्य

त्वसाधने।५०॥कार्यकारणराहित्यंयदिवेदोपलक्ष्यतां॥अनंतत्वमकार्यत्वमपारत्वमहेतु
ता।५१॥विज्ञानघनएवेतिजात्यंतरनिषेधनं॥तदिदंवस्तुनस्तत्वंमायिकीसामसुप्ति
वत्।५२॥अखिलस्थानीयमैकात्म्यंजलस्थानंतुमाखिलत्।क्षेत्रस्थानंशरीरादितापस्था
नं।तुविभ्रमः।५३॥खिल्यस्थानविदाभासयोगात्कर्तृत्वभोक्तृते।दृष्टश्रोताद्विजोगौरो
धनीगोमानूनवेत्ततः।५४॥प्रत्यगात्मैवमद्वैतपरोक्षमभवत्तदा।अत्रैवमन्तयंचात्मा
संसारित्वमवाप्तवान्।५५।दृत्येवंपरवस्त्वेवपंचभूताख्यमायया।जीवत्वेबंधनंमुक्त्याय
ततःशास्त्रेणबोध्यते॥५६॥सर्वमात्मेतिसम्यग्धीजन्मनैवाखिलेभ्रमे।नष्टेनष्टपतिजीव
त्वंजलेप्रक्षिप्तखिल्यवत्।५७॥क्षेत्रक्षेत्रेश्वरज्ञेदेनपुनःसंतानविद्यते।तद्भेदोस्तमसो

धंमात्रखिल्यानुद्धरणेयथा ॥५८॥ दृष्टिमात्रात्मयाथात्म्यात्कार्यकारणवर्जनः । नाज्ञातं किंचिदप्यस्तिनानायास्तंतथातमः ।५९॥ आत्यंतिकोयंप्रलयः पुनर्जन्मविवर्जनात् । स्वाभाविकलयेनास्तिनेषादस्तिपुनर्जनिः ।६०॥ विज्ञानैकघनस्यास्य संज्ञानास्तीतियद्वचः तद्व्याहतिर्नञोक्यात्रतयोर्विषयभेदतः ।६१। विज्ञानैकघनोत्पास्य कृत्स्नैकात्म्यपुरोदितं ॥ संज्ञानास्तीतिचाविद्याजन्मबुद्धिर्निषिध्यते ।६२॥ कार्यकारणनाशेपिस्वतः सिद्धमनन्यभं । यद्वस्तुतदलंस्वात्मसंवित्यैनिरपेक्षतः ।६३॥ ऐकात्म्यंयद्विज्ञातंतद्वैतमिवविभ्रमात् । स्याद्यत्रतत्र पुंसोमोक्तर्कर्मादिभेदधीः ।६४। ननुद्वैतमिवेत्येतदुपमानंकथंभवेत् । उपमेयंद्वैतवस्तुराहित्यादितिचेच्छृणु ।६५। रामरावणयोर्युधंरामरावणयोरिव

स्वप्नादावुपमादृष्टास्वप्नेनतथेष्यतां ।६६॥ यद्वालोकेचंद्रभेदः कल्पितत्वेनसंमतः । जगद्वैदोपमासौम्यान्मिथ्यात्वंतेनसिद्ध्यति ।६७। समस्तव्यस्तरूपत्वंयोवक्तीहात्मनःक्रमैः ॥ तत्यद्वस्यनिषेधायद्वैतमिथ्यात्ववर्णनं ।६८। ज्ञानज्ञातृज्ञेयरूपंत्रापिस्वप्नेमृषा यथा । एकोव्यवहरत्येवमशेषोव्यवहरेन्मृषा ।६९॥ यस्यामविद्यावस्थायांभेदभ्रांतिस्तदापुमान् । यस्यांतुविद्यावस्थायामात्मैवास्यभवेज्जगत् ।७०॥ तदाकः केनकिंजिघ्रेदद्वैतपरवस्तुनि । षष्ठोचरवत्सर्वकार्यकारणवर्जगत् ।७१। ध्वस्तान्नांध्यस्यविदुषः सम्यग्ज्ञानोदयेभवेत् ॥ ग्राह्यादिविभागोत्रनास्तितद्वैतसंभवात् ।७२। चिन्मात्रस्यस्वतःसिद्धेर्विज्ञानघनतेरिता । मुक्तस्यव्यवहारस्यभ्रांतिवासनयाकृतः ।७३। भ्रांतिनाशेपि

संस्कारानुवृत्तिर्दृष्टेस्खलु ॥ वासनामात्रसंज्ञातुदेहेसतिनवार्यते ।७४॥ वस्तुलब्धीति संज्ञैवप्रबुद्धस्यात्रवार्यते । ज्ञानज्ञेयचान्यरूपानसंज्ञाविद्यतेयथा । प्रतीच्यपितथासंज्ञा प्रबुद्धस्यनविद्यते ।७५। ज्ञानोत्पत्तौनसंज्ञास्तीत्यास्तांतावदिहात्मनि । अपिसत्यामविद्या यांनसंज्ञास्त्यात्मनीदृशी ।७६। ग्राह्कादिजगत्सर्वं येनकूटस्थमाक्षिणा । लोकः सर्वोवि जानातिजानीयात्केनतंवद ।७७। बोद्धृत्वालोचनेनापिनसंज्ञाघटपटात्मनि । नवोद्धागृह्यते न्येनबोधेनविषयेणवा ।७८। व्यावहारिकसंज्ञासौसंसारिण्यपिदुर्लभा । किमुविध्वस्तनिःशे षसंसारानर्थकारणे ।७९। इत्येवमपरायत्तबोधेनात्यंतिकोलयः ॥ निदिध्यासनरूपो त्रफलभूतः प्रकीर्तितः ।८०॥ ॥इतिवार्त्तिकभास्करवृत्तौतृतीयाध्यायस्यचतुर्थोब्राह्मणं॥ ॥०॥

पंचमंब्राह्मणेविद्याफलंसार्वात्म्यलक्षणं । अनिर्व्यंजयितुंवस्तुसर्वात्मत्वंप्रपंच्यते ।१। योज न्मस्थितिनाशानांयोहेतुः सार्वात्म्यदर्शिनः ॥ तस्यासिद्धिर्वार्यतेत्रेत्येवंभाष्यकृतोऽब्रुवन् ।२। प्रतिज्ञायाथवैकात्म्यसर्वमेवोपपादितं ॥ निगमायोत्तरोग्रंथः । इतिचाङ्गरमीक्षेपुनः ।३ फलंनिगमनंवास्तु सार्वात्म्यब्रह्मणः स्फुटं ॥ विज्ञातिर्हेत्वसिद्धिर्मनुपुंवाक्यइवनागमे ।४ तथापिमंदाशंकांतत्रात्मनानात्वदर्शिनः । एकात्मनोजगज्जन्मेत्यादिहेतोरसिद्धतां ॥५। जगदेकस्यकर्तृत्वंस्यादेकमातृजपुत्रवत् । परस्योपकारित्वादितिहेतुः समर्थ्यते ।६। निदि ध्यासनविध्यर्थंकेचिद्ब्राह्मणमूचिरे । अमत्तदपरायत्तबोधत्वेनास्यदर्शनात् ।७ परस्य रोपकारित्वंदृष्टिव्याः प्राणिनामपि ॥ यत्तन्मधुत्वंविज्ञेयमुपकारस्तुसर्जनं ।८ जंतुभिः ९

थिवीसृष्टास्वकर्मफलभुक्तये। एथिव्याप्यात्मभोगार्थंसृष्टाः सर्वेपिजंतवः।९॥ पार्थिवानि शरीराणि भुञ्जंतेजंतुनिस्तथा॥ एथिव्यापिधरित्रीत्वंभुञ्जतेजंतुधारणात्॥१०॥ अस्मा एथिव्यांयोभास्वानामोदमविनश्वरः।लिंगात्मामधुसोमर्वभूतानांतानितस्यच।११॥ अ ध्यात्मंमयश्चशरीरोलिंगात्मापार्थिवांशकः॥ सचापिमधुसर्वेषांसर्वभूतानितस्यच॥१२॥ साध्यात्मंमाधिदैवंचसाधिभूतमिदंजगत्॥ एकैकस्यात्मनःकृत्स्नंभोग्यत्वेनावतिष्ठते॥१३ सर्वंमर्वस्यकार्यंस्यात् सर्वः सर्वस्यभोजकः॥ इत्येषामधुविद्यात्रैवेष्म्यकेशहारिणी १४॥ भूतानिभूमिर्देलिंगेइत्युक्तंयच्चउर्विधं।मधुविद्याकृतंतस्यवक्तव्यमथोच्यते॥ २२७ १५॥ अयमेवसदित्यत्रमधुरूपश्चउर्विधः।पपंचोयमितिप्रोक्तः सदित्यात्मोच्यतेपरः॥

१६॥ अयमेवसदित्युक्त्वासामानाधिकरण्यतः।प्रत्यग्भात्रैकयाथात्म्यंपपंचस्यावबोध्यते॥ १७॥ सदित्यनेननिर्देष्टुमतीतग्रंथवर्णितः॥ योयमित्यादिनिर्वाक्यैश्चउक्तिः स्मार्यतेपरः॥ १८॥ आत्माद्दष्टयदित्युक्तममृतंचेतिवर्णितं।नेतिनेत्युदितंब्रह्मतत्सर्वमभवत्किति।१९॥ आ त्मामृतब्रह्मसर्वशब्दैः प्राक्श्रुतिपादितं।वस्त्वस्यमधुनस्तत्त्वमितिवाक्यार्थईरितः॥२०॥ उ त्तरेष्वपिवाक्येषुमधुरूपमिदंजगत्। ब्रह्मापिमधुनस्तत्त्वंयोजयेदुक्तवर्त्मना।२१। साध्या रण्यविशेषाभ्यांधर्मोभोगप्रदोद्विधा।आधिदैवमथाध्यात्ममित्यत्रासौविभज्यते॥२२॥ सत्यमानुषयोरेवंविभागंयोजयेद्विधा।एथिव्याद्यामानुषांताविराडंशाउदीरिताः॥२३ अयमात्मेतिनिर्देशोविराजोनिमितोस्तिनः।हिरण्यगर्भस्तत्रत्यउक्तस्तेजोमयोक्तिनः।

२४॥ विराट् हिरण्यगर्भश्च स्थूलसूक्ष्मशरीरगः। चिदाभासोऽत्रयश्चायमात्मेत्युक्त्वा निधीयते ।२५॥ अस्थूलादिपरामर्शप्रत्यग्व्याख्यात्मचिन्तये। सवाडित्यादिकोग्रंथः सदृष्टांतोनिधीयते ।२६॥ नन्वेकमधुनास्त्वत्र मयमेवमदृत्यतः। वचनाद्वक्ष्यमाणैर्भूयोऽपेतद्दृढीकृतं। ३७ बाढमेतावतावस्तु सार्वात्म्यंस्यात्स्वरूपचित्। तदेवानिर्व्यपदेश्यमविद्याकल्पितं फलरूपतः ।२८ सएवमधुनाख्यआत्मायंतत्त्वचिन्मतः। आधिपत्यंचराजत्वंविद्ययाविद्ययोधिकं ।२९ अत्राधिपतिराद्येनस्वातंत्र्यमभिधीयते। स्वार्थैः प्रत्यक्तदर्थात्वात्सदेतोर्जगदात्मन ३० राजत्वंराजनाड्यास्यदविद्यात्मदर्शनात्। ब्रह्मास्मीतिपरिज्ञानध्वस्तध्वांतत्वकारणा न्न ।३१ योसावविद्ययादेहीसंसारीवाप्यभूत्पुरा। सएवविद्ययाब्रह्मेत्यतोस्मिन्जगदप्ति

DR. BHAU DAJI LAD MUMBAI

तं ।३२॥ चक्रन्यायेनयथासर्वेनानिनेम्योः समर्पिताः। सजीवानिखिलादेहाब्रह्मविद्यर्पिता स्तथा ।३३॥ ब्रह्मविद्याद्यामदेवः प्रागहंमनुरीदृशं ॥ सार्वात्म्यंप्रतिपेदेयत्तदेवात्र निरूपितं ।३४॥ सोपाधिर्निरुपाधिश्चद्वेधाब्रह्मविदुच्यते ॥ सोपाधिकः स्यात्सर्वी त्मानिरुपाख्योनुपाधिकः ।३५॥ जह्यन्नकीडनूरतिप्राप्तदूतिसोपाधिकस्यतु। सार्वात्म्या सर्वभोगाभिष्वंदोग्रेस्पष्टमीरितः ।३६॥ अहमन्नंतथान्नादः श्लोककार्य्यहोऽहं। इति तत्त्वविदः सामगानेसर्वात्मताश्रुता ।३७॥ अत्रापिचोक्तदृष्टांतात्सोपाधिस्तत्त्वविच्छ्रुतः। असर्वानपराद्युक्त्याश्रोष्यतेनिरुपाधिकः ।३८॥ मन्नृप्रपंचआहात्रसमस्तव्यस्त मिदंये। नाधिरात्मावपुर्नेमिरराडिंद्रियदेवताः ।३९॥ प्रत्येकंप्राणिनांब्रह्मचक्रम

वक्तमस्तिहि। तद्वक्तयेनिर्दिध्यासेनब्रह्मवाविद्धधीः सदा॥४७॥ तप्तलोहवदेकत्वंप्राप्य ध्यानादयंपुमान्। अविद्यातिमिरांधानांध्येयत्वमुपगच्छति॥४८॥ अतएवबहिष्टत्वान्न साधीयोक्तकल्पना। उपास्यंयन्नतद्ब्रह्मतत्त्वमित्येषडिंडिमः॥४९॥ समाप्तोब्रह्म विद्येयंकैवल्यावाप्तयेरिवला। यद्योक्तब्रह्मविद्यायाः स्तुत्यर्थारव्यायिकोच्यते॥५० दध्यङ्ङाथर्वणोश्विभ्यामुवाचद्विविधंमधु॥ प्रवर्ग्यो गरविध्यानंब्रह्मध्यानमितिद्वयं॥५१॥ तंहत्वांतमृषिः पश्यन्प्राब्रवीदश्विनौप्रति। हत्वांतमब्रवीदश्व्यां मृग्भ्यांवब्रह्मवेदनं॥५२॥ अश्विनौयुवयोरुयंलाभायशुरुमारणं॥ आविष्करोमिलोकेस्मिन्मेघो रष्टिर्यथातथा॥५३॥ दध्यङ्ङाथर्वणोश्वस्यशिरसायुवयोर्मधु। यत्रोवाचतदप्यत्र

जानन्नाविष्करोम्यहं॥५४॥छित्वागुरोः शिरोन्यत्रनिक्षिप्याश्वस्यछिरः। तदाहृत्यगुरोः कंठेप्रतिष्ठाप्ययतोयुवा॥५५॥सत्यप्रतिज्ञः सगुरुः सोदाप्येतादृशींक्रियां। मधुहृयमुवाचेतिकथितोर्थस्तयोर्द्वयोः॥५६॥ नन्वथनयाख्यायिकयाकथंविद्यास्तुतिर्भवेन्न एषान्यायोनमहतालक्षेतिश्रूयतेह्यसौ॥५७॥ मधुविद्यामिमामिंद्रोगोपायितुमिदंजगौ। अन्यस्मैचेदिमांब्रूयाः शिरश्छिंद्यामितीदृशं॥५८॥ तथाश्वीयंशिरश्छित्वाछिन्नेतस्मिन् पुनः स्वकं। शिरः संस्थाप्यविद्यामौलक्षेत्यायामर्दृदृशुः॥ प्रवर्ग्योध्यापयेरेव मृग्भ्यांतात्पर्यमीरितं। उत्तराध्यायशेषेव मृग्भ्यांतात्पर्यमीर्यते॥५९॥ रुचोंचतमृणो अत्याप्रत्येकमवतारणं। आदरायेतिविज्ञेयमर्थाधिक्यंनकिंचन॥५९॥ ईशोमनु

ष्यपश्चादिदेहांश्चकेपुरातनः॥४४॥पक्षीलिंगरूपेणभूत्वातान्त्राविशत्पुनः॥४५॥योयं पुरुषशब्दोस्मिंन्मंत्रेतस्यनिरुक्तितः। जीवब्रह्मैक्यतात्पर्यंमंत्रस्यास्योपवर्ण्यते॥४६॥ पुरिशेतेयतस्तेन स्मात् पुरुषोजीवउच्यते॥सर्वंसरंयतीत्येवं पुरुषोब्रह्मभण्यते॥ ४७॥अनेनब्रह्मणाकिंचिद्बहिर्नानृतंक्वचित्॥नास्त्यसंकृतमंतश्चस्मरणात्पुरुषस्मृ तः॥४८॥रूपंरूपंप्रविष्टःसन्प्रतिबिंबोभवत्ययं। तदस्यप्रतिबिंबत्वंश्रुत्याद्यात्म विन्नये॥४९॥चैतन्यात्मादयःशब्दाव्युत्पन्नाःप्रतिबिंबकेस्मिं लक्षयंतिचिदात्मानंते नयाद्यात्मवेदनं॥५०॥मिथ्याभिमानैःसाभासबुद्ध्यादिपरिकल्पितैः। दृश्यश्रोताह मित्यादिबद्धरूपोविचेष्टते॥५१॥संत्यस्यहरयोद्धारयाहरणद्विषयान्प्रति। प्रा

णिभेदादनंतास्तेतेस्मंसरतीश्वरः॥५२॥मंत्रोक्ताहरयोध्यस्तास्तंसरयाचप्रकल्पि ता। एतेषांतत्त्वमात्मैवेत्याहब्राह्मणमादरात्॥५३॥निःशेषंमधुकांडस्यतदेतदितिवाक्यतः। सारःसंक्षिप्यतेसाक्षात्करविन्यस्तबिल्ववत्॥५४॥अज्ञातंसंशयज्ञा तंमिथ्याज्ञातमिदंजगत्। तदेतदित्यनूद्यास्यतत्संब्रह्मेतिबोध्यते॥५५॥निःकार णांतन्निष्कार्यंनिश्चिद्वाह्यवर्जितं। पारोक्ष्यप्रतिषेधार्थंप्रात्माब्रह्मेतिभण्यते॥५६॥ सर्वानुभवएवायंयतःसर्वानुभूस्ततः॥कार्त्स्न्यात्सर्वोनुभवेदेषचिन्मात्रत्वात्तथानु भूः॥५७॥कर्तव्यमेतद्विज्ञानमितिवेदानुशासनं। अस्यातिलंघनेदोषःसंसारानर्थ संगतिः॥५८॥कुर्वतस्तत्क्रमाद्दानूलाभःस्यान्नैष्कर्म्यसत्पता। मधुकांडार्थसर्वस्वमित्थं

क्रतोपसंहृते॥६९॥ इतिवार्त्तिकसारेचतुर्थस्याध्यायस्यपंचमंब्राह्मणं॥ ॥८॥ उ
च्यतेमधुकांडार्थविद्यागुरुपरंपरा॥ स्तुत्यर्थंब्रह्मविद्यायाःस्तुत्याचस्यात्प्ररोचनं॥२
पुंबुद्धिकल्पितानांकानुत्पत्यर्थमथवोच्यते॥ ब्रह्मस्वयंज्योतिरित्युक्तोवेदस्यापौरुषेय
ता॥२॥ यस्मादपरतंत्रोयंवेदोत्साब्रह्मराड्हितः॥ मनोवाक्कर्मभिस्तस्माद्भक्त्या
तस्मैनमोनमः॥३॥ नमोंतत्वेनलिंगेनज्ञाप्योयंवेदउच्यते॥ विद्याप्रकरणेपाग
द्विद्याहेतुर्जगोमतः॥४॥ शतानियंचश्लोकानांतत्तोद्वानवतिस्तथा। चतुर्थाध्या
यसारस्यतावद्भिःसंग्रहःकृतः॥५॥ ॥इतिवार्त्तिकसारेचतुर्थस्याध्यायस्यष
ष्ठंब्राह्मणं॥ ॥समाप्तश्चायमध्यायः॥ समाप्तोमधुकांडोयमुपदेशप्र

धानकः॥ उपपत्तिप्रधानोयंयाज्ञवल्क्यस्यउच्यते॥१॥ यदार्थविषयायुक्तिर्वाक्यार्थंनूपदे
शगीः॥ अतोनपुनरुक्तत्वंकांडयोःशेषशेषिणोः॥२॥ कांडोयंयाज्ञवल्क्यस्यउच्यते॥१
स्याद्ध्यायद्वयात्मकः॥ जल्पवादकथानेदाद्ध्यायार्थौविवक्षितौ॥३॥ तत्रजल्पकथारूपि
ण्यध्यायेपंचमेनवा॥ ब्राह्मणान्यर्थएतेषांक्रमेणैवोपवर्ण्यते॥४॥ आद्येमृत्योरतिक्रां
तिर्द्वितीयेमृत्युनिर्णयः॥ तृतीयेमंस्मृतिव्याप्तिर्मृत्युर्यत्प्रत्यग्निर्णयः॥५॥ पंचमेब्रह्मतात
स्यंषष्ठेतुब्रह्मकार्यगीः॥ सप्तमेकारणावस्थाब्रह्मतत्वमथाष्टमे॥६॥ नवमेदेववित्तारसं
क्षेपाद्व्रतःपुनः॥ सगुणंनिर्गुणंचोक्तंब्रह्मसर्वाधिकारिणं॥ दानंतत्वतमंयोगस्तत्सं
वादइतित्रयं॥ विद्याप्राप्तेरुपायोयमित्याख्यानेनसूच्यते॥८॥ उक्तोयत्रमुखप्रेत्यीमधु

कांडेपुरोदितः॥तद्विशेषाविचार्यंतेतस्मात्तैरेकवाक्यता।९७॥अमुरासंगमृत्युघ्नप्राणध्या
नंपुरोदितं। मृत्युघ्नमेवंवागादेर्ध्यानंसोऽछदाश्वलः।९८॥अध्यात्माधिभूतंवयजमानलिं
गादिषु॥स्वाभाविकःपरिछेदोमृत्युर्मर्त्यफलार्जनात्।९९॥कालोपिमृत्युःकर्त्रादिमारणा
त्स्यात्सचद्विधा। सौरोहोरात्रिरूपेणचांद्रःपक्षादिरूपतः।१००॥जेतुंमृत्युत्रयंब्रह्मलोकंप्रा
प्तुंचसाधनं। प्रश्नैश्चाग्निःपप्रछदेवध्यानंतदुत्तरं।१॥यजमानस्यवागादीन्होत्रादींश्चा
धिदैविके। अध्यात्मविकतांध्यात्वामुच्यतेचातिमुच्यते।२॥मुक्तिस्त्वल्पासुरंभावंदैवभावस्य
चितनं। ब्रह्मलोकोतिमुक्तिःस्यात्तत्कैवल्यमुपासनात्।३॥आधिदैविकरूपेणधीरध्या २२४
त्माधिभूतयोः। उह्यासर्वत्रतेनोक्तप्राणविद्यानिरूप्यते।४॥अथसंपदउच्यंतेसल्पेक

र्मणिकर्मणः॥महतश्चिंतनंसंपत्तयाप्राप्यंमहाफलं।२॥एवंसत्यश्वमेधादेःपापोविधैःक
तोर्थवान्। नन्वग्निस्त्वस्यकृपालंभःसंपदैवास्कृतत्फले।३॥होत्रयायुक्तरूपाणित्रयेसंपाद
यन्नमून्। लोकांस्त्रैलोक्यमाप्नोतिसमत्वात्त्रिलसंख्यया।४॥समिन्मांसाज्यमुख्यानांऽऽनुकूल
त्वादिभाग्यतः। देवलोकादिसंपत्त्यादेवलोकादिमाप्नुयात्।५॥ब्रह्मणोमनसोरत्तिघनंतो
स्वंतवर्जितान्॥विश्वान्संपादयन्देवाननंतंलोकमाप्नुयात्।६॥उक्तास्वग्नातिषूक्ता
त्रागीयमानासुसंपदः। लोकत्रयस्यप्राणादेरपिलोकत्रयंव्रजेत्।७॥कर्मण्यल्पेमहाकर्मि
तत्फलंचानुयादिह। ध्यायेन्महाफलप्राप्त्यैलोकेप्येवमुदीरिते।८॥गयाभूब्राह्मणोवि
ष्णुरन्नंब्रह्मेतिसंपदः। आद्येफलस्यबाहुल्यंमत्वासंपादयंतिहि॥९॥ ॥इतिवार्तिकेसा

रे पंचमाध्यायस्यत्रयमंब्राह्मणं॥ बंधारयमृत्युस्तन्मृत्फर्विडुषोनुक्रमस्तथा। प्रयोजकत्व
योमृत्योःप्रेरकंचात्रएष्यते।१। अधिभूताधियज्ञादिपरिछेदफलात्मकः। मोहात्मंगात्मकोमृ
त्युर्ग्रहातिग्रहबंधवान्। ग्रहाघ्राणादयोज्ञेयागृह्णातिविषयान्यतः। घ्राणादिप्रेरकत्वेनगं
धाद्याःस्युरतिग्रहाः।३। एर्वब्राह्मणमंत्रोक्तध्यानसंयुक्तकर्मभिः परिछेदविनाशेपिमृत्योःस
र्वस्यनक्षयः।४। हिरण्यगर्भरूपेणिश्रयंतेहिक्षुधादयः। अनोमृत्योरशेषस्यमृत्युरन्यात्र
एष्यते।५। निर्णयोमृत्फतन्मृत्फबंधमोक्षावबुद्धयोः। डुर्वचोवग्रहादीनांलोकेत्वंता
प्रसिद्धितः।६। ग्रहातिग्रहवद्बंधोदेहोप्येषतथाप्यसौ। जन्मांतरेषसंचारान्नाग्निरिवेन २२५
डुर्वचः।७। एकमेवमनःसर्वजन्मसाक्षीनितार्किकाः। अक्षांतराण्यपीत्यन्येतेनसं

ख्यात्रडुर्वचा।८। मनोन्यायःसमोन्येषुतेनाशेषविवक्षया। पर्ययग्रहीदृष्टसंख्यामन्यांतभी
वदर्शिनां।९। यस्येंद्रियस्ययोर्थोस्मिन्जन्मन्यन्यत्रतत्तथा। उतान्यथेतिसंदेहात्संख्ये
यंष्यतेपुनः।१०। दृष्टानुमार्यदृष्टंतुकल्पनीयमितीदृशात्। न्यायात्त्राहयथादृष्टंद्रिया
र्थव्यवस्थितं।११। बंधत्वंविग्रहादीकर्नुग्रहातिग्रहकल्पनं॥ मोचनीयोयदेयस्तस्यैवाज्ञान
बंधनात्।१२। ग्रस्तंहिरण्यगर्भंतिमृत्युनासकलंजगत्। ग्रहातिग्रहरूपेणमृत्फस्तस्यास्ति
वानवा।१३। अस्तिचेदनवस्थास्यादनिर्मोक्षोन्यथाभवेत्। इत्यसौ डुर्वचःप्रश्नोदृष्टांते
नापनुद्यते।१४। वह्नेःसर्वान्निोमृत्योर्यथामृत्युर्जलंमहत्। बंधमृत्युस्तथामृत्युरज्ञानं
बंधरूपत्वे।१५। अज्ञानमृत्योर्विज्ञानंमृत्युःस्यात्पितथा। नक्तंनक्तरजोन्यायान्नान

वस्थामिहानयेत्।१६। प्राक्तनान्यपिजन्मानिमम्यग्ज्ञानमपङ्कुते। अपङ्कुतेस्वमित्यस्मिन्नर्थे
तेकाचमत्कृतिः।१७। अथतत्त्वविदः प्राणउत्क्रामंत्यथवानहि। स्यात्पुनर्जन्मनह्युत्क्रांता
वनुक्रांतौस्थितिः कथं।१८। नोत्क्रामंतिननिष्ठंतिकिंतुनिर्वातदीपवत्। नकारणंशि
ष्यतेत्रतस्यज्ञानेननिष्कृतेः।१९। अनारब्धफलंकर्मतद्धुत्क्रांतेः प्रयोजकं। स्थितेर्निमि ५४
त्तमारब्धंतेनदेहोनावतिष्ठते।२०। उपादाननिमित्ताभ्यांहीनानामुत्क्रमः कथं। कथंवा
त्र स्थितिस्तस्माद्युक्त्यात्यंतिकोलयः।२१। प्राणत्यागेनदेहोयंम्रियतेबाह्यवायुना॥
आस्तेः स्थौल्यमापन्नोनिश्चेष्टत्वंतेयतः।२२। प्राणएवविलीयंतेकिंवासर्वप्रयो २२६
जकं। आद्यप्राणजनिर्नूनंद्वितीयेनामतंकथं।२३। अप्रयोजकतायानामेवशिष्यतेनत्र

योजकं॥ अविद्याकामकर्मादिनोक्तदोषद्वयंततः।२४। परवाचानिविष्यन्तेविदुषोबंधनं
प्रति। नामाप्रयोजकंयुक्तस्तेषः परदेहवत्।२५। भूतपंचत्रयाहात्रनाममात्रावशेषि
णः। पुंसोतरालेवस्थानंद्वयोः संसारमोक्षयोः।२६। हिरण्यगर्भपर्यंतः संसारोज्ञानक
र्मजः। भोगेनक्षपितेतस्मिन्निवृत्तंस्याद्वपुर्द्वयं।२७। अविद्यायापरिछिन्नोजीवऊषरूप
या। नवेदद्वैतविद्यायामधिकारीविमुक्तये।२८। नामशेषस्तुनैतौतद्व्याख्यानंनैवयुज्यते॥
यस्मादद्वैतविद्यायांनाधिकारोवपुर्विना।२९। नचाविद्यापरिछेत्रीतमोरूपाहिमायतः
न संसारक्षयेकृत्यमस्त्यद्वैतात्मविद्यया।३०। नवभोगेनसंसारः क्षीयतेकिंतुवर्धते। म
न्वानब्राह्मणोभोक्तुमुक्ताद्यदृष्टयहेउता।३१। आगामिकर्मणोश्लेषाद्विद्वद्भोगेनदृ

द्धिरुत्। अत्तस्मभोगकालीनंकर्मसंसारकारणं।२२। नांतरालेस्थितिस्तस्मान्नामशेषगि
रिष्यते। किंतुप्रयोजकाशेषलयान्मुक्तिरुदीर्यते॥२३। मुक्तावप्यवशिष्टत्वान्नाम्नोनंत
स्यमाप्यतः। विश्वान्संपादयन्देवाननंतंलोकमश्नुते।२४। ग्रहातिग्रहवंधाद्यमृत्योर्यन्नि
स्यात्प्रयोजकं। कालकर्मेश्वरादीनांमध्येतत्किंमितिर्यतौ।२५॥ अविद्वद्विषयःप्रश्नोवि
षोजन्मसंहयात्। आतत्वबोधमज्ञानीबध्यतेनंतजन्मभिः। ब्रह्माद्यनुगृहीतिवागादीस्त्रा
शेरम्यादिदेवताः। भोगक्षयेमृतौस्वांगान्मंदरंतियथायथं।२७। पुंसोदेहगृहंभूयोदेहस्थ
तेषुदेवताः। अंशान्निदधतिस्वंस्वंनदेहग्रहणात्पुरा।२८। अधिष्ठानवियोगेनन्यस्तह
त्रोपमेर्युतः॥ वागादिभिरसौकिंस्वित्प्रयोजकमुपाश्रयेत्। २९। किंकारणात्मतामेति

किंवास्वेनविदात्मना। अवतिष्ठतएवायंकिंवाकर्मैवसंस्कृतः।३०। गुणान्वायदिवेशानंका
लंवादेवमेववा। यदृच्छांसंततिंशून्यंविनाशंवेतिभाषतां।३१। प्रश्नेनत्रेष्टःसंत्यज्यविजि
गीषांसवादिनां॥ निर्गतोविजिगीषुभ्योमिथोनिर्णयमूचनुः।३२। संसारभूमिवर्तित्वा
न्नैवायंकारणाश्रयः। कर्मादिपरतंत्रत्वात्स्वाश्रयोयेनचेष्यते। ३३। जडत्वाद्गुणकाला
दिर्नजीवंनेतुमर्हति। हगोयदृच्छाशून्यंत्रमानहीनंनचेतरत्।३४। देवैश्वरास्वतंत्रोचे
द्विधिशास्त्रमनर्थकं। अतोऽसाधारणोजन्महेतुःकर्मैवशिष्यते।३५। सतिकर्मणिवै
चित्र्यंदेहानामुपपद्यते। देवेशानुगृहीतत्वाज्ज्ञदोषोनकर्मणः।३६। इतिसर्वं विचार्यै
वकर्मैवप्रश्नान्मनुः॥ देहोत्कर्षापकर्षैर्नुपुण्यपापविभेदतः।३७॥ ॥इतिवार्त्तिकं

मारेपंचमस्याध्यायस्यद्वितीयंब्राह्मणं॥ ॥तृतीयब्रह्मणेपुण्यफलावधिरुद्दीर्यते। अश्व
मेधःपुपरंपुण्यंब्रह्मलोकःफलावधि॥२॥प्रत्यक्षःस्थावरत्वारव्यःस्पष्टःपापंफलाव
धिं॥विज्ञायतेह्ययज्ञादियत्नाद्धेयसंसृतेः॥२॥आसक्तिरहितंपुण्यंविद्योपेतंविमुक्त
ये॥अतःफलावधिर्मोहःसंमोरोनेतिकेचन॥३॥तदयुक्तंयतःकर्मनमोहस्यनिवर्त्त
कं। मोहानिवृत्तौतत्कार्यात्संसारान्मुच्यतेकथं॥४॥प्रत्यग्र्थिात्म्यसंमोहःक्रियाकारकरूप
वान्॥अथतेषांतन्निःशेषक्रियाकारकवस्तुनि॥५॥प्रत्यग्याथात्म्यविज्ञानंतन्मोहस्यनिव
र्त्तकं। भविष्यतीतिचेन्नद्विकर्मणाकृत्यमत्रकिं॥६॥सममज्ञानकार्यत्वंयद्यपिज्ञानकर्म
णोः। मेयैकात्म्यानुरोधित्वंतथाप्यतिशयोधियः॥७॥कर्मीविद्यानुरोधिस्यान्नत्वेका

त्म्यानुरोधिहि। सर्वस्यैकात्ममात्रत्वेकः किंकेनकरिष्यति॥८॥यथास्वर्गःकर्मसाध्यस्तथामु
क्तिरपीतिचेत्॥ मुक्तिस्वभाववीक्षायांनयुक्ताकर्मकार्यता॥९॥उत्पाद्याप्यसंस्कार्यं
विकार्यंचक्रियाफलं। नैवंमुक्तिर्यतस्तस्मात्कर्मनस्यात्साधनं। कर्मस्वभाववीक्षा
मपिकर्मनिसाधनं॥१०॥एकेनवाजनवेन्मुक्तिर्यदिवासर्वकर्मभिः॥मकृत्स्नहेतैरथवायाव
ज्जीवप्रयोगतः॥१०॥काम्यैर्वायदिवानित्यैरुभयैर्वाविमुच्यते॥श्रौतैर्वायदिवास्मार्त्तैर्य
दिवोभयकर्मभिः॥११॥केवलैर्वाथवाज्ञानसंयुक्तैर्वेतिभण्यतां। ८ एकस्यमुक्तिहेतोस्या
त्कर्मांतरमनर्थकं॥१२॥सर्वेषांमुक्तिहेतुत्वेतुफलैक्यादेककर्मगा। सर्वेष्वपिविकल्पेषु
मानाभावोह्यतिस्फुटः॥१३॥नचाश्रौषंश्रुतेर्वाक्यात्कर्ममोक्षफलंक्वचित्॥नतत्रहि

णयांतिनाविद्वांसस्तपस्विनः।१७।नकर्मणेत्यादिवाक्यात्कर्मत्वंतुनिंद्यते॥निंद्यतांकेवलंकर्मतस्यानित्यफलत्वतः।१८।विद्यासमुच्चितंनित्यंमुक्तयर्थमितिचेन्नतत्।एकदेशैकैककालेस्थितयोरविरुद्धयोः।समुच्चयःफलैक्येस्यान्नत्वसौज्ञानकर्मणोः।१९।बाध्यबाधकभावेनपंचास्योरणयोरिव।एकदैवानवस्थानान्नसमुच्चयएतयोः।२०।साध्यसाधनरूपत्वादेककालानवस्थितिः।हेत्वस्वरूपकार्येषुविरोधस्तनयोःस्फुटः।२१।अध्यासःकर्मणोहेतुःप्रमाणंबोधकारणं।नामरूपंकर्मरूपंबोधरूपंतुभासकं।२२।कर्मकार्यंभविजन्मतन्निवृत्तिस्तुबोधजा॥समुच्चितात्केवलाद्धानतोमोक्षोस्तिकर्मणः।२३।अश्वमेधादियत्पुण्यंमहोपासनयायुतं।तत्फलंसंसृतिस्थस्याभुज्यनाप्नोत्यसंशयं।२४।ब्रह्मांडाद्ब्र

ह्मरंतश्चमष्टिव्यष्टिरूपिणः।व्याप्तिर्हिरण्यगर्भस्यसंसारस्यावधिर्मतः।२५।आगमैकाधिगम्योयमर्थइत्युपदर्शयन्।गंधर्वाख्यायिकामाहगंधर्वस्तद्गुरुस्तनः।२६।लोकांतानपिगंधर्वादश्वमेधकृतांफलं।श्रुत्वापरिक्षितोत्रवादिनंतंचमोहयत्।२७।अश्वमेधकृतोवक्तिभुज्युःपरिक्षिताइति।परितःक्षितिमावेष्यस्थिताइतिविवक्षया।२८।द्विर्यज्ञवल्क्यमुद्दिश्यपत्न्योक्तिस्त्रासजन्मने।अत्रस्तोतींद्रियज्ञानंदर्शयन्निदमुक्तवान्।२९।* गंधर्वेणगतिःप्रोक्ताश्वमेधाकृतामिति।भूयःएषःस्वयंवक्तुंप्राहलोकस्यविस्तृतिं।३०।आदित्यरथगत्याधामितोयावद्दहर्निशं।द्वात्रिंशद्गुणितस्तावद्व्याप्तोभानुगभस्तिभिः।३१।इयानेवप्राणिभोगसिद्धयेलोकइष्यते।इतःपरंतुद्विगुणःपृथिव्यालोकवर्जितः।३२।

अंतरालोकयुक्तः सन्बहिरालोकवर्जितः। लोकालोकगिरिर्मध्येऽथियोरनयोः स्थितः ३०। अंडाद्बहिर्घनोदेयमितिपौराणिकाजगुः। पुराणंबाध्यतेऽस्त्वाध्यानार्थंवाऽस्त्रनिर्मितं। ३१। सर्वथाप्यंडरूपोयंवैराजोदेहइष्यतां। योंडाद्बहिःस्थितोवायुःसूत्रात्मेतिश्रुतीरितः। एषोऽश्वमेधकल्पुण्यपरिपाकोनचापरः। ३२। क्षुरधारासुपमितःसंधिर्योंडकपालयोः॥ तेनबाह्यंनयत्येतानश्वमेधस्यदेवता। ३३। ते वायुभावमापन्नाःसमष्टिव्यष्टिरूपतः। ३४। अंडाद्बहिस्तदंतश्चतिष्ठंत्याकाशरूपिणः। ३५॥ अध्यात्मादिविभागेषु नव्याप्तिर्व्याप्तिरीर्यते॥ समस्तत्वेनसंव्याप्तिःसमष्टिइतिकीर्त्तिता। ३६। समष्टिव्यष्टि रूपंयउपास्तेसौमुक्तोमृतः। हिरण्यगर्भोभूत्वाथमुच्यतेम्रियतेनतु॥ ३८॥ संसारो

त्कर्षमीमेत्यंवर्णिताज्ञानकर्मजा। इतीविरक्तमालक्ष्यवाक्यतेस्वात्मनिर्णयः। ३७। इ
तिवार्त्तिकसारेपंचमाध्यायस्यतृतीयंब्राह्मणं॥ ॥चतुर्थब्राह्मणेमोहयोग्यःक
र्तृत्ववर्जितः। विषयोब्रह्मविद्यायाआत्मेतिनिरूप्यते। १। अहंधीकर्मशास्त्राभ्यां
दृष्टेर्ईशानसिध्यति॥ किंतुदृष्ट्यादिसंयुक्तोब्रह्मताम्यविरुध्यते॥ २॥ अतोब्रह्मत्वयो
ग्यस्यप्रतीचोत्रबुभुत्सया। अनूद्यब्रह्मनामादौतदर्थंपरिएछति॥ ३॥ यस्माद्वादपरो
क्षंस्याद्ब्रह्मतद्दृष्यतामयं। अर्हंसंवंतिरस्माद्यआत्माबृहतंमुने। ४। सादादितिपदे
नात्रयवधानंनिवार्यते। स्वर्गलोकादिवद्ब्रह्मनातोदेशांतरादिगं। ५॥ अगौणताप
रोक्षार्थौब्रह्मत्वस्यविवक्षिता। नामादेरिवनोगौणंब्रह्मत्वंप्रत्यगात्मनः। ६। आविर्भी

वोपरोक्षत्वंतच्चास्त्यवधानतः।स्वप्रकाशस्वभावत्वादितिवार्थः षट्दूषे।७। अथाद्वैतान
नुगतंवस्तुब्रह्मगिरोच्यते। अकारणमकार्यनद्वित्यनेनोदितंनवेत्।८। अपुमर्थमिदं
ब्रह्मनवेदात्मैवतद्भवेत्। यतोतआत्मरूपार्थंयच्चात्मेतिविशेष्यते।९। सजातीयविजा
तीयद्वितीयार्थनिवृत्तये। सर्वांतरद्वयंग्राह्यसर्वात्मंतेनसिध्यति।१०। सर्वात्मंब्रह्मणो
योग्यंतच्चजीवात्मनीरितं। मुख्यापरोक्ष्यंजीवस्ययोग्यंब्रह्मणिवर्णितं।११। अभेदोवास्त
वोजीवब्रह्मणोर्व्यत्ययादतः॥ विवक्षितस्तत्त्वमंगाद्वादिव्यामोहआर्थिकः।१२। आत्म
नोब्रह्मतामुख्याब्रह्मणोप्यात्मतातथा। प्रत्यगृष्यापरागृष्यामिथोब्रह्मात्मनोर्मिदा॥१३॥ २२२
ब्रह्मत्वमात्मनोरूपंतमसातिरोहितं। आत्मत्वंब्रह्मणोप्येवंतोजीवेशभेदधीः।१४।

तमसोबोधविध्वंसेअब्रह्मानात्मताहतोः। प्रत्यञ्मात्रावशेषत्वात्स्यामस्वीदमानहं।१५।
अमूढोयाज्ञवल्क्योत्रप्रत्यगृष्यापरामृशन्॥ प्रत्याहैषतआत्मेतितंसर्वांतरमद्वयं॥
१६॥ मुख्यापरोक्षोयंप्रत्यक्स्वप्रकाशोवभासते। एतच्छब्देनतंग्राह्यविस्पष्टत्वविवक्षु
या।१७। अंतर्मुखस्यविस्पष्टेनायंमंदेहगोचरः॥ दूत्यनिमित्तेत्यतत्त्वंत्वंशब्दवाच्यमानउनाक
रोत्।१८। षष्ठ्यंतस्यतदुत्पत्तस्ययुष्मद्बुद्ध्युपलक्षितं॥ देहादिसर्वभावोन्मोदनमर्थोविवक्षि
तः।१९। आत्मेतिचप्रमात्रादेःस्वरूपमनिधीयते॥ प्रमात्राद्यागमापायसाक्षित्वात्तस्व
रूपता।२०। यद्यस्मिन्व्यभिचार्येतत् तत्स्वरूपंनऊत्वपित्। ऊंडुलित्वंयथापुंसः सा
क्षीत्वव्यभिचारवान्।२१॥ व्यभिचारोमिथोयद्वत्प्रमात्रादेःसमाहिकः। साक्षिणोव्य

भिचारस्तु तथा। किंसाद्विकोभवेत्।२३। आत्मात्मवत्संबंधः षष्ठ्योक्तोजगदात्मनोः॥
स्वतोनिरात्मकं दृश्यमात्मकं नात्मतांव्रजेत्।२३॥ आत्मासर्वस्वरूपत्वात्सर्वांतर
गिरीरितः। सर्पधारादिकल्पेषुरज्वोरांतरतायथा।२४। आत्मनोनवबोधेनतदन्यार्थाभि
संगतिः॥ प्रत्यञ्चात्रतयैवांबोधादात्मनिलीयते।२५॥ अतःसर्वांतरत्वेनसर्वात्मत्वंविव
क्षितं।२६॥ नसर्वेषुन्वयोयस्मादन्वयादिर्नचात्मनि। व्यतिरेकान्वयाभावाः कार्यकारण
वस्तुनि।२७॥ अकारणमकार्यंतद्व्यतिरेकादिभाक्कथं। अन्वेतिसर्वकार्येषुकारणंत
तोयथा।२८। व्यतिरेकस्तुकार्यस्यस्पष्टः कार्यांतरात्मनः। अध्यक्षत्रभावोवाकार्या
णांसर्वसंमतौ।२९॥ आत्मनः सत्त्वभावत्वाद्भावः शंक्यतेपिन॥ प्रत्यक्षयासमानत्वा

न्न प्रतीतोन्यस्यवस्तुनः।३०। व्यतिरेकैकरूपस्यव्यति-रेकोनलभ्यते। सर्वस्वरूपभूतस्य
ऊत्रान्वयद्वतीर्यतां।३१॥ तस्मात्सार्वात्म्यमेवेह वक्ति सर्वांतरोक्तितः॥ इत्यंस्वानुभवा
त्याज्ञवल्क्यः सर्वांतरंजगौ।३२। अन्यःसंशयमापद्यनिगीषुःपरिपृच्छति। तवात्मे
त्युत्तरंदत्तं ममात्मात्रत्रिधेक्ष्यते।३३। देहोलिंगंचसाक्षीतिते षुसर्वांतरोस्तुकः॥ सर्वो
तरत्वंदुःसाधुमल्पयोर्देहलिंगयोः।३४। सङ्घातेन्यस्यकिमानमत्रमेयस्यसाक्षिणः।
एवंदृष्टःस्वानुभूतौवादिनोनधिकारितां।३५। मत्वानुमानतःसत्तामात्मनः प्रत्यपाद
यत्॥ स्वप्नेमानवैफल्यादत्रमेयत्वमिष्यते॥ वादिभ्रांतिनिवृत्यर्थं मानोक्तौहीयतेत्र
किं।३६। प्राणादिकरणैश्चेष्टाकर्तृदृष्टौक्रियावतः॥ छिदिक्रियावत्कर्तृत्वंनयुक्तंदेहलि

DR BHAU DAJI
MEDICAL

गयोः ।३७। करणप्रेरकः कर्त्ताकरणैः प्रेर्यतेवपुः ।लिंगंतुकरणात्मत्वान्नैवकर्त्तृत्वमर्हति ।
३८। मुखसंचारिणजाग्रद्यः प्राणेनानितीङ्गिता । सर्वप्रत्यक्तमः सोयमात्मासर्वांतरा
वधिः ।३९। सुप्तेस्मिन्करणग्रामेयोसुप्तोलुप्तदृष्टिकः ।। सर्वान्संवासनारूपान्पश्यन्ना
णितिवायुना ।४०।। स्वप्नेषु बहुलिंगेषु मानाभावमहूद्युदः ।। दृत्युपालक्ष्यलिंगान्युपाना
दीन्युदाहरन् ।४१।। एकादशेंद्रियोत्पन्नचेष्टानामुपलक्षणं । प्राणाद्युदाहृतिस्तेनलिंगा
नांबहुतास्फुटा ।४२।। प्राणादिकार्यकरणैः स्वतोसंहतएकलः । नचेष्टांकुरुतेकर्वन्नय
स्कांतोमणिर्यथा ।४३।। तथादेहोनियतावेष्टाचेतनेनानधिष्ठिते । नदृष्टचेतनस्तेनप्रा
णादीनांप्रवर्त्तकः ।४४। ससूत्रदारुयंत्रेणसदृशंलिंगमुद्गुः । यःप्रेरयत्सआत्मेति

त्युक्तेन्योपजहामतं ।४५।। प्रतिज्ञायपुरासाक्षाद्दर्शयामितेऽत्रवाक्कुवंस्तथाकर्त्तुलिं
गेनप्रतिबोधयेत् ।४६। यथाकश्चिन्नयैवत्वंप्रतिज्ञायपुरात्मनः । आपरोक्ष्यमनुल्कात
लिंगेनावेदयस्यहो ।४७।। लिंगंवाच्यंपरोक्षेर्थेनित्वात्मनिपरोक्षता । इतिमत्वाहैवकारंप
रोक्षस्यनिवर्त्तकं ।४८। मुख्यापरोक्ष्यमुक्तंतत् इतिदर्शयितुंपुनः । प्रत्यग्दृष्टिपरंवाक्य
मुत्तरत्वेनवक्ष्यसौ ।४९। विद्वद्भाषामबुधान्यः समरूपादिविवात्मनि ।। अहंजन्मापरो
क्षत्वंमत्वाऽऽहेच्छत् पुरेवतं ।५०। दृष्टश्रुतमतज्ञातेनेषांसर्वांतरस्तुकः । दृष्ट्याद्यगोचरः
प्रत्यगितिप्रश्नमपाकरोत् ।५१। वेत्तीतियद्बलाद्वक्तिनवेत्तीत्यपियद्बलात् । योगिनोनु
भवंत्येतमगोचरतयैवहि ।५२। उक्तवर्त्मातिरेकेणनात्मवस्तुघटादिवत् ।। शक्यतेप्रतिनि

र्दृष्टुंप्रमाणगोचरत्वतः।५३।दृष्टुर्दर्शनदृग्रूपानासाक्षिणःस्वप्रभस्यतत्। प्रमाणगोचरत्वं
तुवस्तुस्वाभाव्यतोभवेत्॥५४। दृष्टेर्नपत्नूपदृश्यरमितिप्रत्युत्तरंवचः॥वस्तुगोचरनामेतद्वा
क्यंव्याक्रियतेस्फुटं।५५।चक्षुर्जन्यमनोवृत्तिश्चिद्युक्तारूपभासिका।दृष्टिरित्युच्यतेदृशदृष्टेः
कर्तेतिलौकिकैः।५६। अतोदृष्टिद्वयंवाक्येभातिषष्ठ्यंतशब्दतः। एकादृष्टिस्तज्जनेनधातुज
न्येतितद्वयं।५७। भर्तृप्रपंचेव्याख्यातिवाक्यंदृष्टिद्वयंविना। दृष्टिःषष्ठ्यंतशब्देनाकर्तृभा
वेतज्जंततः॥५८। मैवंपदेतज्जंतेस्मिन्प्रकृतिप्रत्ययद्वयात्। दृष्तिकर्तृसंसिद्धेःषष्ठ्यंत
स्यानपेक्षणा।५९।अतोदृष्टिद्वयंवाक्यं नित्यानित्यविभेदितत्॥मनोवृत्तिरनित्यान्यासा
क्षिचैतन्यरूपिणी।६०। वृत्तिर्जडाप्यभावात्मचैतन्यच्छाययायुता। चैतन्यावभासकत्वा

दृष्टिशब्दार्थतांव्रजेत्।६१। यस्सर्वस्यापिचैतन्यंतदृष्टिंव्याप्नुयात्तया॥दृष्टैकतामुपगत
मागंतुकमिवेक्षते।६२। व्याप्यत्वमेवदृष्टत्वंनाक्रियेदृष्टतास्वतः। नधूम्याग्नेरिवव्याप्तिः
किंतुमन्त्रक्सर्पयोरिव।६३। कार्त्स्न्येनयत्रवृत्तिः स्याद्व्याप्यव्यापकवस्तुनोः। व्याप्तिस्त
त्रैवमुख्यास्यात्स्त्रग्गसर्पादिवस्तुवत्।६४। देशकालादिभेदादसाधारणतत्वयोः
व्याप्तिर्नमुख्याधूम्याग्नेर्हिमवद्विंध्ययोरिव।६५॥ क्रियाकारकरूपाधीरक्रियाकारका
त्मना। व्याप्तेवजायतेऽनंशाकाशेनयथातथा।६६। व्याप्यादृष्टिर्जन्यवत्वादनित्यात्वा
पिकालियं। कूटस्थत्वेनसाक्षित्वान्नित्याजन्मादिवर्जनात्।६७। कूटस्थदृष्टितन्मोहो
दृश्याभासंचतत्त्रयं। साक्षीसर्वजगद्धेतुर्नियंतेतिचनाण्पते॥६८। कूटस्थदृष्टेः

मात्रिलंस्वमोहाभासवर्त्मना। मात्रेणार्थेनसंबंधात् सिध्यत्येवस्वतोननु।६९। व्यावृत्तत्वे
नमात्रादेः सिद्धःसाक्षीसुषुप्तगः॥ नोविदिषंसुषुप्तोहमितिधीर्नान्यथाभवेत्।७०। बु
द्ध्यादेःप्रविलीनत्वाद्देहादेश्चजडत्वतः॥ लोष्टादेरिवनैवस्यान्नाज्ञमित्यमितीक्षणं॥
७१। घत्यक्मात्रंतिरेकेणनाभावोपिप्रसिद्ध्यति॥ किंमुभावोजगत्यस्मिन्साक्षीवान
न्यसिद्धिकः।७२। शून्यस्यापिहिअन्यत्वंतत्साक्षिण्येतीक्ष्यते॥ असाक्षिकंचेतत्सि
द्धंसाक्षिवत्स्यात्स्वयंप्रभं।७३। नदेशकालावस्थादेरपेक्षासाक्षिसिद्धये। देशादेःसा
क्ष्यपेक्षत्वात्स्वतःसिध्यतिसार्क्षतः।७४॥ जन्मनाद्यादिसाक्षित्वाज्जन्मनाद्यादिवर्जितो
साक्षिदृष्टिरियंनित्यामोहजन्मान्तथेतरा।७५॥ अविचारितसंसिद्धो मोहोयंसाक्षिस

न्निधेः। साभासोमात्मनादिर्भवेद्धर्माद्यपेक्षया।७६। स्मृतिनिश्चयसंदेहरागद्वेषादिर
हितेषु॥ अहंरूपेणयोवेत्तिसप्रमाताऽस्मिनित्यचित्।७७। स्मराम्यहंनिश्चिनोमिसंशयेरा
गवानिति॥ अहंरूपान्वयंस्पष्टः कर्त्राभोक्त्राप्यसौभवेत्।७८। घत्यक्षोहोत्यबुद्ध्या
दिर्जडरूपप्रधानतः। कर्तृताभोक्तृतात्यस्यविदाभासप्रधानतः।७९। घमातुर्जायतेहन्ति
श्चक्षुषारूपरंजिता। दृश्यंउतयारूपंनसाक्षीदृश्यतेतया।८०। दृष्टेर्दृशरमात्मानंदृष्टा
यरूपेनदृश्यया। इतिवाक्यंमुनिर्वक्ति वर्णिनियान्यायगर्भितं।८१। येनचक्षुरिदंदृष्टंचक्षु
षायंनपश्यति॥ ब्रह्मविद्धितदेवत्वमितिश्रुत्यंतरेस्फुटं।८२। श्रुतिःश्रोत्रजधीहेतिस्तस्या
ः श्रोतावभासकः। श्रुत्यात्माहावगाहिन्याश्रोतारंशृणुयान्नतं।८३। ऊहापोहात्मधी,

इतिर्मतिस्तस्याः प्रकाशकं। अनूद्यमनपोह्यतन्नमत्वीयास्तेमतया ॥८॥ अस्पष्टऊह्यआत्मा
नुविस्पष्टेभानरूपतः। अनपोह्योनुपाधित्वादात्मानापैतिकर्हिचित् ॥९॥ निश्चयात्मकधीह
र्तिर्विज्ञातिस्तद्विभासकं। अमंदिग्धंतयाहस्यानविज्ञातुंलमर्हसि ॥१०॥ दृष्टश्रुतमतज्ञाते
ष्वित्यमात्मानकश्चन ॥ किंनहीषतवात्मेतिप्रोक्तःप्रत्यक्तयापुरा ॥११॥ यःसर्वविषयीक
र्तृविषयीक्रियतेनहि ॥ किंनुनातिस्वयंसोयंसर्वांतरइतीरितः ॥१२॥ सर्वांतरत्वमात्मत्व
मन्यस्मिन्मतिनतत्कृतः ॥ नचेदन्यत्तदासर्वज्ञाह्यर्थानेतिशंकिते ॥१३॥ अतोन्यदार्तभि
त्याहदोषहृयनिवृत्तये। आरोपितप्रपंचस्यतत्त्वज्ञानेनपीडनात् ॥१४॥ सर्पादीनांकल्पिता
नांरज्वात्मायथातथा। मायामयस्यसर्वस्यविद्धस्त्वात्मेतिसुस्थितं ॥१५॥ इतिवार्तिक

मारेपंचमाध्यायस्यचतुर्थब्राह्मणं ॥ ॥ पंचमब्राह्मणेबोधसंसिद्धिसाधनेन चे। समुत्पन्ने
तत्त्वबोधे मुक्तत्वमेववर्णयते ॥१॥ कहोलोषस्तयोः प्रश्नेपौनरुक्त्यंनिवर्तयन्। जीवात्मप
रमात्मानौनिन्नावित्याहकश्चन ॥२॥ कहोलब्राह्मणोक्तोयमापंचमसमाप्तितः। अज्ञानायादि
रहितःपरमात्माप्रपंच्यते ॥३॥ उषस्तब्राह्मणोक्तस्तुजीवात्मायंपरेणसः। षष्ठाध्यायेनम
र्वेणप्रपंचयतइतिस्थितिः ॥४॥ मैवंब्रह्मस्वमाम्नेनप्रत्युक्तेश्चसमत्वतः। आत्महृयासंभवा
च्चनजीवपरयोर्भिदा ॥५॥ माहात्म्यादिकः प्रश्नोहृयोरेकविधस्तथा। प्रत्युक्तिश्चैवइत्या
दिस्तत्रार्थोभिद्यतेऽतः ॥६॥ एकेनैवात्मनादेहेसात्मकेमतियःपुनः। हितीयआत्माकिं
तेनतस्मादात्महृयंनहि ॥७॥ एष्टोदेहविनेदेनयद्यात्माभिद्यतेतदा। सर्वांतरत्ववचनंह

योरपिविरुद्ध्यते ।८। उपस्तएष्टादन्यत्वंनिवर्त्तयितुंमात्मनः । यएवमाहादित्युक्तावेव
कारः प्रयुज्यते । ९। उपदेशस्यविषयस्तमर्थः शोधितःपुरा । नब्रह्मत्वंमम्यगुक्तमितिप्र
छतितत्पुनः ।१०। अज्ञानाद्यादिरहितब्रह्मतायाश्चभाषणे । नस्यात्मर्वंतिरत्वादिसंभा
णेचिदात्मनि ।११। इत्यभिप्रेत्यतेनोक्तंमाहादीत्यादिकंपुनः । अनूद्यमंवंपप्रछकहे
लोब्रह्मरूपतां ।१२। त्वमर्थोशोधितान्नान्यद्ब्रह्मेत्येतद्विवक्षया । उक्तमेवोत्तरंभूयएष
इत्याद्यवोचत ॥१३। क्षुत्पिपासेशोकमोहौजरामृत्यू इतीदृशैः ॥ त्रिभिर्युग्मैर्विही
नांमध्येमोकतमोवद ।१४। यद्यन्यतमएतेषांतस्यनब्रह्मतातदा । एतेष्वनंतग
तस्तुनकोप्यात्माजनैर्मतः ।१५। विदुर्जनानुभूत्यैवक्षुधादेरवभासकः । प्रसिद्ध

Dr BHAU DAJI

घमिद्दृत्यभिप्रेत्यब्रह्मत्वेनतमुक्तवान् ।१६। अत्येतियोज्ञानाद्यादीन्विचारेणनिरू
पणे । क्षुधादिमात्रीतस्यास्यब्रह्मत्वंकेनवार्यते ।१७। नन्वेकआत्मामूढानांविदुषांचेति
तेमतं । उक्तोर्मिषट्कातीतत्वंतद्धर्मश्चास्यतत्कथं ।१८। अविचारविचाराभ्यांयथासर्प
त्वरज्जुते । तथात्मन्यपिसंसारभावाभावावितीस्तां ।१९। क्षुत्पिपासेप्राणधर्मौ
शोकमोहौत्रमानसौ । जरामृत्यूदेहधर्मावात्मधर्मौनकश्चन ।२०। प्राणसंचा
रबाकुल्याद्भ्रमनादिश्रमेसति । क्षुत्पिपासाजनिस्तेनप्राणधर्मत्वमेतयोः ।२१॥
दृष्टस्यवस्तुनोभिद्वोचेतसोयानवस्थितिः ॥ सशोकोमनसोधर्मोमोहश्चविषयस्य
भ्रमः ।२२॥ जरादेहस्यशैथिल्यं मृत्युः प्राणवियुक्तता ॥ तेसर्वेप्यात्मनिभ्रांत्याकल्पि

त्वाद्योमनैल्पवत्।२३। यः स्वकारणमंमर्गः स्नुधादेः प्रलयेमतः। अनात्यंतिकरूप
त्वात्सौत्पर्यंत्रनगृह्यते।२४। तत्कारणनिषेधोयःस्वमहिम्नैववस्कनः। तमत्ययंमोह
विधौतद्दिहांसःप्रचक्षते।२५। प्राणद्देहस्तमः प्राणधर्म्याभ्यामुपलक्ष्यते। सत्त्वात्मा
शोकमोहाभ्योजरयामृत्युनाविराट्।२६॥ तमः सत्त्वंविराजंच योत्येत्यात्मास्वयंप्रभः
असंगस्तत्परंब्रह्मसाक्षादित्यादिलक्षणं ॥२७॥ यथाविशुद्धमाकाशंतिमिरोपप्लवोऽ
स्तिवामले। नीहारादौतथैवात्माकार्यकारणवस्कनि।२८। परमात्मस्वभावो २३८
यंकहोलायप्रपंचितः। तद्बोधसाधनंसर्वकर्मत्यागद्दहोच्यते।२९॥ उत्पन्नस
म्यग्ज्ञानस्यसंन्यासोलक्षणंयतः। साधनंचतदुत्पत्तौसंन्यासस्तत्रगम्यतां।३०

ब्रह्मात्मनोर्यदैक्यंब्राह्मणद्वयनिश्चितं। एतंतमितिशास्त्राभ्यांतदैकात्म्यमनू
द्यते।३१॥ अत्येतियोऽनायादीनसआत्मेतिगीरोच्यते॥ तमात्मानंविदित्वाथ
व्युत्तिष्ठंत्येषणात्रयात्।३२॥ ब्रह्मप्राप्तेनदृष्टेतेतद्बोधफलसाधने॥ श्रुतिमत्वोत्तर
त्वेनव्युत्थानंत्वबद्धयमुच्यते॥३३॥ एवंविदित्वाप्रज्ञातुव्युत्थायेत्यन्वयाद्भुता
त्॥ विद्वत्संन्यासआज्ञातिब्रह्मबोधफलात्मकः।३४। व्युत्थायाथविदित्वे
तिव्यत्ययेनार्थिकान्वयात्। सिद्धोविविदिषात्यागः स्पष्टः श्रुत्यंतरेप्यसौ।३५। स्वा
त्मलोकंस्वमिच्छंतः प्रव्रजंतीतिवक्ष्यति। त्यागेनैकेऽमृतत्वंतु प्रापुरित्यपराश्रुतिः॥
३६॥ ब्राह्मणग्रहणंश्रुत्याविप्राणमेवभाष्यकृत्। संन्यासेधिकृतिंप्राहचतुर्थी

श्रमरूपयोः ॥५७॥ विद्यागतत्फलात्मानंगार्गीविदुरयोरपि ॥ स्त्रीशूद्रयोर्भिक्षुकाः संन्यासमनुमन्यन्ते ॥५८॥ पुत्रैषणेतिपुत्रार्थंदारस्वीकारवांछनं ॥ कर्मणांसाधनेवित्तेत्तल्लावित्तैषणामता ॥५९॥ लोकैषणेतिदेवादिलोकार्थोपासनार्थिता। नकश्चिदन्यः संसारउक्तादस्त्रैषणात्रयात् ॥६०॥ मनुष्यलोकः पुत्रेणपित्तलोकस्तुकर्मणा ॥विद्ययादेवलोकश्चेत्यब्रवीन्नंग्रहंश्रुतिः ॥६१॥ न्याय्यांवृत्तिंसमुल्लंघ्यतद्विरुद्धतयास्थितिः ॥ब्रुवानमुदितंराज्ञः सामंत्रोव्याथितोयथा ॥६२॥ निंद्यालक्ष्यतेचर्यापरिग्रहविवर्जिता। किंभोग्यंपरिगृह्णीयात्सर्वभोग्येषु दोषदृक् ॥६३॥ लोकत्रयार्थैषणाभ्यो व्युत्थानंचापरिग्रहः। द्वयंवो

धमहिम्नैवविदुषोननुयत्नतः ॥६४॥ आनंदैकस्वभावंस्वमात्मानंपश्यतः ऋतः कामः परिग्रहोवास्यात्तद्योकामइतिवक्ष्यति ॥ नदुःखहानयेप्यस्यसाधनोनांपरिग्रहः। बुभुक्षादिनिषेधेननिर्दुःखात्मावबोधनात् ॥६६॥ विदुषः कृतकृत्यत्वान्मार्तंसंन्यासलिंगकं। भाष्यंश्रमममात्रैकनिरूपणानामितीरितं ॥६७॥ नयद्येषाचारश्लोकात्तस्येष्टनिष्टवर्जनात् ॥६८॥ आरब्धत्यक्षणायैवतस्यदेहः प्रवर्तते ॥६९॥ फलात्मकोयंसंन्यासस्तत्त्वविद्यापुरःसरः ॥ अन्योविविदिषात्यागआपातज्ञानरूपकः ॥ ज्ञानद्वयंविविदिषाविदितेत्यस्यकीर्तनात् ॥ त्यागद्वयंलक्षतेत्रव्युत्पत्त्यैनान्वयंविना ॥ नज्ञानिवद्विविदिषास्त्यागः स्याभविकस्ततः ॥ निंद्या

चर्यं चरंतीति माधनत्वेनतद्विधिः। त्यागएवहिसर्वेषां मोक्षसाधनमुत्तमं। इत्यादिश्रु
तिषुस्पष्टंसाधनत्वमुदीरितं। ५२। फलसाधनभेदेनवाक्यभेदोभवेदिति। मांशंक
तामपूर्वार्थलाभेनादूषणत्वतः।५३। कश्चिद्यज्ञोपवीतादित्यागंनेच्छत्यसंहितत्व।
यज्ञंयज्ञोपवीतंचत्यक्तेतिस्पष्टमीरणात्।५४॥ यज्ञोपवीतंभूःस्वाहेत्यमुत्यक्ता
निरेषणः। यतिरात्मानमन्विछेदितिजाबालगीः स्मृता।५५। यस्मुत्यक्तुंनशक्नो
तिरागादिप्रबलत्वतः। गार्हस्थ्यादौस्थितोरागंपाचयत्वेषकर्मभिः।५५। कर्मानधि
कृताश्चंधबधिराद्यायथास्रुचि। आश्रमात्मकसंन्यासंगृह्णंत्यन्यमजन्मने।५६। २४०
अव्रतीवाव्रतीवेतिजाबालोपनिषद्वचः। ब्रूतेव्रतादिशून्यानामपिसंन्यासमा

छिलाबाल्पेनसंत्रायं। मुनिर्ध्यानसमाधिभ्यांभवेद्ब्रह्मनिरंतये।७१। ब्रह्मांतरइति
केचित्तेपरमानंददीपके। कृतकृत्योब्रह्मभावंगतोब्राह्मणउच्यते।७२। भाष्या
निप्रायतस्त्वेतत्पांडित्याद्युपवर्णितं। अथोच्यतेवार्तिकोक्तं पांडित्यादित्रय
मेयं।७३। पदार्थाधिगतिःसर्वतनस्मादनिमंगतिः॥ विरुद्धार्थंमुनिःपश्चात्ततो
वाक्यार्थबोधनं।७४॥ ब्राह्मणेबुद्धवाक्यार्थः माद्यादित्यादिलक्षणं। ब्राह्मण्यं
गौणमन्यस्यब्रह्मबोधाद्विजन्मनः।७५। प्रश्नः सब्राह्मणः केनेत्याद्येपोवात्र
इष्यते। ब्राह्मण्यसाधनंयद्वालक्षणंब्रह्मवेदिनः।७६॥ एषणात्यागपांडित्या
द्युपायान्साधनांतरं। दृष्टंतस्योत्तरंप्राह्य येनस्मादितिवाक्यतः।७७। विराट्

PAGE(S) MISSING
NOT AVAILABLE

FOLIO NO:
241

हिरण्यगर्भादिप्राप्तौसत्यामुपासनात्। ब्राह्मणंलभ्यतेयद्वामहतातपसावरात्।७८
प्रयोजवक्रुशस्त्रफलंत्वेतावदेवहि। इत्यनिष्टेत्ययेनस्यात्तेनेदृगितिभण्यते।७९
आक्षेपपक्षेकेनस्यात्तकेनापीतियोजना। नकर्मणानप्रजयेत्यन्यसाधननिरु
तेः।८०। शंक्यमानेनयेनस्यात्तेनेदङ्ततोधिकः। संत्यज्यनिश्चितंकस्माल्लंक्यते
साधनांतरं।८१। लक्षणप्रश्नपक्षेतुयेनेदृक्तेनलक्षणं। इत्युत्तरंवचोयोज्यंत
स्यार्थः प्रविविच्यते।८२। गीतायांक्वचित्प्रोक्तंस्थितप्रज्ञस्यलक्षणं। अन्य २४२
त्रविष्णुभक्तस्यगुणातीतस्यचक्वचित्।।८३।। येनचिह्नेनतेनायमीदृगेवनिरेषणः
उपलक्षयितुंशक्यस्तदेवास्तस्यलक्षणं।८४। आक्षिप्यतेयदालभ्यैतदात्मिप्रा

यउच्यते।। नियतंलक्षणंकिंचिन्नह्यस्तिब्रह्मवेदिनः।८५। रागीकश्चिद्विरक्तोन्यः कुद्धोन्यः
शांतिमान्परः।। प्रारब्धभोगनानात्वात्कथंलक्ष्मनियम्यते।८६। देहेंद्रियमनोबु
द्धिधर्मानेषोन्यवर्त्तत। प्रत्यगैकात्म्यसंबोधात्तद्धर्मैर्लक्ष्यतेकथं।८७।सर्वसंसारभा
वोस्यनयथालक्षणंतथा। प्रर्वभावोपिनैवस्यात् सुषुप्तेव्यभिचारतः।८८। शो
नेश्रद्दधानानांलक्ष्मैतन्नविवेकिनां। वेद्यानुरोधतोयस्माद्युज्यतेलक्ष्मतद्विदः
।।८९।।भावाभावोभयध्वंसिब्रह्मवेद्यंततः श्रुतिः। येनेदृगेवतेनेतिलक्षणंत
द्विदोब्रवीत्।९०। ब्रह्मयादृक्तादृगेवभवेद्विद्वान्निबोधत। बोधोतोलक्षणंत
स्यबोधश्चस्वात्मसाक्षिकः।९१।। अतोन्यदार्त्तमित्येषव्यतिरेकस्त्रिधोच्यते।।

प्रतीचोब्रह्मतेदोक्ततोन्यद्यद्विनाश्रितत्।९२।निरवयत्वंविद्याचेद्वयुरांतैर्दूषणा।।विदुषोलक्षणंबोध्यआर्तितल्लक्षणांतरं।९३।। ।।इतिवार्त्तिकसारेपंचमाध्यायस्यपंचमंब्राह्मणं।। ।।षष्ठेस्मिन्ब्राह्मणेब्रह्मकार्यमर्वविविच्यते। सर्वेतरत्वंनिर्णेयंब्रह्मणः।सर्वनिर्णयात्।१। यद्यत्कार्यंकारणेनव्याप्तमंतर्बहिश्चतत्। इतितर्केणपप्रच्छकारणस्यपरंपरां।२। पार्थिवंकविनंसर्वमोतप्रोतं दृवेजले। दधिपिंडइवक्षीरेजलंऊतंतथास्थितं। दीर्घतंतुवदोतत्वंनिर्यक्तोरिवेतरत्। व्यक्तोतर्व्याप्तिरोतत्वंप्रोतत्वंतुबहिःस्थितं।४।जलस्यकारणंतेजस्तेजसोवायुराश्रयः। ऋत्वंतरादिदृश्येयंवायोरूक्तंवियदाश्रयः।५।। भूम्यादिवियदंतानांभूतानामुत्तरोत्तरं। सूक्ष्मतावापितेदृष्टेताभ्योकारणतोच्यतां।६।।पंचभूतेभ्यउत्पन्नाअस्मद्देहादयोखिलाः।ब्रह्मांडांताइमेदेहाभोग्यत्वात्लोकसंज्ञकाः।७।यद्यैकस्मादिल्लरसादुत्तरोत्तरपाकतः।गुडादीनिबहूनिस्युर्भूतेभ्योंडादयस्तथा।८।नरगंधर्वमार्तंडचंद्रनक्षत्रदेवताः।इंद्रोविराट्तदंडंचेत्पेतांभूतदृशाः स्थिताः।९।तत्तद्देहारंभदृशस्तत्तन्नाम्नासमीरिताः।स्थूलसूक्ष्मदृशासासुकार्यकारणताक्रमात्।१०।एंचीकृतानांभूतानांसूक्ष्मतांडेसमाप्यते। एतावदेवतर्केणगम्यंननुततःपरं।११।चंडरंभकभूतानामपंचीकृतभूतजं। सूत्रकारणमित्येतदागमेनैवगम्यते।१२।अचिंत्याःखलुयेभावानतांस्तर्केणयोजयेत्। सूत्रांतर्यामिवाक्यराणितार्किकानानुमन्व

DR BHAU DAJI
२५२

स्वनुगतावतः॥ तौविद्वानखिलंवेत्तीत्यतोज्ञातव्यतातयोः॥ ध॥ समष्टिव्यष्टिरूपेण भुंजंप्रतियैरीरितः॥ सएववायुःसूत्रात्मातेनस

ते॥ १३॥ तर्काभासोभवेत्तेषुहेतुदृष्टांतवर्जनात्॥ अन्यथाप्रतिपत्त्यातोमूर्धपातंमुनिर्जगौ १४॥ ॥इतिवार्त्तिकसारेपंचमस्याध्यायस्यषष्ठंब्राह्मणं॥ ॥सप्तमब्राह्मणेतर्कंमंत्य ज्यागममार्गतः॥ ब्रह्मांडकारणंसूत्रमंतर्यामीचवर्ण्यते॥ १॥ सूत्रांतर्यामिणोजाननूगंध र्वसोपदेशतः॥ तर्कान्नेतिविवक्षित्वाकथंभुज्युवदुक्तवान्॥ २॥ सूत्रवद्वंदाकृयंत्रंपुरु षोनर्त्तयेद्यथा॥ अंतर्यामीजगत्तद्वत्सूत्रबद्धंनियच्छति॥ ३॥ सूत्रांतर्यामिणोसर्वजगद्भू तं॥ ५॥ ब्रह्मादिस्तंबपर्यंतंप्राणिकर्मपुराकृतं॥ वाय्वात्मनापरिणतंवर्त्ततेकारणात्म नि॥ ६॥ मूर्त्तोमूर्तब्राह्मणोक्तवामनाएतमाश्रिताः॥ तदात्मकमिदंलिंगं यत्सप्तदश मुच्यते॥ ७॥ विश्वोवायुनादेहदृत्येतन्मरणेसति॥ अवायोर्वपुषोकर्मयोग्यता

२४४

दवमीयतां॥ ८॥ अपंचीकृतभूतानांकार्यसूत्रमुदीरितं॥ अंडारंभकभूतानिप्रोतान्येता निचात्रहि॥ ९॥ सूत्रादप्यंतरं तत्वमंतर्याम्याख्यमुच्यते॥ कार्यकारणभावोयंयस्मिन्नुक्ते समाप्यते॥ १०॥ भूमिष्ठोभ्यंतरोभूमेर्भूम्यज्ञातश्चभूवपुः॥ नियच्छतिभुवंयोतः सत्रा त्मान्यस्यतेपिमे॥ ११॥ लोकंधत्तेस्वयंभूमिःस्वीतर्यामीस्वयंततः॥ इतिस्वभाववादो यंभूमिष्ठत्वेनवार्यते॥ १२॥ अंतरत्वेनभूमिष्ठपर्वतादिनिवर्त्तते॥ भूदेवतानिवृ त्तिःस्याद्यन्नजानातिभूरिति॥ १३॥ नांतर्यामीविदेहत्वेसाधनानामसंभवात्॥ देहि नानुनदृष्टेतिनदोषोभूवपुष्मतः॥ १४॥ भूदेवतायायोदेहोदेहोंतर्यामिणोपिसः देवस्यकर्मणोन्यस्य माययावाजितोयतः॥ १५॥ नचैकदेहयोगेपियंतर्यंतव्यसं

करः। वहिश्चदेवतांभूमिमंतःस्थेशोनियच्छति।१६। कार्योपाधिर्बविष्टः स्यात्कारणोपाधिरंतरः॥उपाधिमात्रतोभेदोवक्तव्यस्तस्कनिष्ठ्यते।१७। अतस्तेमेखिलस्यापि सौंतर्यामात्मतांगतः। अमृतत्वान्नजीवत्वमात्मत्वेप्यस्पृशंकृते।१८। सार्वात्म्यंवक्तुमस्यैषब्रह्मोपाधिषुवर्णितं॥ सर्वात्मात्रशक्तियुक्तोद्यौः सौंतर्यामीतिगम्यतां।१९। ब्रह्मत्वग्ध्यांतविदाभासंस्वकार्यनियमात्मकं। तदुपाधिर्नियंतैषपरः प्रोक्तोनतुस्वतः।२०॥ सर्वात्मासर्वशक्तिश्चसर्वज्ञः सर्वगोध्रुवः। जगज्जन्मस्थितिध्वंसहेतुरेषमहेश्वरः।२१॥नारायणोनिधोमंत्रएतस्यैवानिधायकः॥पंचाक्षरेणमंत्रेणशिवइत्येषगीयते।२२॥हिरण्यगर्भैर्हैरण्यगर्भीयाएतमूचिरे। व्यासस्त

२४५

त्पुराणेषुतत्तद्रूपतयोचिवान्॥२३। भूम्यादिदेवताःकस्मान्नसांतर्यामिणंविदुः। अदृष्टोश्रुतइत्याहकारणंतद्वेदने।२४। दृष्टिश्रुतिमतिज्ञातिविषयत्वंविदात्मनः। उपास्तब्राह्मणेसर्वयुक्तासम्यङ्निवारितं।२५। भोगोचरातिवर्त्तित्वान्मात्मानादिसाक्षिणः। द्रष्टुरन्यस्यचाभावान्नतंपश्यंतिदेवताः।२६। अदृष्ट्वाश्रुतत्वादिघ्रत्यर्द्धांतेपिसंभवेत्। तन्निदृश्यैश्रुतिर्दृष्टाश्रोतामंतेत्यभाषत।२७। दृष्ट्वश्रोतृताघस्यदृष्टिश्रुत्यादिसाक्षिता। अलुप्तचिस्वभावत्वान्नविकारोमनागपि।२८। लोकमिद्धानियम्यस्यजीवस्यदृष्टतायंतया। अंतर्यामिपिचेदृष्टदेहाभेतत्तदूयं।२९। इतिशंकानिदृश्यर्थनान्यो तोस्तीतिभण्यते। लोके जीवतथामूढैरंतर्यामेवभाव्यते।३०। साधार

णोयथासूर्येमिंप्रत्येवेतियामरैः। अमाधारणरूपेणभाव्यतेजीवतातथा।३१। बुद्धि
स्थः परएवात्माजीवात्मेतिनिगद्यते। बुद्ध्यागमापायमाद्दीनियंतेत्युततेपरः।३२।
सूत्रांतर्यामिणोश्चास्त्रगम्यत्वेनप्रतिष्ठितौ। अप्रतिष्ठिततर्केणगम्यमार्तमतोपरं।३३
इतिवार्तिकसारेपंचमस्याध्यायस्यसप्तमंब्राह्मणं॥ अष्टमंब्राह्मणेब्रह्मतत्वंसम्य
क्रूपपते। सूत्रमंतर्यामिताचयत्रोतप्रोततांव्रजेत्।१। सर्वमंत्रगीतमो ऽएष सू
त्रांतर्यामिवस्तुनि। ओतप्रोतात्मकौतांगार्गितयोरेवात्रएछति।२। अंडोर्ध्वाधो
मध्यदेशानकालंचव्याप्यतिष्ठति। सूत्रमित्याऊराचार्याओतंप्रोतंचऊत्रचित्।३। २४६
अंडारंभकभूतानांनएषासूत्रओतता। सूत्रेणविधृतंसर्वमितिसर्वत्रनिर्णयात्।४

तार्किकत्वनिवृत्त्यर्थमाचार्योक्तिमुदाहरत्॥ निःशेषदेशकालोक्त्यासूत्रसर्वात्मतोदि
ता।५। व्यक्तंसर्वसूत्रस्यरूपमव्यक्तव्योमसंज्ञके॥ओतंप्रोतंचविद्धीतिप्राहएष्टम
* नूद्यमः।६॥देशकालौचसूत्रेणसंधृतौदेशात्मकंततः। वियन्नाकाशमंत्रेतिसू
चनायानुवादगीः।७। आकाशोवैनामनामरूपयोर्निर्विदेऽनिं॥इत्याहकारणं
ब्रह्मश्रुतिराकाशशब्दतः।८। आसमंतात्कार्यतेयमित्याकाशत्वमात्मनः।९। ज
त्कारणतात्पर्यसर्ववेदांतसंमता।१०। मायायुक्तमेवेदंकारणत्वेनवास्तवं। अ
स्वीनपराघुक्तेःश्रुतोवास्तवहेतुता।११। मायांतुप्रकृतिंविद्यान्मायिनंतुमहे
श्वरं॥इतिमायायुक्तंतत्कारणत्वंजगोश्रुतिः।१२॥ व्यावृत्तिविधिरूपाभ्यांतमो

वङ्मात्रस्वरूपिणी। मायानुसूयमानेयंप्रत्याख्यातुंनशक्यते।१२। व्यावृत्तः शुक्लपीतादेरं धकारोनुसूयते॥ तथाविधिमुखेनापिद्विरेफोदरवन्नमः।१३। स्वप्नाज्जागरणाच्चैवं व्यावृत्यासुप्तिरीक्षते॥ मूढोस्मीतिविभात्येषमोहोविधिमुखादपि।१४॥ अहंकार जनेः सर्वमोहश्चिन्मात्रवर्त्मभूत्॥ तदुत्पत्तावहंकारविशेषणमिवेक्षते।१५। प्र त्यक्त्वंमोहयुक्तंसर्वव्यक्तजगज्जनोः॥ अव्याकृताख्यमभवत्सूत्रंतत्रसमा श्रितं।१६। एषोंतर्यामिणेषयोनिरितिश्रुतिमभीक्षणे। नोक्तांतर्यामिणःकल्प मन्यत्तत्वांतरंबुधैः।१७। बोद्धुंबोधयितुंचैतदव्याकृतमितिश्रुतिः॥ विस्मि ता प्राणनामासीत मव्याकृतवादिनं।१८। भूयोपि एष मप्राक्षीत्प्राधानादि

खुश्रुतया। प्रधानादीन्जगद्धेतत्वादिनः स्थापयंतिहि।१९। सावधारणमाकाशएवंचेत्प्र तिवृत्तये। आहोत्तरंमूर्धपातंमूवयंस्तर्कनिर्णये।२०। यद्वातंतुषिवपटःसूत्रंबकुषुसंश्रि तं। इत्याशंक्यपुनः प्रश्नएवकारोबकुत्वनुत्।२१। कस्मिन्नुखल्वयमाकाशोव्याप्तश्चेत तदूर्यतां। अनोतत्वेस्वतंत्रत्वात्प्रधानत्वंप्रसज्यते।२२। सूक्ष्मत्वादुर्वचंसूत्रंव्योमसूक्ष्म तरंततः। व्योमाश्रयःसूक्ष्मतमेनवाणोचरमेत्यतः।२३। वक्तिचेन्निग्रहस्थानमवा च्यस्योक्तेरभवेत्॥ अनुक्तोवादिताहानिरितिगार्ग्योविवक्षितं।२४। उक्तदोषद्वयाभ्यं प्रत्युत्तरमभाषत। एतद्वाक्षरंगार्गि ब्राह्मणाइति।२५। एतच्छब्देनतस्या ह प्रत्यक्षसाक्षिकतामसौ॥ प्रत्यक्षयातदैकात्म्यंस्वयमेवेप्रतीयतां।२६। न

व्यावृत्तंविशेषेभ्योनानुवृत्तंचगोत्ववत् ॥ अव्यावृत्तानानुगतंचैतन्यंकेनवीक्षितं।२७॥
यस्मात्त्वमिदंनास्त्यन्यत्त्वमिदंयन्नकस्यचित् ॥ सप्रमाणादसंगत्वाद्दृश्यत्वात्त्वमि
दंयोः।२८॥ मात्रादित्यादिनासर्वंयोऽर्थानायादिनातया। यत्वादनिहितः प्रत्यक्
छब्देनसगृह्यते।२९॥ हरार्हिरुद्धर्मत्वाद्धरंब्रह्मनएपते। कार्यकारणरूपंतुनश्च
रंहर मुच्यते।३०॥ ध्वस्तात्माज्ञानतत्कार्यः प्रत्यगात्मात्मबोधतः। त्यक्तसर्वैषणा
श्चत्रब्राह्मणाइतिकीर्त्तिताः।३१॥ ज्ञास्त्रैकगम्यतामिध्यैवदंतीत्यनिधीयते। ब्राह्मणा
स्तहदंतीतिसापराधनिषेधगीः।३२॥ नावाच्यंवचस्यहं किंतुवदंतिगुरवोविलाः। ह २५८
तिवच्मियतस्तेनवादितापिनहीयते।३३॥ गुरवोपिकथंप्राकुरवाच्यमितिचेद्भएफ

स्थूलादीनांनिषेधेनलक्ष्यंत्यहंबुधाः।३४। अभावश्चेषोनाशंकोनिषेधावधिर्भवेत्।
त्र॥ नाभावनिष्ठेलोकेपिनिषेधः किमुताहरे।३५॥ नञर्थैः पर्युदासोवास्थूलादेरन्य
ताहरे।। विवक्षितानचद्वैतंस्थूलादेः कल्पितत्वतः।३६। नूनंसर्गविशेषोस्तोयवत
त्रनिषेधधीः॥ दातव्यंदधिविघ्नेभ्यो नचैत्रायेत्युदाहृतेः।३७॥ बाढमज्ञानमात्मा
चद्वयंसामान्यमुच्यते। विशेषः सद्वआत्मातो निषेधोत्रप्रवर्त्तते।३८॥ निषेधः
कल्पितस्यापिस्थूलादेरिह युज्यते। अध्यस्तत्वोमनेत्यादिनिषेधस्योपलंभनात्।३९
यदिवाहरयाथात्म्यंस्थूलादेरिहभण्यते। सत्यंयाथात्म्यमद्वैतद्वन्नतुकिंचिन्नि
षिध्यते।४०॥ स्थूलादिहेतोर्दाहोवाधांतस्यप्रत्यगात्मनि। अस्थूलादिसमुत्था

त्मयाथात्म्यज्ञानवह्निना ।४४॥ नचेवातप्रोतवाक्येनव्यक्तमव्याकृतेजगत् ॥विलीपितं
पुनः कस्मात् स्थूलादिःप्रतिषिध्यते ।४५। स मस्तव्यस्तांकश्चिद्वक्तेवातप्रोतवाक्य
तः॥ ब्रह्मणस्तद्धुदासायस्थूलादिप्रतिषिध्यते ।४६।४३। व्यक्तावस्थाथवैतेषांनिषि
द्धाकारणात्मनि ॥ शक्त्यवस्थानिषेधस्तुक्रियतेत्राद्वरात्मनि ।४४॥ एवंचसतिन
स्पर्णं ब्रह्मरूपेनविष्यति । नोचेदरूपमेवस्याछक्त्यवस्थानपरूपवात् ।४५॥न
वानिषेधःस्थूलादेस्तस्मन्नागेवसिद्धितः । तन्निषेधानुवादेन प्रतीचिब्रह्मबोध्य २४९
ते॥ ४६॥ स्थूलादिमेयभ्रमात्तेनिषेधेस्वभ्रमंफलं ॥ विद्धिसर्वांतरंब्रह्मसाक्षादि
त्यादिलक्षणं ॥४७॥ नेतिनेतीतिवाख्यासर्वापीहसमीक्षतां । सर्वेषामपिचो

द्यानामेवंमतिनसंभवः ।४८। यत्किंचिदस्मल्लोकेस्मिन्वाचोगोचरतां-गतं । भ्रमा
णस्यचतत्सर्वमक्षरेप्रतिषिध्यते ।४९॥ मागोचरेनिषिद्धेद्यमानहीनंतदक्षरं ॥
कथमस्तीतिचेत्कोर्थःकथंवाद्म्यकथ्यतां । ५०। आक्षिप्यतेक्षरेसत्तांमानंवातत्र
इच्छ्यते । भ्रमाणाभावमात्रेणसत्ताक्षेप्तुंनशक्यते ।५१॥ मानस्याभिव्यंजकत्वादव्य
क्तंस्यादमानकं । नैतावतावस्तुसत्तानास्तीत्याहकंविना ।५२॥नास्यास्तित्वेय
थामानमेकत्वादक्षरात्मनः । तथातन्नास्तितांकश्चिन्नातोसत्ताक्षरात्मनः ।५३।ना
सत्त्ववत्तस्यसत्वंमानहीनंनभासते । सतोवभासरूपत्वादन्याभासानपेक्षणात् ॥
५४॥ यथाऽभ्रकाशायभानयोगमपेक्षते । तथाभानंभ्रकाशायनान्यत्किंचिदपे

ह्यते। ५५। प्रमाणप्रमेयपदेपिमानंतद्ब्रह्मनिर्द्वये। अज्ञानहानयेवेतविवादविनिवृत्तये
५६॥ इत्तमुत्तरमाघस्यस्वप्नकाशत्ववर्णनात्। अज्ञानहानिर्बोधान्न्यादस्माद्दूरवाक्
जात्। ५७। नाहंरास्तित्वबोधश्चेद्वाक्यान्न्यात् किंफलंभवेत्॥स्थूलाद्यनेकधर्माणांनि
षेधस्यप्रयासतः। ५८। विवादोप्यहरेकिंस्यान्निरुपाधौचिदात्मनि। अंतर्यामिणि
सोपाधावेतन्नेतेत्यवावद् ।५९। चिन्स्वरूपेविवादश्चेज्जगद्ध्यंप्रमज्जते। अंतर्यामि
ण्यतोवादिविवादःपरिशिष्यते।६०॥ प्रज्ञानमनेनलिंगेनमविवादोपनुद्यते। अंत
र्यामिण्यभ्युपेतेसुशकंबोद्धुमद्धरं। ६१। इहोक्तव्यार्थसंबंधादंतर्याम्येतदद्धरं। चै
तन्याभासमोहाख्यजन्मवर्त्मनेतत्स्वतः ॥६२॥ एतस्यवाक्यहरस्यश्रवणत्व

दोजगत्। स्याद्व्यवस्थितमर्यादंसूर्यचंद्रादिलक्षणं। ६३। विवादगोचरापन्नायंत्र सर्वा
जगत्स्थितिः। व्यवस्थितत्वाल्लोकस्यराजसर्वास्थितिर्यथा। ६४। सूर्यचंद्रौद्यौर्लोकौका
लौनद्योयथायथा॥ नियमेनप्रवर्त्तंतेमाप्रलयात्तिर्व्यवस्थितिः। ६५। धनेदानेननष्टेपि
तत्फलप्रदईश्वरः। यतोस्तितेनदातारंतंप्रशंसंतिवैदिकं। ६६। नासर्वफलेदंत
स्मिन्मानाभावात्फलंपुनः। ईशादप्युपपन्नत्वान्नैवासर्वस्यकल्पकं। सेव्याद्ब्रह्मः
फलप्राप्तिर्दृष्टतेनत्वसर्वतः। दानादिक्रियायासेव्यादीशान्नहत्फलंभवेत्। ६८
देवतायागकर्त्तारंपितरःश्राधकारिणं। नानुयुर्व्यक्तयार्थंयदिनाभूत्प्रमा
सिता। ६९। होमदानतपांस्यैर्वकृत्स्नलः कृतान्यपि ॥ विनाब्रह्मफलदानी ति

ज्ञानमनंतत्वज्ञानमिदं । ६९। अज्ञानमात्रतोबंधोज्ञानमात्रेणमुक्तता । इत्याश्चर्याणि
सर्वाणिकल्पयंतीश्वरास्तितां । ७०। विवादशंकापीशेमिन्नमंत्राव्येतिदर्शय
न्। ब्रह्मज्ञानमनंलिंगरूपंब्रह्मपंचितमशेषतः । ७१ ॥ यदब्रह्मबोधात्कार्यणंब्राह्मणा
यब्रह्मबोधतः । तदक्षरंब्रह्मबोधव्ययोक्तेश्वरवर्त्मना । ७२ । अक्षरस्यब्रह्मज्ञानमृत
स्वमोहाभासकल्पितं । नस्वाभाविकमित्येतद्वस्तुदृष्टादिकंल्यैवाकृतः । ७३ । मा
गोचरातिवर्त्तित्वादृदृष्टंस्यात्तदक्षरं । अभावलनिषेधार्थंदृष्टृदृश्यमितीर्यते
७४ ॥ कूटस्थदृक्कंदृष्टृलंनदृग्रूपेदृष्टिकर्तृता । श्रोतश्रोतगिराशेषदृश्यवस्तुनि
राकृतेः । ७५ । उक्तदृष्टृनिरेकेणदृश्यंनास्तीयथातथा । जीवदृष्टृनिषेधार्थंना

DR BHAU DAJI LAD MUSEUM

न्यदित्याद्युदीरणं । ७६ । विजातीयंसजातीयवस्त्वंतरनिषेधतः । कूटस्थमेकंचैतन्यं
सिद्धंवस्त्वक्षरंपरं । ७७ । एतस्मिन्नक्षरेगार्गिस्त्रजिकृष्णफणीइवत् श्रोतः प्रो
तश्चनिःशेषश्चाकाशोकारणात्मनि । ७८ । अक्षरंस्वात्मसंमोहात्कारणत्वंनियच्छ
ति । तथाकार्यत्वमप्येतन्निरविद्यंतदेकलं । ७९ । । सर्वस्याक्षरमात्रत्वात्कृत्स्नवे
दयज्ञमाश्रितः । नज्ञेयंशिष्यतेकिंचिन्नाप्यधस्तंतथातमः । ८० ॥ ॥ इतिवार्त्तिक
सारेपंचमस्याध्यायस्याष्टमंब्राह्मणं ॥ ॥ नवमब्राह्मणेदेवनिर्णयस्तदुपासा
नं । अष्टधापंचधाचोपनिषद्भ्योच्यतेक्रमात् । १ । सूर्यचंद्रादयोदेवाः शास्त्रि
तव्याउदीरिताः ॥ तेषांविस्तारआनंत्यंसंक्षेपस्त्वेकदेवता । २ । त्रयश्चेत्यादिमि

DR BHAU DAJI LAD MUSEUM

लीसाबद्धशरीरैरनंतता। सुषुप्तप्रलयावस्थः कारणात्मैकदेवता।३। नानालैकत्व
रूपाभ्यांतिष्ठतिप्राणदेवता।नियंतव्यनियंतृत्वसंबंधस्यप्रसिद्धये।४। ब्रह्मेशाः
सूत्रमंडंचजीवोलिंगंवपुर्विराट्। इत्यष्टावस्थातांभर्त्रीघपंचस्तात्त्विकीजगौ।५॥
तदमत्रेतिनेतीतिनिष्प्रपंचत्वमात्मनः।कथयिष्यत्यतोवस्थाभ्रांत्याब्रह्मणिक
ल्पिताः।६॥ अंतर्यामितया सर्वमव्याकृततयापिच। कथितंकारणप्राणंप्राणो
वायुरधर्ग्यता। सूत्राकारविरोधोयंकारणादधिकस्फुटः।७॥ स्वस्वतंत्रतयाधर्त्रे
वायोरध्यर्धतातातः।दृङ्गध्यर्धतान्येषुद्विसंख्यादिष्वपीक्षते।८। अतोधिकस्मृ
त्यैवश्रुतिरध्यर्धतांजगौ॥ अनंतेष्वेषुदेवेषु योयोदेवेनउपास्यते। ९॥ तेनतेनस्वरू

पेणप्राणएकउपास्यते।९। इतिदर्शयितुंदेवमेदानांप्राणरूपता।निर्णीताप्राणदे
वोयंपरोहंब्रह्मभएषते।१०। स्वरूपमपिमद्ब्रह्मस्वाविद्याव्यवधानतः।परोहंभा
तितत्तस्मादुपास्यंचित्तशुद्धये।११। सूक्कामरूपव्योमानितमोरूपजलान्यथ।रेतइ
त्यष्टधाग्निर्ब्रह्मोपास्यमुदीर्यते।१२। हिरण्मयोमिनयनोमनः संकल्पसाधनः।दे
वस्तिष्ठतिदेहेषुलगन्मज्जांसरूपधृक्।१३। पितृजन्यास्थिमज्जादेराश्रयोस्यउकार
एं। मातृशुक्रान्नजंवीर्यंत्रयमोपास्तिरीदृशी॥१४॥ कामदेहोबुद्धिनेत्रोमनोज्योति
सुखाश्रयः।रतीछात्मास्त्रियादीप्तोद्वितीयोपास्तिरीदृशी॥१५॥ शुक्रादीन्पत्रभू
पाणिभास्वराएषुनरत्रतु।देवोवर्णाश्रयःसूर्यस्तद्वदौदनिमन्यगी।१६॥ अधिदैवा

ध्यात्मभागौनेषेष्वपासनेष्वपि। व्याख्यातव्योयथायोगमित्युक्तोपाप्तिरष्टधा।१७।
पंचधोपासनंब्रह्मेतीभयामानवाक्यतः। त्वमंगारावहापणंसदृशंवकुरित्य
तः।१८। साक्षात्कारणपर्यंतंकिमुपासनमस्तिते॥ इतिपञ्चछंसंक्षुब्धोदिगुपास्ति
परोजगौ।१९॥ ध्येयरूपत्वानिमानःसाक्षात्कारउपास्तिषु। किंदेवोमीत्यतःप्र
श्नआदित्योस्मीतिचोत्तरं॥२०॥ सआदित्योनेत्ररूपद्वारबुद्धौप्रतिष्ठितः॥
ऊर्ध्वंतास्वप्यदिक्षेवंसर्वबुध्यौप्रतिष्ठितं॥२१॥ प्राच्यांरूपोपसंहारोदिक्
क्ष्येकर्मसंस्कृतं। ध्रुवायांसंस्कृतिर्नाम्नोहृद्येमेसर्वसंस्कृतिः।२२। निःशेषं २५३
ब्रह्मब्रह्मलोकांतंसंस्कृत्यहृदयात्मना। याज्ञवल्क्योस्थितेभूयःपप्रच्छसंस्कृ

दयाश्रयं।२३। देहस्थेहृदयेस्पष्टेमन्पमानोन्पमाश्रयं। लीनोहनीत्पधिक्षेसुंवक्षे
चोहस्त्रिकेत्पमुं।२४। प्रतिष्ठितेदेहलिंगेतेहेप्राणादिवायुषु। पंचधोपासनंत्वेवंसो
मानांतंसमापितं।२५। एतावदेवशाकल्योवेत्तिमायामयंत्रुतत्। दृष्टिमत्वाश्रुति
स्तत्वंवदत्युक्तनिषेधतः।२६। विहायारण्यायिकारूपंस्वेनैववचसाश्रुतिः। सए
षनेतिनेतीतिनिवक्तितत्वविनिर्णयं।२७। समापय्यात्मविज्ञानंयाज्ञवल्क्यात्मि
कामती। पश्चात्पप्रच्छशाकल्यमब्रह्मिष्ठत्वसिद्धये।२८। सएषनेतिनेत्यादिम
र्वोवाप्रश्नईक्षतां। मध्येवाक्यछिदोमत्वादितिन्यास्यपूर्ववत्।२९। ऐकात्म्येम
र्वमेवेदंसमाप्तव्यामरूपतः। समापनीयमित्युक्तेभूयंप्रश्नोत्तरेक्रमे।३०। पु

मर्थेविमितंशास्त्रंनैवत्पैकात्म्यवर्णने। तदनुक्तौतुसर्वोक्तंमर्वस्मात्तुषकंडनं
३१। नाक्षरा आत्मणेप्रोक्ताविज्ञानानंदरूपता। तथोपनिषदत्वंचहृयंत
दुपवर्ण्यते॥३२। नेतिनेतीतिसर्वत्रमूर्त्तामूर्त्तविवेचने। अत्राप्यस्थूलइत्युक्तं
इति सर्णेभर्ण्यते।३३। अथवाशेषवेदांतप्रसिद्धःसइतीरितः॥ स्वानुभूतिप्रसिद्धि
रुक्तप्रोक्तेषइतिशास्त्रतः।३४। देवविस्तारसंक्षेपाद्दृष्ट्वापंचधाचयत्। उपास्य
मुक्तंतत्सर्वंनेतिनेतीत्यपोद्यते।३५। इतिशास्त्रेणनिर्दिष्टदृशेपतस्मिन्नपोदिते। यो २५४
वसिष्ठःसआत्मास्यादृशेरात्मवतोमतः॥३६॥ आत्मात्मवत्त्वसंबंधोनान्योद्
गृदृशयोरिति॥ मत्वात्मशास्त्रोदग्वस्तुन्यवाच्येपिप्रयुज्यते।३७। ननुब्रह्माधि

कारेस्मिन्नुकथ्यमात्मेतिवर्ण्यते॥ नैषदोषोनिरेकेणनात्मनोब्रह्मतायतः।३८। याह्य
त्वंशीर्णतासंगोबंधोनीतिस्मृहिंसने। जाड्यात्जडस्यधर्मोस्युर्नतेसंत्यात्मवस्तु
नि।३९। कार्यधर्मानतीत्यैतांस्तद्वेलक्षाननिद्भुतेः। अशेषवेनिपरःपूर्णश्चात्मा
स्वात्मन्यवस्थितः।४०॥ दृश्यदृशेक्षतेर्वाक्यंतदात्वंनिरूपितं। यात्तीवत्क्ष
दि स्यवाक्यत्वेरूपमेतदनूद्यते॥४१॥ आत्मानिरुह्यप्रत्यूह्यपुरुषान्पोन्यवर्त्त
ते॥ तमोपनिषदंब्रूहि मूर्द्धोपतत्तुतेन्यथा।४२॥ योनूदितोनेतिनेतिसंविन्मा
त्रोह्यविक्रियः॥ उक्तौपुरुषनिर्वाहप्रतिर्वा हौतुमायिकौ।४३। सृष्टिरष्टवि
धोपास्यरूपानिर्दिहउच्यते॥ प्रतिवाहस्तुसंहारोदिग्देवद्वारतोहृदि।४४॥

वस्तुरूपेननिःशेषकार्यकारणवर्जनं ॥ तस्मान्निक्रांतिरुद्दिष्टासर्वोपनिषदिश्रु
तः ॥ ४५॥ कर्मकांडेविरोधित्वान्नैवायंश्रूयतेक्वचित् ॥ ऐकात्म्यवस्तुविज्ञानं
कर्मभिर्हिविरुध्यते ॥ ४६॥ अविरोधंमन्यमानाः केचिद्विज्ञानकर्मणोः ॥ क
र्मव्यध्येपिकुर्वंतियथावत्स्वात्मबोधनं ॥ ४७॥ यत्कर्तुमन्यथाकर्तुमकर्तुं
वापिशक्यते ॥ कुर्वंतुस्वेच्छयातादृग्विज्ञानंनुननादृशं ॥ ४८॥ तस्मादुपनि
षत्स्वेवज्ञातःकर्मविरोधतः ॥ नकर्मकांडेशाकल्यःकर्मित्वान्नैववेत्तितं ॥
४९॥ ब्रह्मिष्ठाअपिगार्ग्याद्याःस्वस्वप्रश्नोत्तरेसति ॥ उष्णग्परतास्तेन स
मुनिर्नूशापतान् ॥ ५०॥ अब्रह्मिष्ठेब्रह्मविदोद्विषन्ब्रह्मविदांधनं ॥

शाकल्येवांछतीत्येवंशाकल्यमशपन्मुनिः ॥ ५१॥ शापेनदग्धःशाकल्यस्तस्यास्थी
न्यपितस्कराः ॥ अपजुक्कुरतःशास्त्रसंस्कारोप्यस्यनाभवत् ॥ ५२॥ शाकल्योष्ट्रंविदे
षाद्दुष्टोलोकद्वयापतः ॥ ततोब्रह्मविदांभक्तिंकार्यादेषोनकुत्रचित् ॥ ५३॥
यश्चोपनिषदस्तस्यविज्ञानानंदरूपता ॥ तत्तताभोगमुक्तोश्चवक्तव्येत्युत
राश्रुतिः ॥ ५४॥ महाप्रलयसंपत्तौजगतःपुनरुद्भवे ॥ कारणंपठ्यतेब्रह्म
सर्वसाधर्म्यपूर्वकं ॥ ५५॥ ब्रह्मः कांडरुहोबीजरुहश्चेतिद्विधातयोः समः को
ऽरुहेणोपरेतसोन्निजायते ॥ ५६॥ नपठ्यतेतिस्पष्टत्वात्तद्वांछ्यंतरकारणं
किंत्वस्पष्टमशेषस्यपठ्यतेमूलकारणं ॥ ५७॥ अन्वयव्यतिरेकाभ्यांबीजा

स्यान्मूलकारणात्॥ दृश्यादृश्यजनिस्तद्वत्कस्मान्मूलाज्जगज्जनिः॥५७॥नित्य
जातस्मर्वितंनमंतव्यंयतोमृतः। पुनःपुनर्जीयतेस्यात्कृतनाशादिरन्यथा।
५८। कोन्वेनंजनयेन्नित्यमित्युक्तानविदुर्द्विजाः॥ जित्वातान्याज्ञवल्क्यस्तुगो
सहस्रंगृहीतवान्॥५९॥ जिगीषातामसीधेनुर्जिघृक्षावाक्यं मुनेः। य
थासात्विकवैराग्यात्तत्पादीनितथेक्षतां।६०॥ नरजन्मसमीदेहेविद्यमाने
विनश्यतः॥किंनुबोधेनामिभूतेभोगायोद्भवतःपुनः।६१॥आविर्भवति
रोभावौपर्यायाद्भोगबोधयोः॥ यजीवन्मुक्तिशास्त्रंतत्सत्येवमुपपद्यते
६२॥ मुनिरुवाचजगन्मूलंमुमुक्षुनुजिघृक्षया॥ आह विज्ञानमानंदंब्रह्मेति

श्रुतिरादरात्।६३॥एतावद्दिङ्निर्णीतंविजिगीषुकथामुखात्। तत्त्वमित्यखिला
ध्यायातात्पर्यंचोपसंहृतं।६४॥विज्ञानमितिचैतन्यंनक्रियानापितत्फलं॥नक
रकंनचाभासःक्रियादेःकिंनुभासकं।६५।एतावन्मात्रयाध्यात्माकार्यकारणव
स्तुनः॥श्रुत्यातत्त्वमसीत्युक्तात्तादात्म्यंप्रतिपद्यते॥६६॥निर्धूतात्रोषदुःखौ
घदेउलाभसुखमेवतत्। अथैषपरमानंदोयोवैभूमेतिशास्त्रतः।६७।विषये
न्द्रियसंबंधाद्यत्तुलौकेसुखायते। आद्यंतवत्तदायासजन्यत्वाच्चनतत्सुखं॥
६८॥अथावस्थाननुगतभास्वद्विज्ञानमात्रतः॥निरविद्याद्वयत्वात्तत्साक्षाद्ब्रह्मे
तिशब्द्यते।६९॥तदेवाविद्यया शक्त्याभोगमोक्षप्रदानतः॥ जगतोमूल

मित्याहरातिरित्यादिवाक्यतः।७०।अदृष्टफलसंप्रेक्षोः सुवर्णादिप्रयछतः॥फल
दानेनतद्ब्रह्मपरायणमुदीरितं॥७१॥दग्धमोहांधकारस्यप्रत्यग्बोधाग्निना मुने
ऐकात्म्येवर्त्तमानस्यब्रह्मात्मत्वात्परायणं॥७२॥यत्रवान्यदिवेत्येवंयत्रत्वस्ये
तिश्रुतेस्तथा॥नेदानेदानुरोधेनव्याचष्टीतपरायणं॥७३॥तस्मात्तमस्विनोब्र
ह्मभेदेनैवपरायणं॥ध्वस्ताविद्यस्यचैकात्म्यात्कैवल्येनपरायणं॥७४॥किंदुः
खाभावश्चानंदउतभावश्चसदापिकिं। संवेद्यश्चित्स्वभावोवाब्रह्मानंदेत्रचिंत्य
ते।७५। आद्यर्मोहांनिरानंदंसांख्यावैशेषिकाश्रपि॥तेषामानंदनाद्योयं दुः
खाभावस्यलक्षकः॥७६॥संवेद्यानंदमिछंतिमुक्तौ नैयायिकादयः॥भावस्

२५७

परमतेमुख्योविषयानंदवन्मतः।७७॥जलतत्क्रीडनरतिंप्राप्तःसर्वान्सकामान्सदा
श्नुते॥इत्यादिश्रुतयःप्राहुर्विषयानंदउल्पतां।७८॥क्रियाकारकशून्यत्वेऽथस्यानं
दस्यवेदनं॥यतोविज्ञानमानंदंब्रह्मेतिश्रुतिरब्रवीत्॥७९॥यथासुरर्यहम
स्मीतिस्वानंदंस्वेनगृह्यते॥ब्रह्मानंदोब्रह्मणैवंगृह्यतांकाविरुद्धता।८०। नैतदेवंय
तोमोक्षेदेहेंद्रियविवर्जिनात्॥ऐकात्म्यादपिनानंदगोचरायुज्यतेमतिः।८१।
देहादिनैरपेक्ष्येणमतिश्चेज्जायतेतदा॥लौकिकव्यवहारेपिदेहादिस्यादन
र्थकं॥८२॥ब्रह्मचेन्नित्यमानंदंवेत्तिविद्यांतदाध्रुवं। संसार्यपितदैकात्मा
न्मुक्तोकोतिरायोभवेत्।८३॥ब्रह्मानंदमथार्प्यसन्मुक्तोवेत्तियथाघटं। सर्ववे

दांतकोपः स्यात्तदैकात्म्यविरोधतः ।८२॥ तस्माद्विज्ञानमानंदमितिनानंदगोचरा ॥म
तिः किंतुचिदानंदघनस्वाभाव्यमुच्यते ।८३॥ जडत्वादित्यादियत्प्रोक्तं तच्चात्रनविरु
ध्यते ॥ सर्वात्मकत्वाद्दिडषःसर्वतः पाणितादिवत् ।८४॥ योगिदेवादिदेहेषुजड
त्वादियदीक्ष्यते ॥ तेनसर्वात्मकब्रह्मविदोमुक्तिःप्रशस्यते ॥८५॥ ननुजडत्वेव
न्मुक्तौसर्वात्मत्वात्परात्मनः ॥ दुःखित्वमपिसंप्राप्तं ऊंमीपाकादिदेहिषु ।८६॥
मैवंनारकदेहेषुतादात्म्यभ्रांत्यभावतः ॥ नदुःखंप्राप्यतेनापिविद्यास्तुत्युपयो
गितत्त्व ॥८७॥ आनंदब्रह्मविज्ञानपदार्थैकत्वहेतुतः ॥ नीलोत्पलादिवन्नात्रप्र
संगोब्रह्मणीष्यते ।८८॥ नजडंज्ञानरूपत्वादानंदत्वान्निर्मुखं ॥ नांतवद्ब्रह्मस्व

पंतद्वितियोज्यंपदत्रयं ।८९॥ विषयानंदवन्नातोवेद्यंकिंतुस्वयंप्रभं ॥ ध्र तादृगा
नंदरूपत्वंमुक्तावस्थाबभीयतां ।९०॥ तादृब्रह्मात्मबोधेनकृतार्थत्वमतिस्तु
या ॥ साधीरतिस्वरूपत्वाद्विद्याविषयतुष्टिवत् ॥९१॥ आरभ्यमानुषानंदमुत्त
रोत्तरवर्द्धितः ॥ श्रुताहेरण्यगर्भांताब्रह्मानंदस्यबिंदवः ॥९२॥ आनंदसागरर
स्नोयमनन्यानुभवात्मना ॥ सर्वदासर्वतोभातिसर्ववस्तुतदात्मकं ।९३॥ शता
निपंचश्लोकानांद्वाविंशतिरितीरिता ॥ संख्यावार्तिकसारेस्मिन्पंचमाध्याय
संग्रहे ॥ ५२२॥ ॥इतिवार्तिकसारेपंचमाध्यायस्यनवमंब्राह्मणं ॥ ॥ठ
॥ठ॥ ॥ठ॥ ॥ठ॥ ॥ठ॥ ॥ठ॥ ॥ठ॥ ॥ठ॥ ॥ठ॥ ॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017


DR BHAU DAJI
डाक्टर भाऊदाजी इत्याख्यस्यस्मारकम्
MEMORIAL